कवच का पाठ एवं धारण करने वाला मनुष्य त्रैलोक्य विजयी होता है । इस कवच का ज्ञान-प्राप्त किए बिना अर्थात् इसका पाठ किए बिना किसी भी मन्त्र को यदि एक करोड़ की संख्या में जपा जाय, तो भी सिद्धि प्राप्त नहीं होती ॥इति॥

श्री विष्णु पञ्जर स्तोत्रम् - श्रीगणेशाय नमः। ॐ अस्य श्री विष्णु पञ्जर स्तोत्र मंत्रस्य नारद ऋषिः अनुष्टुप छन्दः श्री विष्णु परमात्मा देवता अहं बीजम् सोऽहं शक्तिः ॐ ह्रीं कीलकम् मम सर्वदेह रक्षणार्थे जपे विनियोगः।

नारद ऋषये नमः गुरवे। श्री विष्णु परमात्म देवतायै नमः हृदये। अहं बीजं गुह्यं। सोऽहं शक्तिः पादयोः। ॐ ह्रीं कीलकं पादाग्रे। ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः इति मन्त्रः।

ॐ ह्रां अंगुष्ठाभ्यां नमः। ॐ ह्रीं तर्जनीभ्यां नमः। ॐ ह्रूं मध्यमाभ्यां नमः। ॐ ह्रैं अनामिकाभ्यां नमः। ॐ ह्रौं कनिष्ठिकाभ्यां नमः। ॐ ह्रः करतल करपृष्ठाभ्यां नमः। इति करन्यासः।

अथ हृदयादिन्यासः। ॐ ह्रां हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा। ॐ ह्रूं शिखायै वषट्। ॐ ह्रैं कवचाय हुम्। ॐ ह्रौं नेत्रत्रयाय वौषट्। ॐ ह्रः अस्त्राय फट्। इति अङ्गन्यासः। अहं बीजं प्राणायामं मंत्रत्रयेण कुर्यात्।

अथ ध्यानम्। परं परस्मात्प्रकृतेरनादिमेकं निविष्टं बहुधा गुहायाम्। सर्वाणि भूतानि चराचरस्थं नमामि विष्णुं जगदेकनाथम्॥१॥ ॐ विष्णु पञ्जरकं दिव्यं सर्वदुष्टनिवारणम्

उग्रतेजो महावीर्यं सर्वशत्रुनिकृंतनम् ॥२॥ त्रिपुरं दहमानस्य हरस्य ब्रह्मणोदितम् । तदहं संप्रव-
क्ष्यामि आत्मरक्षाकरं नृणाम् ॥३॥ पादौ रक्षतु गोविन्दो जंघे चैव त्रिविक्रमः । ऊरू मे केशवः
पातु कटिं चैव जनार्दनः ॥४॥ नाभिं चैवाच्युतः पातु गुह्यं चैव तु वामनः । उदरं पद्मनाभश्च
पृष्ठं चावतु माधवः ॥५॥ वामपार्श्वे तथा विष्णुर्दक्षिणे मधुसूदनः । बाहू वै वासुदेवश्च हृद
दामोदरस्तथा ॥६॥ कण्ठं रक्षतु वाराहः कृष्णश्च मुखमण्डलम् । माधवः कर्णमूले तु हृषीकेश-
श्च नासिके ॥७॥ नेत्रे नारायणो रक्षेल्ललाटं गरुडध्वजः । कपोलौ केशवो रक्षेद्वैकुण्ठः सर्व-
तोदिशम् ॥८॥ श्रीवत्साङ्कश्च सर्वेषामङ्गानां रक्षको भवेत् । पूर्वस्यां पुण्डरीकाक्षः आग्नेय्यां
श्रीधरस्तथा ॥९॥ दक्षिणे नारसिंहश्च नैर्ऋत्यां माधवोऽवतु । पुरुषोत्तमो मे वारुण्यां वायव्यां
च जनार्दनः ॥१०॥ गदाधरस्तु कौबेर्यामीशान्यां पातु केशवः । आकाशे च गदा पातु पाताले
च सुदर्शनम् ॥११॥ संनद्धः सर्वगात्रेषु प्रविष्टो भुवनेश्वरः । विष्णुपञ्जरविष्टोऽहं विचरामि
महीतले ॥१२॥ राजद्वारेऽपथे घोरे संग्रामे शत्रुसंकटे । नदीषु च रणे चैव चौरव्याघ्रभयेषु
च ॥१३॥ डाकिनी प्रेत भूतेषु भयं तस्य न जायते । रक्ष रक्ष महादेव रक्ष रक्ष जनेश्वर ॥१४॥
रक्षंतु देवताः सर्वाः ब्रह्मा विष्णु महेश्वराः । जले रक्षतु वाराहः स्थले रक्षतु वामनः ॥१५॥ अट-
व्यां नारसिंहश्च सर्वतः पातु केशवः । दिवा रक्षतु मां सूर्यो रात्रौ रक्षतु चन्द्रमाः ॥१६॥ पंथानं
दुर्गमं रक्षेत्सर्वमेव जनार्दनः । रोगविघ्नहतश्चैव ब्रह्महा गुरुतल्पगः ॥१७॥ स्त्रीहंता बाल
घाती च सुरापी वृषलीपतिः । मुच्यते सर्वपापेभ्यो यः पठन्नात्र संशयः ॥१८॥ अपुत्रो
लभते पुत्रः धनार्थी लभते धनम् । विद्यार्थी लभते विद्यां मोक्षार्थी लभते गतिम् ॥१९

आपदो हरते नित्य विष्णुस्तोत्रार्थसंपदा। यस्त्विदं पठते स्तोत्रं विष्णु पञ्जर मुत्तमम् ॥२०॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति। गोसहस्र फलं तस्य वाजपेयशतस्य च ॥२१॥ अश्वमेध सहस्रस्य फलं प्राप्नोति मानवः। सर्व कामं लभे -दस्य पठनान्नात्र संशयः ॥२२॥ जले विष्णुः स्थले विष्णुः विष्णुः पर्वतमस्तके। ज्वालामालाकुले विष्णुः सर्वं विष्णुमयं जगत् ॥२३॥

॥ इति श्री ब्रह्माण्डपुराणे नारद इन्द्र संवादे श्रीविष्णु पञ्जर स्तोत्रम् समाप्तम् ॥

फलश्रुति- इस विष्णु पंजर स्तोत्र का नित्य पाठ करने से साधक की मनोकामनायें पूर्ण होती हैं तथा समस्त संकटों से रक्षा होती है। यह समस्त पापों को नष्ट करने वाला तथा गोदान, अश्वमेध एवं वाजपेय यज्ञों के फल को देने वाला है। इसके पाठ से रोग, शोक, भय, क्लेश

श्री विष्णु पूजन यन्त्र

विघ्न, संकट आदि दूर हो जाते हैं। पुत्रहीन को पुत्र, धनार्थी को धन, विद्यार्थी को विद्या तथा मोक्षार्थी को मोक्ष प्राप्त होती है। इसका नित्य पाठ करने वाला समस्त पापों से मुक्त होकर विष्णुलोक को जाता है तथा जीवन में उसकी समस्त आकांक्षाएं सफल होती हैं॥ इति॥

अथ ध्रुवकृत भगवत्स्तुतिः- "ध्रुव उवाच॥ योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां संजीवयत्यखिलशक्तिधरः स्वधाम्ना। अन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणान्नमो भगवते पुरुषाय तुभ्यम्॥१॥ एकस्त्वमेव भगवन्निदमात्मशक्त्या मायाख्ययोरुगुणया महदाद्यशेषम्। सृष्ट्वानुविश्य पुरुषस्तदसद्गुणेषु नानेव दारुषु विभावसुवद् विभासि॥२॥ त्वद्दत्तया वयुनयेदमचष्ट विश्वं सुप्तप्रबुद्ध इव नाथ भवत्प्रपन्नः। तस्यापवर्ग्यशरणं तव पादमूलं विस्मर्यते कृतविदा कथमार्तबन्धो॥३॥ नूनं विमुष्टमतयस्तव मायया ते ये त्वां भवाप्ययविमोक्षणमन्यहेतोः। अर्चन्ति कल्पकतरुं कुणपोपभोग्यमिच्छन्ति यत्स्पर्शजं निरयेऽपि नृणाम्॥४॥ या निर्वृतिस्तनुभृतां तव पादपद्म ध्यानाद् भवज्जनकथाश्रवणेन वा स्यात्। सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत् किं त्वन्तकासिलुलितात् पततां विमानात्॥५॥ भक्तिं मुहुः प्रवहतां त्वयि मे प्रसङ्गो भूयादनन्त महताममलाशयानाम्। येनाञ्जसोल्बणमुरुव्यसनं भवाब्धिं नेष्ये भवद्गुणकथामृतपानमत्तः॥६॥ ते न स्मरन्त्यतितरां प्रियमीश मर्त्यं ये चान्वदः सुतसुहृद्गृहवित्तदाराः। ये त्वब्जनाभ भवदीय पदारविन्दसौगन्ध्य लुब्ध हृदयेषु कृतप्रसङ्गाः॥७॥ तिर्यङ्नगद्विजसरीसृपदेवदैत्य मर्त्यादिभिः परिचितं सदसद्विशेषम्। रूपं स्थविष्ठमज ते महदाद्यनेकं नातः परं परम वेद्मि न यत्र वादः

श्रीगोपाल पूजन यन्त्र

॥८॥ कल्पान्त एतदखिलं जठरेण गृह्णन् शेते पुमान् स्वदृगनन्तसखस्तदङ्के। यन्नाभिसिन्धुरुह काञ्चनलोकपद्म गर्भे द्युमान् भगवते प्रणतोऽस्मि तस्मै ॥९॥ त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा कूटस्थ आदि पुरुषो भगवांस्त्र्यधीशः। यद् बुद्ध्यवस्थितिमखण्डितया स्वदृष्ट्या द्रष्टास्थिताविधिमखो व्यतिरिक्त आस्से ॥१०॥ यस्मिन् विरुद्धगतयो ह्यनिशं पतन्ति विद्यादयो विविधशक्तय आनुपूर्व्यात्। तद् ब्रह्म विश्वभवमेकमनन्तमाद्यमानन्दमात्रमविकारमहं प्रपद्ये ॥११॥ सत्याऽऽशिषो हि भगवंस्तव पादपद्ममाशीस्तथानुभजतः पुरुषार्थमूर्तेः। अप्येवमर्य भगवन् परिपाति दीनान् वाश्रेव वत्सकमनुग्रह कातरोऽस्मान् ॥१२॥

॥इति श्रीमद्भागवते महापुराणे चतुर्थ स्कन्धे नवमेऽध्याये ध्रुवकृता भगवत्स्तुतिः सम्पूर्णा॥

टिप्पणी– उक्त स्तोत्र का नित्य पाठ मनोभिलाषा पूरक है।

अथ श्रीविष्णु हृदय स्तोत्रम् - श्रीगणेशाय नमः। अस्य श्रीविष्णुहृदयस्तोत्रस्य सङ्कर्षण ऋषिः अनुष्टुप् त्रिष्टुप् गायत्री च यथायोग छन्दः श्रीमहाविष्णुः परमात्मा देवता श्रीमहाविष्णु प्रीत्यर्थे विनियोगः।

ममाग्रतस्सदा विष्णुः पृष्ठतश्चापि केशवः। गोविन्दो दक्षिणे पार्श्वे वामे च मधुसूदनः॥ उपरिष्टात्तु वैकुण्ठो वराहः पृथिवीतले। अवान्तरदिशो यास्तु तासु सर्वासु माधवः॥२॥ गच्छतस्तिष्ठतो वापि जाग्रतस्स्वपितोऽपि वा। नरसिंहकृता गुप्तिः वासुदेवमयो ह्यहम्॥३॥ अव्यक्तं चैवास्य योनौ वदन्ति व्यक्तं ते ऽहं दीर्घमायुर्गतिञ्च। वह्निं वक्त्रं चन्द्रसूर्यौ च नेत्रे दिशि श्रोत्रे प्राणमाहुश्च वायुम्॥४॥ वाचं वेदा हृदयं वै नभश्च पृथ्वी पादौ तारका रोमकूपाः। साङ्गोपाङ्गो ह्यधिदेवताश्च विद्या ह्युपस्थं ते सर्व एते समुद्राः॥५॥ तं देवदेवं शरणं प्रजानां यज्ञात्मकं सर्वलोकं प्रतिष्ठम्। यज्ञं वरेण्यं वरदं वरिष्ठं ब्रह्माणमीशं पुरुषं नमस्ते॥६॥ आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतम्। ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनम्॥७॥ महाभारतकाख्यानं कुरुक्षेत्रं सरस्वतीम्। केशवं गाञ्च गङ्गाश्च कीर्तयन्नावसीदति॥८॥ ॐ भूः पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः। ॐ भुवः पुरु-षाय पुरुषरूपाय वासुदेवाय नमो नमः। ॐ सुवः पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः। ॐ भूर्भुवस्सुवः पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः। ॐ प्रद्युम्नाय पुरुषाय पुरुषरूपाय वासु-देवाय नमो नमः। ॐ अनिरुद्धाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः। ॐ भवोद्भवाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः। ॐ केशवाय पुरुषाय पुरुषरूपाय वासुदेवाय वासु-देवाय नमो नमः। ॐ नारायणाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः। ॐ माधवाय पुरुषाय

पुरुषरूपाय वासुदेवाय नमो नमः। ॐ गोविन्दाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः। ॐ विष्णवे पुरुषाय पुरुषरूपाय वासुदेवाय नमोनमः। ॐ मधुसूदनाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः। ॐ त्रिविक्रमाय पुरुषाय पुरुषरूपाय वासुदेवायनमोनमः। ॐ वामनाय पुरुषाय पुरुषरूपाय वासुदेवायनमोनमः। ॐ श्रीधराय पुरुषाय पुरुषरूपाय वासुदेवायनमोनमः। ॐ हृषीकेशाय पुरुषाय पुरुषरूपाय वासुदेवाय नमोनमः। ॐ पद्मनाभाय पुरुषाय पुरुषरूपाय वासुदेवाय नमोनमः। ॐ सत्याय पुरुषाय पुरुषरूपाय वासुदेवाय नमोनमः। ॐ ईशानाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः। ॐ तत्पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः। ॐ सत्पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः। ॐ प्रणवेन्दु विष्णो शतसहस्रनेत्र पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः।"

श्री नृसिंह पूजन यन्त्र

फलश्रुतिः- य इदं विष्णुहृदयमधीते ब्रह्महत्याया पूतो भवंति। पतितसम्भाषणात्पूतो भवंति। सुरापानात्पूतो भवंति। असत्यभाषणात्पूतो भवंति। अगम्यागमनात्पूतो भवंति। वृषलीगमनात्पूतो भवंति। अभक्ष्यभक्षणात्पूतो भवंति। ब्रह्मचारी सद्ब्रह्मचारी भवंति। अनेककतुसहस्रेणेष्टं भवंति। गायत्र्याः षष्टिसहस्राणि जप्तानि भवन्ति। चत्वारो वेदाश्चाधीता भवन्ति। सर्ववेदेषु ज्ञातो भवंति। सर्वतीर्थेषु स्नातो भवन्ति। यदि कस्यचिन्नब्रूयाच्छुचिनी भवन्ति। अष्टौ ब्राह्मणान् ग्राहयित्वा विष्णुलोकमाप्नोति। मानसेन गतिर्भवति। न नश्यंति मन्त्रः। यत्र यत्रेच्छेत्तत्र तत्रोपजायते। स्मरति चात्मानं भगवान्महाविष्णुरित्याह॥ इति श्रीविष्णुहृदय स्तोत्रं समाप्तम्॥

माहात्म्य- उक्त विष्णुहृदय स्तोत्र का पाठ करने वाला व्यक्ति ब्रह्महत्या, पतित-सम्भाषण, सुरापान, असत्य-भाषण, अगम्या-गमन, वृषली-गमन एवं अभक्ष्य-भक्षण आदि पापों से मुक्त हो जाता है। ब्रह्मचारी सद्ब्रह्मचारी बन जाता है। अनेक सहस्र यज्ञों का फल प्राप्त होता है। साठ सहस्र गायत्री-मन्त्र के जप का फल मिलता है। चारों वेदों का ज्ञाता तथा सब शास्त्रों का जानकार होता है। सब तीर्थों के स्नान का फल प्राप्त होता है। हर किसी को यह स्तोत्र नहीं बताना चाहिए। आठ ब्राह्मणों को यह स्तोत्र लिख कर दान करने से विष्णु लोक प्राप्त होता है। इसके प्रभाव से सिद्ध मन्त्र नष्ट नहीं होता। सब स्थानों पर विजय मिलती है तथा इसका स्मरण एवं पाठ करने से भगवान् विष्णु प्रसन्न होते हैं।

टिप्पणी- श्रीविष्णु के उक्त ५ स्तोत्रादि विशेष फलदायक हैं। इनके अतिरिक्त 'श्रीविष्णु सहस्रनाम' एवं 'श्रीगोपाल सहस्रनाम' का नित्य-पाठ भी भुक्ति-मुक्ति दायक एवं कामना-पूरक होता है।

अथ शिव स्तोत्राणि - अब श्री शिव की उपासना से सम्बन्धित प्रमुख स्तोत्रादि को लिखा जाता है।

श्री शिवस्य प्रातः स्मरणम् - निम्नलिखित श्लोकों द्वारा प्रातःकाल शिव जी का स्मरण करना चाहिए-

प्रातः स्मरामि भवभीतिहरं सुरेशं गङ्गाधरं वृषभवाहनमम्बिकेशम्। खट्वाङ्गशूलवरदाभयहस्तमीशं संसाररोगहरमौषधमद्वितीयम् ॥१॥ प्रातर्नमामि गिरिशं गिरिजार्द्धदेहं सर्गस्थितिप्रलयकारणमादिदेवम्। विश्वेश्वरं विजितविश्वमनोऽभिरामं संसाररोगहरमौषधमद्वितीयम् ॥२॥ प्रातर्भजामि शिवमेकमनन्तमाद्यं वेदान्तवेद्यमनघं पुरुषं महान्तम्। नामादिभेदरहितं षड्भावशून्यं संसाररोगहरमौषधमद्वितीयम् ॥३॥ प्रातः समुत्थाय शिवं विचिन्त्य श्लोकत्रयं येऽनुदिनं पठन्ति। ते दुःखजातं बहुजन्मसञ्चितं हित्वा पदं यान्ति तदेव शम्भोः ॥४॥

माहात्म्य - जो व्यक्ति नित्य प्रातःकाल उक्त तीनों श्लोकों का पाठ करता है, वह अनेक जन्मों के संचित पापों एवं दुःखों से मुक्त होकर शिवजी के कल्याणमय पद को प्राप्त करता है।

श्री अमोघ शिव कवचम् - निम्नलिखित अमोघ शिव कवच स्कन्द पुराण के ब्रह्मोत्तर खण्ड से उद्धृत किया गया है। यह परम गुह्य, आदरणीय तथा समस्त पापों को नष्ट करने वाला है। यह विघ्न-बाधाओं को दूर करने वाला, समस्त विपत्तियों का नाशक तथा, परम पवित्र, परम हितकारी तथा समस्त भयों को हरने वाला है।

सर्वप्रथम विनियोग को छोड़कर, ऋष्यादिन्यास, करन्यास तथा हृदयादि अङ्गन्यास करके भगवान् शंकर का ध्यान करना चाहिए, तत्पश्चात् कवच का पाठ करना चाहिए।

"अस्य श्रीशिव कवच स्तोत्र मन्त्रस्य ब्रह्मा ऋषि:, अनुष्टुप् छन्द:, श्री सदाशिव रुद्रो देवता, ह्रीं शक्ति: वं कीलकम्, श्रीं ह्रीं क्लीं बीजम्, सदाशिव प्रीत्यर्थे शिव कवच स्तोत्र जपे विनियोग:।"

ऋष्यादि न्यास:- ॐ ब्रह्माऋषये नम: शिरसि। अनुष्टुप् छन्दसे नम: मुखे। श्रीसदाशिव रुद्र देवतायै नम: हृदि। ह्रीं शक्तये नम: पादयो:। वं कीलकाय नम: नाभौ। श्रीं ह्रीं क्लीं इति बीजाय नम: गुह्ये। विनियोगाय नम: सर्वाङ्गे।

अथ करन्यास:- ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ ह्रीं रां सर्वशक्तिधाम्ने ईशानात्मने अङ्गुष्ठाभ्यां नम:।

ॐ नमो भगवते ज्वलज्ज्वाला मालिने ॐ नं रीं नित्य तृप्ति धाम्ने तत्पुरुषात्मने तर्जनीभ्यां स्वाहा।

ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ मं रुं अनादि शक्ति धाम्ने अघोरात्मने मध्यमाभ्यां वषट्।

श्रीशिव पूजन यन्त्र

ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ शिं रैं स्वतन्त्र शक्ति धाम्ने वामदेवात्मने अनामिकाभ्यां हुम्।

ॐ नमो भगवते ज्वलज्ज्वाला मालिने ॐ वां रौं अलुप्त शक्ति धाम्ने सद्योजातात्मने कनिष्ठिकाभ्यां वौषट्।

ॐ नमो भगवते ज्वलज्ज्वाला मालिने ॐ यं रः अनादि शक्ति धाम्ने सर्वात्मने करतलकरपृष्ठाभ्यां फट्।

अथ हृदयाद्यङ्गन्यासः - ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ ह्रीं रां सर्वशक्तिधाम्ने ईशानात्मने हृदयाय नमः।

ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ नं रीं नित्यतृप्तिधाम्ने तत्पुरुषात्मने शिरसे स्वाहा।

ॐ नमो भगवते ज्वलज्ज्वाला मालिने ॐ मं रूं अनादि शक्ति धाम्ने अघोरात्मने शिखायै वषट्।

ॐ नमो भगवते ज्वलज्ज्वाला मालिने ॐ शिं रैं स्वतन्त्र शक्ति धाम्ने वामदेवात्मने कवचाय हुम्।

ॐ नमो भगवते ज्वलज्ज्वाला मालिने ॐ वां रौं अलुप्त शक्तिधाम्ने सद्योजातात्मने नेत्रत्रयाय वौषट्।

ॐ नमो भगवते ज्वलज्ज्वाला मालिने ॐ यं रः अनादि शक्ति धाम्ने सर्वात्मने अस्त्राय फट्।

अथ ध्यानम् - वज्रदंष्ट्रं त्रिनयनं कालकण्ठमरिंदमम्। सहस्रकरमत्युग्रं च वन्दे शम्भुमुमापतिम्॥

अथ कवचम् - ऋषभ उवाच॥ अथापरं सर्वपुराण गुह्यं निःशेष पापौघ हरं पवित्रम्। जय प्रदं सर्वविपद्विमोचनं वक्ष्यामि शैवं कवचं हिताय ते॥ नमस्कृत्य महादेवं विश्वव्यापिनमीश्वरम्। वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम्॥ १॥ शुचौ देशे समासीनो यथावत्कल्पितासनः। जितेन्द्रियो जित प्राणश्चिन्तयेच्छिवमव्ययम्॥२॥ हृत्पुण्डरीकान्तर सन्निविष्टं स्वतेजसा व्याप्त नभोऽवकाशम्। अतीन्द्रियं सूक्ष्म मनन्तमाद्यं ध्यायेत्परानन्दमयं महेशम्॥३॥ ध्यानावधूताखिल कर्मबन्धश्चिरं चिदानन्दनिमग्न

चेताः। षडक्षरन्यास समाहितात्मा शैवेन कुर्यात्कवचेन रक्षाम् ॥४॥ मां पातु देवोऽखिलदेवतात्मा संसार
कूपे पतितं गंभीरे। तन्नाम दिव्यं वरमन्त्रमूलं धुनोतु मे सर्वमघं हृदिस्थम् ॥५॥ सर्वत्र मां रक्षतु विश्व
मूर्तिर्ज्योतिर्मयानन्दघनश्चिदात्मा। अणोरणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात् ॥६॥ यो भूस्वरू
पेण बिभर्ति विश्वं पायात्स भूमेर्गिरिशोऽष्टमूर्तिः। योऽपी स्वरूपेण नृणां करोति संजीवनं सोऽवतु मां जलेभ्यः
॥७॥ कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः। स कालरुद्रोऽवतु मां दवाग्नेर्वात्यादि
भीतेरखिलाच्च तापात् ॥८॥ प्रदीप्तविद्युत्कनकावभासो विद्यावराभीति कुठारपाणिः। चतुर्मुखस्तत्पुरुष
स्त्रिनेत्रः प्राच्यां स्थितं रक्षतु मामजस्रम् ॥९॥ कुठार वेदांकुश पाशशूल कपालढक्काक्ष गुणान् दधानः।
चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायादघोरो दिशि दक्षिणस्याम् ॥१०॥ कुन्देन्दुशंखस्फटिकावभासो वेदाक्ष
माला वरदाभयांकः। त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योऽधिजातोऽवतु मां प्रतीच्याम् ॥११॥ वराक्ष
माला भयटंकहस्तः सरोज किञ्जल्क समानवर्णः। त्रिलोचनश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि
वामदेवः ॥१२॥ वेदाभयेष्टांकुशटंकपाशकपालढक्काक्षकशूलपाणिः। सितद्युतिः पञ्चमुखोऽवतान्मामी-
शान ऊर्ध्वं परमप्रकाशः ॥१३॥ मूर्द्धानमव्यान्मम चन्द्रमौलिर्भालं ममाव्यादथ भालनेत्रः। नेत्रे ममा-
व्याद् भगनेत्रहारी नासां सदा रक्षतु विश्वनाथः ॥१४॥ पायाच्छ्रुती मे श्रुतिगीतकीर्तिः कपोलमव्यात्
सततं कपाली। वक्त्रं सदा रक्षतु पञ्चवक्त्रो जिह्वां सदा रक्षतु वेदजिह्वः ॥१५॥ कण्ठं गिरीशोऽ
वतु नीलकण्ठः पाणिद्वयं पातु पिनाकपाणिः। दोर्मूलमव्यान्मम धर्मबाहुर्वक्षःस्थलं दक्षमखान्तकोऽ
व्यात् ॥१६॥ ममोदरं पातु गिरीन्द्रधन्वा मध्यं ममाव्यान्मदनान्तकारी। हेरम्बतातो मम पातु नाभिं
पायात्कटी धूर्जटिरीश्वरो मे ॥१७॥ ऊरुद्वयं पातु कुबेरमित्रो जानुद्वयं मे जगदीश्वरोऽव्यात्। जंघायुगं

पुंगवकेतुरव्यात् पादौ ममाव्यात्सुरवन्द्यपाद: ॥१८॥
माहेश्वर: पातु दिनादियामे मां मध्ययामेऽवतु वामदेव:।
त्र्यम्बक: पातु तृतीययामे वृषध्वज: पातु दिनान्त्ययामे
॥१९॥ पायान्निशादौ शशिशेखरो मां गंगाधरं रक्षतु
मां निशीथे। गौरीपति: पातु निशावसाने मृत्युंजयो
रक्षतु सर्वकालम् ॥२०॥ अन्त: स्थितं रक्षतु शंकरो
मां स्थाणु: सदा पातु बहिस्थितं माम्। तदन्तरे पातु
पति: पशूनां सदाशिवो रक्षतु मां समन्तात् ॥२१॥
तिष्ठन्तमव्याद् भुवनैकनाथ: पायाद् व्रजन्तं प्रमथाधि
नाथ:। वेदान्तवेद्यो ऽवतु मां निषण्णं माम व्यय: पातु
शिव: शयानम् ॥२२॥ मार्गेषु मां रक्षतु नीलकण्ठ:
शैलादि दुर्गेषु पुरत्रयारि:। अरण्यवासादि महाप्रवासे
पायान्मृगव्याध उदार शक्ति: ॥२३॥ कल्पान्त काटोपप-
टु प्रकोप: स्फुटाट्टहासोच्चलिताण्ड कोश:। घोरारिसेना
र्णवदुर्निवार महाभयाद् रक्षतु वीरभद्र: ॥२४॥ पत्त्यश्व
मातङ्ग घटावरूथ सहस्रलक्षायुत कोटिभीषणम्। अक्षौ-
हिणीनां शतमाततायिनां छिन्द्यान्मृडो घोर कुठार

श्रीशङ्कर पूजन यन्त्र

धारया ॥२५॥ निहन्तु दस्यून् प्रलयानलार्चिर्ज्वलत्त्रिशूलं त्रिपुरान्तकस्य। शार्दूल सिंहर्क्ष वृकादि हिंस्रान् संत्रास-
यत्वीश धनुः पिनाकम् ॥२६॥ दुःस्वप्न दुश्शकुन दुर्गति दौर्मनस्य दुर्भिक्ष दुर्व्यसन दुस्सह दुर्यशांसि। उत्पाततापं
विषभीतिमसद्ग्रहार्ति व्याधींश्च नाशयतु मे जगतामधीशः ॥२७॥ सकलतत्त्व विहाराय सकललोकैकभर्त्रे

ॐ नमो भगवते सदाशिवाय सकल तत्त्वात्मकाय सकलनिगमगुह्याय सकलवरप्रदाय सकल
सकललोकैक हर्त्रे सकललोकैक गुरवे सकललोकैक साक्षिणे सकललोकैक शंकराय शशाङ्क शेखराय शाश्वतनिजभासाय
दुरितार्त्तिभञ्जनाय सकलजगदभयंकराय निष्कलंकाय निर्द्वन्द्वाय निस्सङ्गाय
निर्गुणाय निरुपमाय निरूपाय निराभासाय निरामयाय निष्प्रपञ्चाय नित्य शुद्ध बुद्ध परिपूर्ण सच्चिदा-
निर्मलाय निर्ममाय नित्यरूपविभवाय निरुपमविभवाय निराधाराय दुःखदावदारण महाभै-
नन्दाद्वयाय परम शान्त प्रकाशतेजोरूपाय जय जय महारुद्र महारौद्र भद्रावतार ... गदा शक्ति
-रव कालभैरव कल्पान्तभैरव कपालमालाधर खट्वाङ्ग खड्ग चर्म पाशाङ्कुश डमरु शूल चाप बाण गदा शक्ति
भिन्दिपाल तोमर मुसल मुद्गर पट्टिश परशु परिघ भुशुण्डी शतघ्नी चक्राद्यायुध भीषणकर सहस्रमुखदंष्ट्रा
कराल विकटाट्टहास विस्फारित ब्रह्माण्डमण्डल नागेन्द्रकुण्डल नागेन्द्रहार नागेन्द्रवलय नागेन्द्रचर्मधर मृत्युं-
जय त्र्यम्बक त्रिपुरान्तक विरूपाक्ष विश्वेश्वर विश्वरूप वृषभवाहन विषभूषण विश्वतोमुख सर्वतो
रक्ष रक्ष मां ज्वल ज्वल महामृत्युभयमपमृत्युभयं नाशय नाशय रोगभयमुत्सादयोत्सादय विषसर्पभयं
शमय शमय चोरभयं मारय मारय मम शत्रूनुच्चाटयोच्चाटय शूलेन विदारय विदारय कुठारेण
भिन्धि भिन्धि खड्गेन छिन्धि छिन्धि खट्वाङ्गेन विपोथय विपोथय मुसलेन निष्पेषय निष्पेषय
बाणैः संताडय संताडय रक्षांसि भीषय भीषय भूतानि विद्रावय विद्रावय कूष्माण्ड वेताल मारी-

मं० म० ५५३

भा० टी०

गणब्रह्मराक्षसान् संत्रासय संत्रासय ममाभयं कुरु कुरु वित्रस्तं मामाश्वासयाश्वासय नरकभयान्मामुद्धारयोद्धारय संजीवय संजीवय क्षुत्तृड्भ्यां मामाप्याययाप्यायय दुःखातुरं मामानन्दयानन्दय शिवकवचेन मामाच्छादयाच्छादय त्र्यम्बक सदाशिव नमस्ते नमस्ते नमस्ते।

ऋषभ उवाच ॥ इत्येतत्कवचं शैवं वरदं व्याहृतं मया। सर्वबाधाप्रशमनं रहस्यं सर्वदेहिनाम् ॥२८॥ यः सदा धारयेन्मर्त्यः शैवं कवचमुत्तमम्। न तस्य जायते क्वापि भयं शम्भोरनुग्रहात् ॥२९॥ क्षीणायुर्मृत्युमापन्नो महारोगहतोऽपि वा। सद्यः सुखमवाप्नोति दीर्घमायुश्च विन्दति ॥३०॥ सर्वदारिद्र्यशमनं सौमङ्गल्यविवर्धनम्। यो धत्ते कवचं शैवं स देवैरपि पूज्यते ॥३१॥ महापातकसंघातैर्मुच्यते चोपपातकैः। देहान्ते शिवमाप्नोति शिववर्मानुभावतः ॥३२॥ त्वमपि श्रद्धया वत्स शैवं कवचमुत्तमम्। धारयस्व मयादत्तं सद्यः श्रेयो ह्यवाप्स्यसि ॥ ३३॥

॥इति श्रीस्कन्दपुराणे एकाशीतिसाहस्र्यां तृतीये ब्रह्मोत्तरखण्डे सीमन्तिनीमाहात्म्ये भद्रायुषोपाख्याने शिवकवचकथनं नाम द्वादशोऽध्यायः॥

श्रीशिवाष्टकम् - "तस्मै नमः परमकारणकारणाय, दीप्तोज्ज्वलज्ज्वलितपिङ्गललोचनाय, नागेन्द्रहारकृतकुण्डलभूषणाय, ब्रह्मेन्द्रविष्णुवरदाय नमः शिवाय ॥१॥ श्रीमत्प्रसन्नशशिपन्नगभूषणाय, शैलेन्द्रजावदनचुम्बितलोचनाय। कैलासमन्दरमहेन्द्रनिकेतनाय लोकत्रयार्तिहरणाय नमः शिवाय ॥२॥ पद्मावदातमणिकुण्डलगोवृषाय, कृष्णागरुप्रचुरचन्दनचर्चिताय। भस्मानुषक्तविकचोत्पलमल्लिकाय, नीलाब्जकण्ठसदृशाय नमः शिवाय ॥३॥ लम्बत्सपिङ्गलजटामुकुटोत्कटाय, दंष्ट्राकरालविकटोत्कट

भैरवाय । व्याघ्राजिनाम्बर धराय मनोहराय, त्रैलोक्यनाथ नमिताय नमः शिवाय ॥४॥ दक्षप्रजापतिमहामख नाशनाय, क्षिप्रं महात्रिपुर दानव घातनाय । ब्रह्मोर्जितोर्ध्वग करोटिनिकृन्तनाय, योगाय योगनमिताय नमः शिवाय ॥५॥ संसार सृष्टि घटना परिवर्तनाय, रक्षः पिशाच गण सिद्ध समाकुलाय । सिद्धोरगग्रह गणेन्द्र निषेविताय, शार्दूल चर्मवसनाय नमः शिवाय ॥६॥ भस्माङ्ग रागकृत रूप मनोहराय, सौम्यावदात वनमाश्रित माश्रिताय । गौरी कटाक्ष नयनार्ध निरीक्षणाय, गोक्षीरधार धवलाय नमः शिवाय ॥७॥ आदित्य सोम वरुणानिलसेविताय, यज्ञाग्नि होत्र वरधूम निकेतनाय । ऋक् सामवेद मुनिभिः स्तुति संयुताय, गोपाय गोपनमिताय नमः शिवाय ॥८॥ शिवाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ । शिवलोकमवाप्नोति शिवेन सह मोदते ॥९॥ इति श्रीमच्छङ्कराचार्यविरचितं शिवाष्टकं सम्पूर्णम् ॥

श्री मृत्युञ्जय स्तोत्रम् - कैलासस्योत्तरे शृङ्गे शुद्धस्फटिक सन्निभे । तमोगुणविहीने तु जरा मृत्यु विवर्जिते ॥१॥ सर्वार्थ सम्पदाधारे सर्वज्ञान कृतालये । कृताञ्जलि पुटो ब्रह्मा ध्यानासीन सदाशिवम् ॥२॥ पप्रच्छ प्रणतो भूत्वा जानुभ्यामवनिं गतः । सर्वार्थसम्पदाधारो ब्रह्मा लोकपितामह ॥३॥ ब्रह्मोवाच ॥ केनोपायेन देवेश चिरायुर्लोमशोऽभयत । तन्मे ब्रूहि महेशान लोकानां हितकाम्यया ॥४॥ श्रीसदाशिव उवाच ॥ शृणु ब्रह्मन्प्रवक्ष्यामि चिरायुर्मुनिसत्तमः । सञ्जातः कर्मणा येन व्याधि मृत्युविवर्जितः ॥५॥ तस्मिन्नेकाननं घोरे सलिलौघ परिप्लुते । कृतान्त भयनाशाय स्तुतो मृत्युञ्जयः शिवः ॥६॥ तस्य संकीर्त्तनान्नित्यं मुनि मृत्यु विवर्जितः । तमेवं कीर्तये ब्रह्मन्मृत्यु जेतुं न संशयः ॥७॥ श्रीलोमशोवाच ॥ ॐ देवाधिदेव देवेश सर्वप्रणभृताम्बर । प्राणिनामपि नाथस्त्वं मृत्युञ्जय नमोऽस्तुते ॥८॥ देहिनां जीव

श्रीमृत्युञ्जय पूजन यन्त्र

भूतोऽसि जीवो जीवस्य कारणम् । जगतो रक्षकस्त्वं वै
मृत्युञ्जय नमोऽस्तुते ॥ ९॥ हेमाद्रि शिखराकारं सुधा
वीचि मनोहरम् । पुण्डरीक परं ज्योतिर्मृत्युंजय नमोऽ
स्तुते ॥ १०॥ ध्यानाधारं महाज्ञानं सर्वज्ञानैक कारणम् ।
परित्रासि च लोकानां मृत्युञ्जय नमोऽस्तुते ॥ ११॥
निहता येन कालेन सदेवासुर मानुषाः । गन्धर्वाप्सर
सश्चैव सिद्ध विद्याधरास्तथा ॥ १२॥ साध्याश्च वस
-वो रुद्रास्तथाश्विनि सुतावुभौ । मारुतश्च दिशा नागाः
स्थावराजङ्गमास्तथा ॥ १३॥ जिता सोऽपि त्वया
ध्यायेन्मृत्युञ्जय नमोऽस्तुते ॥ १४॥ ये ध्यायन्ति
परां मूर्तिम्पूजयन्त्य वरादयः । न ते मृत्युवशं यान्ति
मृत्युञ्जय नमोऽस्तुते ॥ १५॥ त्वमोङ्कारोऽसि वेदानां
देवानां च सदाशिवः । आधार शक्तिः शक्तीनां मृत्यु
ञ्जय नमोऽस्तुते ॥ १६॥ स्थावरे जङ्गमे वापि या-
वत्तिष्ठति देहगः । जीवत्यपत्यलोकोऽयं मृत्युञ्जय
नमोऽस्तुते ॥ १७॥ सोमसूर्याग्नि मध्यस्थ व्योम
व्यापिन्सदाशिवः । कालत्रय महाकाल मृत्युञ्जय

नमोऽस्तुते ॥१८॥ प्रबुद्धे चाप्रबुद्धे च त्वमेव सृजते जगत्। सृष्टिरूपेण देवेश मृत्युञ्जय नमोऽस्तुते ॥१९॥
व्योम्नि त्वं व्योमरूपोऽसि तेजः सर्वत्र तेजसि। ज्ञानिनां ज्ञानरूपोऽसि मृत्युञ्जय नमोऽस्तुते ॥२०॥ जग
ज्जीवो जगत्प्राणः स्रष्टा त्वं जगतः प्रभुः। कारणं सर्वतीर्थानां मृत्युञ्जय नमोऽस्तुते ॥२१॥ नेता त्वमि
न्द्रियाणां च सर्वज्ञान प्रबोधकः। सांख्ययोगश्च हंसश्च मृत्युञ्जय नमोऽस्तुते ॥२२॥ रूपातीतः सुरूपश्च
पिण्डस्थपदमेव च। चतुर्युगकलाधारः मृत्युञ्जय नमोऽस्तुते ॥२३॥ रेचके वह्निरूपोऽसि सोमरूपोऽ
सि पूरके। कुम्भके शिवरूपोऽसि मृत्युञ्जय नमोऽस्तुते ॥२४॥ क्षयं करोषि पापानां पुण्यानामपि वर्द्धनम्
हेतुस्त्वं श्रेयसां नित्यं मृत्युञ्जय नमोऽस्तुते ॥२५॥ सर्वमाया कलातीतं सर्वेन्द्रिय परापरः। सर्वेन्द्रिय कला
धीश मृत्युञ्जय नमोऽस्तुते ॥२६॥ रूपं गन्धो रसः स्पर्शः शब्द संस्कार एव च। त्वत्तः प्रकाश एतेषां
मृत्युञ्जय नमोऽस्तुते ॥२७॥ चतुर्विधानां सृष्टीनां हेतुस्त्वं कारणेश्वरम्। भावाभावपरिच्छिन्नं मृत्यु-
ञ्जय नमोऽस्तुते ॥२८॥ त्वमेको निष्कलो लोके सकले भुवनत्रये। अतिसूक्ष्मातिरूपस्त्वं मृत्युञ्जय नमो
स्तुते ॥२९॥ त्वं प्रबोधस्त्वमाधारस्त्वद्बीजं भुवनत्रयम्। सत्त्वं रजस्तमस्त्वं हि मृत्युञ्जय नमोऽस्तुते ॥३०॥
त्वं सोमस्त्वं दिनेशश्च त्वमात्मा प्रकृतेः परः। अष्टत्रिंशत्कलानाथ मृत्युञ्जय नमोऽस्तुते ॥३१॥ सर्वे
दिशानामाधारः सर्वभूतगुणाश्रयः। सर्वज्ञानमयानन्त मृत्युञ्जय नमोऽस्तुते ॥३२॥ त्वमात्मा सर्वभूतानां
गुणानां त्वमधीश्वरः। सर्वानन्दमयाधारः मृत्युञ्जय नमोऽस्तुते ॥३३॥ त्वं यज्ञः सर्वयज्ञानां त्वं बुद्धिर्बोध
लक्षणः। शब्दब्रह्म त्वमोंकार मृत्युञ्जय नमोऽस्तुते ॥३४॥ श्रीसदाशिव उवाच ॥ एवं संकीर्तयेद्यस्तु शुचिस्त
द्गतमानसः। भक्त्या शृणोति यो ब्रह्मन्न स मृत्युवशो भवेत् ॥३५॥ न च मृत्युभयं तस्य प्राप्तकालं च
लंघयेत्। अपमृत्युभयं तस्य प्रणश्यति न संशयः ॥३६॥ व्याधयो नोपपद्यन्ते नोपसर्गभयं भवेत्। प्र-

-त्यासन्नन्तोर काले शतैकावर्तने कृते ॥३७॥ मृत्युर्न जायते तस्य रोगान्मुञ्चति निश्चितम्। पञ्चम्यां वा दश-म्यां वा पौर्णमास्यामथोऽपि वा ॥३८॥ शतमावर्तयेद्यस्तु शतवर्षं स जीवति। तेजस्वी बलसम्पन्नो लभते श्रियमुत्तमाम् ॥३९॥ त्रिविधंनाशयेत्पापं मनोवाक्काय सम्भवम्। अभिचाराणि कर्माणि कर्माण्याथ -र्वणानि च ॥४०॥ क्षीयन्ते नात्र सन्देहो दुःस्वप्नंच विनश्यति। इदं रहस्यंचपरं देवदेवस्य शूलिनः। दुःश्चिन्तनाशनं पुण्यं सर्वविघ्न विनाशनम् ॥४१॥"

॥इति श्री शिव ब्रह्मा सम्वाद श्री मृत्युञ्जय स्तोत्रं सम्पूर्णम्॥

फलश्रुति - इस मृत्युञ्जय स्तोत्र का पाठ करने वाले व्यक्ति को मृत्यु तथा अपमृत्यु का भय नहीं रहता। रोग और उनके उपसर्ग नष्ट होजाते हैं। पंचमी, दशमी, पूर्णिमा को सदैव पाठ करने वाला सौवर्षतक जीवित बना रहता है और वह बलवान् तथा तेजस्वी होकर उत्तम कल्याण को प्राप्त करता है। तीनो प्रकार के पाप, जो मन तथा वचन से हुए हों, नष्ट होजाते हैं। अभिचारादि अथर्वण के कर्म नष्ट हो जाते हैं। दुःस्वप्नों का फल नष्ट होता है। दुश्चिन्तायें दूर होती हैं; पुण्य की वृद्धि होती है तथा सभी विघ्न नष्ट होते हैं। इति॥

अथ वेदसार शिवस्तवः - "पशूनां पतिं पापनाशं परेशं, गजेन्द्रस्य कृत्तिं वसानं वरेण्यम्। जटाजूटमध्ये स्फुरद्गाङ्गवारिं, महादेवमेकं स्मरामिम् स्मरामिम् ॥१॥ महेशं सुरेशं सुरारातिनाशं, विभुं विश्वनाथं विभूत्यङ्गभूषम्। विरूपाक्षमिन्द्वर्कवह्नित्रिनेत्रं, सदानन्दमीडे प्रभुं पञ्चवक्त्रम् ॥२॥ गिरी-शं गणेशं गले नीलवर्णं, गवेन्द्राधिरूढं गणातीतरूपम्। भवं भास्वरं भस्मना भूषिताङ्गं, भवानी कलत्रं भजे पञ्चवक्त्रम् ॥३॥ शिवाकान्त शम्भो शशाङ्कार्धमौले, महेशान शूलिन् जटाजूटधारिन्।

त्वमेको जगद्व्यापको विश्वरूप, प्रसीद प्रसीद प्रभो
पूर्णरूप ॥४॥ परात्मानमेकं जगद्बीजमाद्यं, निरीहं
निराकारमोङ्कारवेद्यम् । यतो जायते पाल्यते येन
विश्वं, तमीशं भजे लीयते यत्र विश्वम् ॥५॥ न
भूमिर्न चापो न वह्निर्न वायुर्न चाकाशमास्ते न तन्द्रा
न निद्रा । न ग्रीष्मो न शीतं न देशो न वेषो न
यस्यास्ति मूर्तिं स्त्रिमूर्तिं तमीडे ॥६॥ अजं शाश्वतं
कारणं कारणानां शिवं केवलं भासकं भासकानाम् ।
तुरीयं तमः पारमाद्यन्तहीनं, प्रपद्ये परं पावनं द्वैत
हीनम् ॥७॥ नमस्ते नमस्ते विभो विश्वमूर्ते, नमस्ते
नमस्ते चिदानन्दमूर्ते । नमस्ते नमस्ते तपोयोगगम्य
नमस्ते नमस्ते श्रुतिज्ञानगम्य ॥८॥ प्रभो शूलपाणे
विभो विश्वनाथ, महादेव शम्भो महेश त्रिनेत्र ।
शिवाकान्त शान्त स्मरारे पुरारे, त्वदन्यो वरेण्यो
न मान्यो न गण्यः ॥९॥ शम्भो महेश करुणामय
शूलपाणे, गौरीपते पशुपते पशुपाशनाशिन् । काशी
पते करुणया जगदेतदेकस्त्वं हंसि पासि विदधासि

श्री कार्तवीर्य पूजन यन्त्र

महेश्वरोऽसि ॥ १०॥ त्वत्तो जगद्भवति देव भव स्मरारे, त्वय्येव तिष्ठति जगन्मृड विश्वनाथ। त्वय्येव गच्छति लयं जगदेतदीश, लिङ्गात्मकं हर चराचरविश्वरूपिन् ॥ ११॥

॥ इति श्रीमच्छङ्कराचार्यकृतो वेदसारशिवस्तवः सम्पूर्णः ॥

फलश्रुति- इस 'शिवस्तव' का नित्य-पाठ करने से समस्त मनोभिलाषाओं की पूर्ति होती है।

अथ सूर्य स्तोत्राणि- अब भगवान् सूर्य से सम्बन्धित स्तोत्रादि का उल्लेख किया जाता है।

श्री सूर्यस्य प्रातः स्मरणम्- "प्रातः स्मरामि खलु तत्सवितुर्वरेण्यं, रूपं हि मण्डलमृचोऽथ तनुर्यजूंषि। सामानि यस्य किरणाः प्रभवादिहेतुं, ब्रह्माहरात्मकमलक्ष्यमचिन्त्यरूपम् ॥ १॥ प्रातर्नमामि तरणिं तनुवाङ्मनोभिर्ब्रह्मेन्द्रपूर्वकसुरैर्नतमर्चितं च। वृष्टिप्रमोचनविनिग्रहहेतुभूतं, त्रैलोक्यपालनपरं त्रिगुणात्मकं च ॥ २॥ प्रातर्भजामि सवितारमनन्तशक्तिं, पापौघशत्रुभयरोगहरं परं च। तं सर्वलोककलनात्मककालमूर्तिं, गोकण्ठबन्धनविमोचनमादिदेवम् ॥ ३॥

श्लोकत्रयमिदं भानोः प्रातःकाले पठेत्तु यः। स सर्वव्याधिनिर्मुक्तः परं सुखमवाप्नुयात्॥ इति श्री सूर्य प्रातः स्मरणम् ॥

फलश्रुतिः- जो व्यक्ति नित्य प्रातः काल उक्त तीनों श्लोकों का पाठ करता है, वह समस्त व्याधियों (रोगों) से छुटकारा पाकर, सुख प्राप्त करता है।

श्री सूर्याष्टकम्- "आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर। दिवाकर नमस्तुभ्यं प्रभा-

कर नमोऽस्तुते ॥१॥ सप्ताश्वरथमारूढं प्रचण्डं कश्यपात्मजम्। श्वेतपद्मधरं देवं तं सूर्यं प्रणमाम्य-
हम् ॥२॥ लोहितं रथमारूढं सर्वलोकपितामहम्। महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥३॥ त्रैगु-
ण्यं च महाशूरं ब्रह्माविष्णुमहेश्वरम्। महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥४॥ बृंहितं तेजःपुञ्जं
च वायुमाकाशमेव च। प्रभुं च सर्वलोकानां तं सूर्यं प्रणमाम्यहम् ॥५॥ बन्धूकपुष्पसंकाशं हारकु-
ण्डलभूषितम्। एकचक्रधरं देवं तं सूर्यं प्रणमाम्यहम् ॥६॥ तं सूर्यं जगत्कर्तारं महातेजः प्रदीपनम्।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥७॥ तं सूर्यं जगतां नाथं ज्ञान विज्ञान मोक्षदम्। महापापहरं
देवं तं सूर्यं प्रणमाम्यहम् ॥८॥ इति श्रीशिवप्रोक्तं सूर्याष्टकं सम्पूर्णम् ॥

फलश्रुतिः - इस अष्टक का नित्य पाठ करते रहने से रोगों से छुटकारा मिलता है तथा बल, वीर्य, तेज, कान्ति एवं बुद्धि आदि की वृद्धि होती है।

अथ सूर्यमण्डलाष्टकम् - " नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे। त्रयी-
मयाय त्रिगुणात्मधारिणे विरञ्चिनारायणशङ्करात्मने ॥१॥ यन्मण्डलं दीप्तिकरं विशालं रत्नप्रभं तीव्रमनादि-
रूपम्। दारिद्र्यदुःखक्षयकारणं च पुनातु मां तत्सवितुर्वरेण्यम् ॥२॥ यन्मण्डलं देवगणैः सुपूजितं विप्रैः
स्तुतं भावनमुक्तिकोविदम्। तं देवदेवं प्रणमामि सूर्यं पुनातु मां तत्सवितुर्वरेण्यम् ॥३॥ यन्मण्डलं
ज्ञानघनं त्वगम्यं त्रैलोक्यपूज्यं त्रिगुणात्मरूपम्। समस्ततेजोमयदिव्यरूपं पुनातु मां तत्सवितुर्वरेण्य-
म् ॥४॥ यन्मण्डलं गूढमतिप्रबोधं धर्मस्य वृद्धिं कुरुते जनानाम्। यत्सर्वपापक्षयकारणं च पुनातु
मां तत्सवितुर्वरेण्यम् ॥५॥ यन्मण्डलं व्याधिविनाशदक्षं यदृग्यजुःसामसु संप्रगीतम्। प्रकाशितं येन

च भूर्भुवः स्वः पुनातु मां तत्सवितुर्वरेण्यम् ॥ ६॥ यन्मण्डलं
वेदविदो वदन्ति गायन्ति यच्चारणसिद्धसंघाः। यद्यो-
गिनो योगजुषां च संघाः पुनातु मां तत्सवितुर्वरेण्यम्
॥७॥ यन्मण्डलं सर्वजनेषु पूजितं ज्योतिश्च कुर्यादिह
मर्त्यलोके। यत्कालकल्पक्षयकारणं च पुनातु मां
तत्सवितुर्वरेण्यम् ॥८॥ यन्मण्डलं विश्वसृजां प्रसिद्ध
मुत्पत्ति रक्षा प्रलय प्रगल्भम्। यस्मिञ्जगत्संहरतेऽखि
लञ्च पुनातु मां तत्सवितुर्वरेण्यम् ॥९॥ यन्मण्डलं
सर्वगतस्य विष्णोरात्मा परं धाम विशुद्ध तत्त्वम्।
सूक्ष्मान्तरैर्योगपथानुगम्यं पुनातु मां तत्सवितुर्वरे-
ण्यम् ॥१०॥ यन्मण्डलं वेदविदो वदन्ति गायन्ति
तच्चारणसिद्धसंघाः। यन्मण्डलं वेदविदः स्मरन्ति
पुनातु मां तत्सवितुर्वरेण्यम् ॥११॥ यन्मण्डलं वेद-
विदोपगीतं यद्योगिनां योगपथानुगम्यम्। तत्सर्व
वेदं प्रणमामि सूर्यं पुनातु मां तत्सवितुर्वरेण्यम् ॥१२॥
मण्डलाष्टतयं पुण्यं यः पठेत्सततं नरः। सर्वपापविशु-
द्धात्मा सूर्यलोके महीयते ॥१३॥ इति सम्पूर्णम् ॥

श्री सूर्य पूजन यन्त्र

मं० मं० २३८

भा० टी०

अथ श्री हनुमत् स्तोत्राणि : अब श्री हनुमानजी के स्तोत्रादि का उल्लेख किया जाता है।

एकमुखि हनुमत्कवचम् - "एकदा सुखमासीनं शङ्करं लोक शङ्करम्। पप्रच्छ गिरिजा कान्तं कर्पूरं धवलं शिवम् ॥१॥ पार्वत्युवाच॥ भगवन् देवदेवेश लोकनाथ जगद्गुरो। शोकाऽकुलानां लोकानां केन रक्षा भवेद् ध्रुवम् ॥२॥ संग्रामे सङ्कटे घोरे भूतप्रेतादिके भये। दुःखदावाग्नि सन्तप्त: चेतसां दुःख भोगिनाम् ॥३॥ ईश्वर उवाच॥ शृणुदेवि प्रवक्ष्यामि लोकानां हितकाम्यया। विभीषणाय रामेण प्रेम्णा दत्तं च यत्पुरा ॥४॥ कवचं कपिनाथस्य वायुपुत्रस्य धीमत:। गुह्यं ते संप्रवक्ष्यामि विशेषाच्छृणु सुन्दरि ॥५॥

अथ कवचारम्भ: ॥ ॐ अस्य श्री हनुमत्कवच स्तोत्र मन्त्रस्य श्रीरामचन्द्र: ऋषि:। अनुष्टुप् छन्द:। श्रीमहावीरो हनुमान देवता। मारुतात्मज इति बीजम्। ॐ अञ्जनीसूनुरिति शक्ति:। ॐ ह्रैं ह्रीं ह्रौं इति कवचम्। ॐ स्वाहा इति कीलकम्। ॐ लक्ष्मण प्राणदाता इति अपर बीजम्। मम सकल कार्य सिद्ध्यर्थं जपे विनियोग: ॥

अथ न्यास: - ॐ ह्रां अङ्गुष्ठाभ्यां नम:। ॐ ह्रीं तर्जनीभ्यां नम:। ॐ ह्रूँ मध्यमाभ्यां नम:। ॐ ह्रैं अनामिकाभ्यां नम:। ॐ ह्रौं कनिष्ठिकाभ्यां नम:। ॐ ह्र: करतलकरपृष्ठाभ्यां नम:। ॐ अञ्जनी सूनवे हृदयाय नम:। ॐ रुद्रमूर्तये शिरसे स्वाहा। ॐ वायुसुतात्मने शिखायै वषट्। ॐ वज्रदेहाय कवचाय हुम्। ॐ रामदूताय नेत्र त्रयाय वौषट्। ॐ ब्रह्मास्त्र निवारणाय अस्त्राय फट्। रामदूताय विद्महे कपिराजाय धीमहि तन्नो हनुमान प्रचोदयात्। ॐ हुं फट् इति दिग्बन्ध:।

श्रीहनुमत् पूजन यन्त्र

अथ ध्यानम् - ध्यायेद्बाल दिवाकरं द्युतिनिभं देवारि दर्पापहं। देवेन्द्रं प्रमुखं प्रशस्त यशसं दैदीप्यमानं रुचा॥ सुग्रीवादि समस्त वानरयुतं सुव्यक्त तत्त्वप्रियं। संरक्तारुण लोचनं पवनजं पीताम्बरालंकृतम् ॥ १॥ उद्यन्मार्तण्ड कोटिं प्रकट रुचि युतं चारु वीरासनस्थम्। मौञ्जी यज्ञोपवीतारुण रुचिर शिखा शोभितं कुण्डलाङ्कम् ॥ भक्तानामिष्टदं तं प्रणत मुनिजनं वेदनादं प्रमोदम्। ध्यायेद्देवं विधेयं प्लवग कुलपतिं गोष्पदी भूत जलधिम् ॥ २॥ वज्राङ्गं पिङ्ग केशाढ्यं स्वर्ण कुण्डल मण्डितम्। नियुद्ध कर्म कुशलं पारावार पराक्रमम् ॥ ३॥ वामहस्ते महावृक्षं दशास्य कर खण्डनम्। उद्य दक्षिण दोर्दण्डं हनुमन्तं विचिन्तयेत् ॥ ४॥ स्फटिकाभं स्वर्ण कान्तिं द्विभुजं च कृताञ्जलिम्। कुण्डल द्वय संशोभि मुखाम्भोजं हरिं भजेत् ॥ ५॥ उद्यदादित्य संकाश मुदार भुज विक्रमम्। कन्दर्प कोटि लावण्यं सर्व विद्या विशारदम् ॥ ६॥ श्रीराम हृदयानन्दं भक्तकल्प महीरुहम्। अभयं वरदं दोर्भ्यां

कलये मारुतात्मजम् ॥७॥ अपराजित नमस्ते ऽस्तु नमस्ते राम पूजिते। प्रस्थानं च करिष्यामि सिद्धिर्भवतु मे सदा॥८॥ यो वारांनिधिमल्पपल्वलमिवो ल्लंघ्य प्रतापान्वितो। वैदेहीघन शोक ताप हरणो वैकुण्ठ तत्त्व प्रियः॥ अक्षाद्युर्जित राक्षसेश्वर महादर्पापहारी रणे। सोऽयं वानर पुङ्गवोऽवतु सदा युष्मान् समीरात्मजः॥९॥ वज्राङ्गं पिङ्गकेशं कनकमयलसत्कुण्डलाकान्त गण्डं। नाना विद्याधिनाथं करतल विधृतं पूर्ण कुम्भं दृढं च॥ भक्ताभीष्टाधिकारं वितरति च सदा सर्वदा सुप्रसन्नं। त्रैलोक्यं त्राणकारं सकल भुवनगं रामदूतं नमामि॥१०॥ उद्यल्लाङ्गूल केशं प्रलय जलधरं भीममूर्तिं कपीन्द्रम्। वन्दे रामाङ्घ्रि पद्म भ्रमर परिवृतं तत्त्व सारं प्रसन्नम्॥ वज्राङ्गं वज्ररूपं कनकमयलसत्कुण्डलाक्रान्त गण्डम्। दम्भोलिस्तम्भ सारं प्रहरण विकटं भूतरक्षोऽधिनाथम्॥११॥ वामे करे वैरिभयं वहंतं शैलं च दक्षे निजकण्ठलग्नम्। दधानमासाद्य सुवर्ण वर्णं भजेज्ज्वलत्कुण्डल रामदूतम्॥१२॥ पद्मरागमणि कुंडलत्विषा पाटलीकृत कपोल मण्डलम्। दिव्य देवकदली वनान्तरे भावयामि पवमाननन्दनम्॥१३॥ ईश्वर उवाच॥ इति वदति विशेषाद्राघवो राक्षसेन्द्रं प्रमुदित वरचित्तो रावणस्यानुजो हि। रघुवर वरदूतं पूजयामास भूपः स्तुतिभिरतिकृतार्थं स्वं परंमन्यमानः॥१४॥

प्रार्थना- वन्दे विद्युद्वलय सुभगं स्वर्ण यज्ञोपवीतं, कर्ण द्वन्द्वे कनक रुचिरे कुण्डले धारयन्तं। उच्चैर्हृष्यद्द्युमणि किरणश्रेणि संभाविताङ्गं, सत्कौपीनं कपिवरवृतं कामरूपं कपीन्द्रम्॥१॥ मनोजवं मारुत तुल्य वेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम्। वातात्मजं वानरयूथ मुख्यं श्रीरामदूतं शरणं प्रपद्ये॥२॥

प्रार्थना के पश्चात आगे लिखे अनुसार अङ्गन्यास करना चाहिए।

अग्नि पूजन यन्त्र

अथाङ्गन्यासः

अङ्गन्यास विधि – "ॐ नमो भगवते हृदयाय नमः। ॐ आञ्जनेयाय शिरसे स्वाहा। ॐ रुद्रमूर्त्तये शिखायै वषट्। ॐ रामदूताय कवचाय हुम्। ॐ हनुमते नेत्रत्रयाय वौषट्। ॐ अग्निगर्भाय अस्त्राय फट्।

ॐ नमो भगवते अङ्गुष्ठाभ्यां नमः। ॐ आञ्जनेयाय तर्जनीभ्यां नमः। ॐ रुद्रमूर्त्तये मध्यमाभ्यां नमः। ॐ हनुमते कनिष्ठिकाभ्यां नमः। ॐ अग्निगर्भाय करतलकरपृष्ठाभ्यां नमः।

अथ मन्त्रः – ॐ ऐं ह्रीं श्रीं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः। ॐ ह्रीं ह्रौं ॐ नमो भगवते महाबल पराक्रमाय भूत प्रेत पिशाच शाकिनी डाकिनी यक्षिणी पूतना महामारी यक्ष राक्षस भैरव बैताल राक्षसादिकं क्षणेन हन हन भञ्जय भञ्जय मारय मारय शिक्षय शिक्षय महामहेश्वर रुद्रावतार हुं फट् स्वाहा।

ॐ नमो भगवते हनुमदाख्याय रुद्राय सर्व दुष्टवचनमुख स्तम्भनं कुरु कुरु ह्रीं ह्रीं ह्रूं ह्रूं ठं ठं ठं फट् स्वाहा। ॐ नमो भगवते अञ्जनीगर्भ सम्भूताय रामलक्ष्मण नन्दनाय कपि सैन्य प्रकाशनाय पर्वतोत्पाटनाय कुमार सुग्रीव कर्म साधनाय दुष्टकर्णोच्चाटनाय कुमार ब्रह्मचारिणे गम्भीर शब्दोदयाय॥ ॐ ह्रां ह्रीं ह्रूं सर्व दुष्ट निवारणाय स्वाहा। ॐ नमो हनुमते सर्व ग्रहान् भूतभविष्यद्वर्तमानवन्दूर स्थानान् समीपस्थान सर्वकाल दुष्ट दुर्बुद्धीन् उच्चाटय उच्चाटय पर बलानि क्षोभय क्षोभय मम सर्व कार्य साधय साधय हनुमते ॐ ह्रां ह्रीं ह्रूं फट् देहि ॐ शिवम् ॐ सिद्धं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ॐ स्वाहा।

ॐ नमो हनुमते परकृत यन्त्र मन्त्र पराहंकार भूत प्रेत पिशाच परदृष्टि सर्व विघ्न दुर्जन चेटक विद्या सर्व ग्रहान् निवारय निवारय वध वध पच पच दल दल कीलय कीलय सर्व कुयन्त्राणि दुष्टवाचं फट् स्वाहा।

ॐ नमो हनुमते पाहि पाहि एहि एहि सर्व ग्रह भूतानां शाकिनी डाकिनीनां दुष्टानां सर्व विषयान् आकर्षय आकर्षय मर्दय मर्दय भेदय भेदय मृत्युमुत्पाटय उत्पाटय शोषय शोषय ज्वल ज्वल प्रज्वल प्रज्वल भूत मंडल निरसय निरसय भूतज्वर प्रेतज्वर तृतीयक चातुर्थिक ज्वर विषमज्वर माहेश्वर ज्वरान् छिन्धि छिन्धि भिन्धि भिन्धि अक्षिशूल वक्षःशूल शिरोऽभ्यन्तर शूल गुल्मशूल पित्तशूल ब्रह्म राक्षस कुल परकुल नागकुल विषं नाशय नाशय निर्विघ्नं कुरु कुरु फट्॥

ॐ ह्रीं सर्व दुष्ट ग्रहान्निवारय स्वाहा। ॐ नमो हनुमते पवनपुत्राय वैश्वानर

मुखाय हन हन अनया दृष्ट्या पापदृष्टिं षण्ढदृष्टिं हन हन हनुमदाज्ञया स्फुर स्फुर स्वाहा ॥

श्रीरामचन्द्र उवाच ॥ हनुमान् पूर्वत: पातु दक्षिणे पवनात्मजः । पातु प्रतीच्यां रक्षोघ्न: पातु सागर पारग: ॥ १ ॥ उदीच्यामूर्ध्वग: पातु केसरी प्रिय नन्दन: । अधस्ताद्विष्णु भक्तस्तु पातु मध्ये च पावनि: ॥२॥ अवान्तर दिश: पातु सीता शोक विनाशन: । लंका विदाहक: पातु सर्वापद्भ्यो निरन्तरम् ॥३॥ सुग्रीव सचिव: पातु मस्तकं वायुनन्दन: । भालं पातु महावीरो भ्रुवोर्मध्ये निरन्तरम् ॥ ४ ॥ नेत्रे छायापहारी च पातुन: प्लवगेश्वर: । कपोलौ कर्णमूले तु पातु श्रीरामकिङ्कर: ॥ ५ ॥ नासाग्रं मञ्जनी सूनुर्वक्त्रं पातु हरीश्वर: । वाचां रुद्रप्रिय: पातु जिह्वां पिङ्गल लोचन: ॥ ६ ॥ पातु दन्तान्फाल्गुनेष्टश्चिबुकं दैत्य प्राणहृत् । पातु कण्ठञ्च दैत्यारि: स्कन्धौ पातु सुरार्चित: ॥ ७ ॥ भुजौ पातु महातेजा: करौ च चरणायुध: । नखान्नखायुध: पातु कुक्षिं पातु कपीश्वर: ॥ ८ ॥ वक्षो मुद्रापहारी च पातु पार्श्वे भुजायुध: । लङ्काविभंजन: पातु पृष्ठदेशे निरन्तरम् ॥ ९ ॥ नाभिं च रामदूतोऽसौ कटिं पात्वनिलात्मज: । गुह्यं पातु महाप्रज्ञ: सक्थिनी च शिवप्रिय: ॥ १० ॥ ऊरू च जानुनी पातु लङ्काप्रासाद भञ्जन: । जंघे पातु महाबाहुर्गुल्फौ पातु महाबली ॥ ११ ॥ अबलोद्धारक: पातु पदौ भास्कर सन्निभ: । पदान्ते सर्व सत्वाढ्य: पातु पादाङ्गुलीस्तथा ॥ १२ ॥ सर्वाङ्गानि महावीर: पातु रोमाणि चात्मवान् । हनुमत्कवचं यस्तु पठेद्विद्वान् विचक्षण: ॥ १३ ॥ स एव पुरुष: श्रेष्ठो भुक्तिं मुक्तिञ्च विन्दति । त्रिकालमेक कालं वा पठेन्मासत्रयं सदा ॥ १४ ॥ सर्वान् रिपून् क्षणे जित्वा स पुमाञ्छ्रियमाप्नुयात् । अर्द्धरात्रौ जले स्थित्वा सप्तवारं पठेद्यदि ॥ १५ ॥ क्षयापस्मार कुष्ठादि ताप त्रय निवारणम् । अर्कवारेऽश्व-

त्थ मूले स्थित्वा पठति य: पुमान् ॥२६॥ अचलां श्रियमाप्नोति संग्रामे विजयी भवेत् ॥२७॥
य: करे धारयेन्नित्यं स पुमान् श्रियमाप्नुयात्। विवाहे दिव्य काले च द्यूते राजकुले रणे ॥२८॥
भूत प्रेत महादुर्गे रणे सागर संप्लवे दशवारं पठेद्रात्रौ मिताहारो जितेन्द्रिय: ॥२९॥ विजयं
लभते लोके मानवेषु नराधिप:। सिंह व्याघ्र भये चोग्रे शरशस्त्रास्त्र पातने ॥३०॥ शृंखला बन्धने
चैव काराग्रहण कारणे। क्रोधस्तम्भे वह्नि दाहे गात्र रोगे च दारुणे ॥३१॥ शोके महारणे चैव ब्रह्मग्रह
विनाशिने। सर्वदा तु पठेन्नित्यं जयमाप्नोत्य संशय: ॥३२॥ भूर्जेषु वसने रक्ते क्षौमे वा तालपत्रके।
त्रिगंधेनाथवा मस्या लिखित्वा धारयेन्नर: ॥३३॥ पञ्चसप्तत्रिलोहैर्वा गोपितं कवचं शुभम्।
गले वा बाहुमूले वा कण्ठे शिरसि धारितम् ॥३४॥ सर्वान् कामानवाप्नोति सत्यं श्रीराम भाषितम्॥
२५॥ उल्लंघ्य सिन्धो: सलिलं सलीलं य: शोक वह्निं जनकात्मजाया:। आदाय तेनैव ददाह लङ्कां
नमामि तं प्राञ्जलिराञ्जनेयम् ॥२६॥

ॐ श्री हनुमानंजनी सूनुर्वायुपुत्रो महाबला:। श्री रामेष्ट: फाल्गुन सख: पिङ्गाक्षोऽ
मितविक्रम: ॥२७॥ उदधिक्रमणश्चैव सीताशोक विनाशन:। लक्ष्मण प्राणदाता च दशग्रीवस्य
दर्पहा ॥२८॥ द्वादशैतानि नामानि कपीन्द्रस्य महात्मन:। स्वापकाले प्रबोधे च यात्रा काले च य:
पठेत् ॥२९॥ तस्य सर्व भयं नास्ति रणे च विजयी भवेत्। धन धान्यं भवेत्तस्य दु:खं नैव
कदाचन ॥३०॥" इति एकमुखि हनुमत्कवचं सम्पूर्णम्॥

फलश्रुति: उक्त 'श्री एकमुखि हनुमत्कवच' का नित्य पाठ करते रहने से साधक
की समस्त कामनाएं पूर्ण होती हैं तथा सब प्रकार के कष्ट-भय दूर होते हैं।

अथ श्रीपञ्चमुखिहनुमत्कवचम् -

श्रीमन्मथारि सूनवे नमः। ॐ अस्य श्रीपञ्चमुखि हनुमत्कवच स्तोत्र मन्त्रस्य ब्रह्मा ऋषिर्गायत्री छन्दः। श्री हनुमान् देवता। रां बीजम्। मं शक्तिः चन्द्र इति कीलकम्। ॐ सौं कवचाय हुम्। ह्रौं अस्त्राय फट्। इति पञ्चमुखि हनुमत्कवचस्य पाठे विनियोगः।

ईश्वर उवाच॥ अथ ध्यानं प्रवक्ष्यामि श्रृणु सर्वाङ्ग सुन्दरम्। यत्कृतं देव देवेशि ध्यानं हनुमतः प्रियम् ॥१॥ पञ्चवक्त्रं महाभीमं कपियूथ समन्वितम्। बाहुभिर्दशभिर्युक्तं सर्व कामार्थ सिद्धिदम् ॥२॥ पूर्वं तु वानरं वक्त्रं कोटि सूर्य सम प्रभम्। दंष्ट्रा कराल वदनं भ्रुकुटीकुटिलेक्षणम् ॥३॥ अस्यैव दक्षिणं वक्त्रं नारसिंहं महाद्भुतम्। अत्युग्र तेजो वपुषं भीषणं भयनाशनम् ॥४॥ पश्चिमे गारुडं वक्त्रं वक्रतुण्ड महाबलम्। सर्वनाग प्रशमनं सर्व भूतादि कृन्तनम्॥५॥ उत्तरे सूकरं वक्त्रं कृष्णदीप्तं नभोमयं। पाताले सिद्ध वेतालं ज्वररोगादि कृन्तनम् ॥६॥ ऊर्ध्वं हयाननं घोरं दानवान्तं करं परम्। येन वक्त्रेण विप्रेन्द्र ताटकाया महाहवे ॥७॥ दुर्गतेश्शरणं तस्य सर्व शत्रु हरं परम्। ध्यात्वा पञ्चमुखं रुद्रं हनुमन्तं दयानिधिम् ॥८॥ खड्गं त्रिशूलं खट्वाङ्गं पाशमङ्कुश पर्वतम्। मुष्टौ तु मौदकौ वृक्ष धारयन्तं कमण्डलुम् ॥९॥ भिन्दिपालं ज्ञानमुद्रां दशमं मुनिपुङ्गवम्। एतान्यायुध जालानि धारयन्तं भयापहम् ॥१०॥ दिव्य मालाम्बरधरं दिव्य गन्धानुलेपनम्। सर्वैश्वर्यमयं देवं हनुमद्विश्वतो मुखम् ॥११॥ पञ्चास्यमच्युतमनेक विचित्र वर्णं, वक्त्रं सशङ्खविभृतं कपिराजवर्यम्। पीताम्बरादि मुकुटै रपि शोभमानं, पिङ्गाक्षमञ्जनिसुतं ह्यनिशं स्मरामि ॥१२॥ मर्कटस्य महोत्साहं सर्व शोक विनाशनम्। शत्रु

संहारकं चैतत् कवचं ह्यापदं हरेत् ॥१३॥

ॐ हरिमर्कट मर्कटाय स्वाहा ॥१४॥

ॐ नमो भगवते पञ्चवदनाय पूर्वे कपिमु-
खाय सकल शत्रु संहारणाय स्वाहा ॥१५॥

ॐ नमो भगवते पञ्चवदनाय उत्तरे आदि
वाराह मुखाय सकल सम्पत्कराय स्वाहा ॥१६॥

ॐ नमो भगवते पञ्चवदनाय दक्षिणे
नारसिंह मुखाय सकल दुःख विनाशनाय स्वाहा ॥१७॥

ॐ नमो भगवते पञ्चवदनाय पश्चिमे
गारुड़ मुखाय सकल रुज हराय स्वाहा ॥१८॥

ॐ नमो भगवते पञ्चवदनाय ऊर्ध्वे
हयग्रीव मुखाय सकल जन वश्य कराय स्वाहा ॥१९॥

इसके पश्चात् निम्न लिखित मन्त्र को पढ़ने
से पूर्व हाथ में जल लेकर विनियोग करे –

'ॐ अस्य श्री पञ्चमुखि हनुमत्कवच
स्तोत्र मन्त्रस्य श्री रामचन्द्र ऋषिरनुष्टुप छन्दः

श्रीराम पूजन यन्त्र

श्रीरामचन्द्र देवता सीतेति बीजम् । हनुमानिति शक्तिः । हनुमत्प्रीत्यर्थे जपे विनियोगः ॥"

उक्त मन्त्र का उच्चारण कर, थोड़ा सा जल भूमि पर डाल दें । फिर इसी प्रकार निम्नलिखित विनियोग करें -

"पुनर्हनुमानिति बीजम् । ॐ वायु पुत्राय इति शक्तिः । अञ्जनी सुतायेति कीलकम् । श्रीराम चन्द्र वरप्रसाद सिद्ध्यर्थे जपे विनियोगः ।"

इस विनियोग का उच्चारण करके पात्र में जल छोड़ दें ।

अथ न्यासः - अब निम्नानुसार न्यास करें -

"ॐ हं हनुमते अंगुष्ठाभ्यां नमः। ॐ वं वायु पुत्राय तर्जनीभ्यां नमः । ॐ अं अंजनी सुताय मध्यमाभ्यां नमः । ॐ रां रामदूताय अनामिकाभ्यां नमः। ॐ रुं रुद्रमूर्त्तये कनिष्ठिकाभ्यां नमः। ॐ सीता शोक निवारणाय करतल करपृष्ठाभ्यां नमः ।

ॐ अंजनी सुताय हृदयाय नमः । ॐ रुद्रमूर्तये शिरसे स्वाहा । ॐ रामदूताय नेत्रत्रयाय वौषट् । ॐ पञ्चमुखि हनुमते अस्त्राय फट् ।"

उक्त वाक्यों से न्यास करने के उपरान्त निम्नलिखित मन्त्र का उच्चारण करते हुए पुनः विनियोग करें तथा अन्त में जल पात्र में छोड़ दें -

अथ विनियोगः - "श्री रामदूताय आञ्जनेयाय वायुपुत्राय महाबलाय सीता शोक

निवारणाय महाबल प्रचण्डाय लङ्कापुरी दहनाय फाल्गुण सखाय कोलाहल सकल ब्रह्माण्ड विश्वरूपाय सप्त समुद्र निरन्तर लंघिताय पिङ्गल नयनामित विक्रमाय सूर्य बिम्बफल सेवाधिष्ठित निराक्रमाय संजीवन्या अङ्गद लक्ष्मण महाकपिसैन्य प्राणदात्रौ दशग्रीव विध्वंसनाय रामेष्टाय सीता सह रामचन्द्र वर प्रसादाय षट् प्रयोगागम पञ्चमुखि हनुमन्मन्त्र जपे विनियोगः।"

"ॐ हरि मर्कट मर्कटाय स्वाहा। ॐ हरि मर्कट मर्कटाय वं वं वं वं वं स्वाहा। ॐ हरि मर्कट मर्कटाय फं फं फं फं फं फट् स्वाहा।।" इति पूर्वे।

उक्त मन्त्र पढ़कर पूर्व दिशा में अक्षत छोड़ें।

"ॐ हरि मर्कट मर्कटाय खं खं खं खं खं मारणाय स्वाहा। ॐ हरि मर्कट मर्कटाय ठं ठं ठं ठं ठं स्तम्भनाय स्वाहा।।" इति दक्षिणे।।

उक्त मन्त्र पढ़कर दक्षिण दिशा में चावल छोड़ें।

"ॐ हरि मर्कट मर्कटाय डं डं डं डं डं आकर्षणाय सकल सम्पत्कराय पञ्चमुखि वीर हनुमते स्वाहा। ॐ उच्चाटने ढं ढं ढं ढं ढं कूर्ममूर्तये पञ्चमुखि हनुमते परयन्त्र परतन्त्रोच्चाटनाय स्वाहा।।" इति पश्चिमे।

उक्त मन्त्र पढ़कर पश्चिम दिशा में चावल छोड़ें।

"ॐ कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं क्षं स्वाहा।।" इत्युत्तरे।

उक्त मन्त्र पढ़कर उत्तर दिशा में चावल छोड़ें।

अथ दिग्बन्धः - निम्नलिखित मन्त्रों का उच्चारण करते हुए दिग्बन्ध करें -

" ॐ पूर्व कपि मुखे पञ्चमुखि हनुमते ठं ठं ठं ठं ठं सकल शत्रु संहारणाय स्वाहा॥ ॐ दक्षिणमुखे पञ्चमुखि हनुमते कराल वदनाय नरसिंहाय ह्रां ह्रां ह्रां ह्रां ह्रां सकल भूतप्रेत दमनाय स्वाहा। ॐ पश्चिम मुखे गरुड़ासनाय पञ्चमुखि वीर हनुमते मं मं मं मं मं सकल विषहराय स्वाहा। ॐ उत्तरमुखे आदि वीराहप लं लं लं लं लं नृसिंहाय नीलकण्ठाय पञ्चमुखि हनुमते स्वाहा॥ अंजनी सुताय वायु पुत्राय महाबलाय रामेष्ट फाल्गुण सखाय सीताशोक निवारणाय लक्ष्मणप्राण रक्षकाय कपि सैन्य प्रकाशाय दशग्रीवाभिमान दहनाय श्रीरामचनुचर प्रसादकाय महावीर्याय प्रथम ब्रह्माण्डनायकाय पञ्चमुखि हनुमते भूत प्रेत पिशाच ब्रह्मराक्षस शाकिनी डाकिनी अन्तरिक्ष ग्रह परमन्त्र पर यन्त्र परतन्त्र सर्वग्रहोच्चाटनाय सकल शत्रु संहारणाय पञ्चमुखि हनुमद्वरं प्रसादय सर्व रक्षकाय जं जं जं जं जं स्वाहा।

फलश्रुतिः - इदं कवचं पठयित्वा तु महा कवचं पठेन्नरः। एकवारं पठेन्नित्यं सर्वशत्रु निवारणम् ॥१८॥ द्विवारं तु पठेन्नित्यं सर्व शोक निवारणम्। त्रिवारं पठेते नित्यं सर्व सम्पत्करं परम् ॥१९॥ चतुर्वारं पठेन्नित्यं सर्व लोक वशीकरम्। पञ्चवारं पठेन्नित्यं सर्व रोग निवारणम् ॥२०॥ षड्वारं तु पठेन्नित्यं सर्व देव वशीकरम्। सप्तवारं पठेन्नित्यं सर्व कामार्थ सिद्धिदम्॥ अष्टवारं पठेन्नित्यं सर्व सौभाग्य दायकम्। नववारं पठेन्नित्यं सर्वैश्वर्य प्रदायकम् ॥२२॥ दशवारं पठेन्नित्यं त्रैलोक्य ज्ञान दर्शनम्। एकादशं पठेन्नित्यं सर्वसिद्धिं लभेन्नरः ॥२३॥ कवचं

स्मृति मात्रेण महालक्ष्मी फल प्रदम्। तस्माच्च प्रयता भाव्यं कार्यं हनुमत: प्रियम्॥" इति श्री पंचमुखि
हनुमत्कवचं समाप्तम्॥"

उक्त कवच का नित्य एक बार पाठ करने से शत्रु-नाश, दो बार करने से शोक-नाश, तीन
बार से सम्पत्ति-लाभ, चार बार से वशीकरण, पाँच बार से रोग-नाश, छै: बार से देव-वशीकरण, सात बार
से कामार्थ-सिद्धि, आठ बार से सौभाग्य, नौ बार से सर्वैश्वर्य, दस बार से त्रैलोक्य-ज्ञान-दर्शन, तथा ग्यारह
बार नित्य पाठ करने से सब प्रकार की सिद्धियों का लाभ होता है। इस कवच के स्मरण मात्र से ही फल
दायक महालक्ष्मी का लाभ होता है, अत: हनुमान् जी को प्रिय यह कवच नित्य पाठ के योग्य है॥ इति॥

श्री हनुमत् स्तोत्रम् : अब 'वीरविंशतिकाख्य श्री हनुमत्स्तोत्र' को लिखा जा रहा है,
इस स्तोत्र का नित्य पाठ करते रहने से साधक की समस्त कामनायें पूर्ण होती हैं।

"लाङ्गूल सृष्ट वियदम्बुधि मध्यमार्गमुत्प्लुत्य यान्तममरेन्द्रमुदो निदानम्। आस्फा-
लितस्वकभुज स्फुटिताद्रि काण्डं द्राङ् मैथिलीनयननन्दनमद्य वन्दे॥ १॥ मध्ये निशाचर महाभयदुर्विषि-
ह्यं घोराद्भुत व्रतमिदं यददश्चचार। पत्ये तदस्य बहुधापरिणामदूतं सीतापुरस्कृत तनुं हनुमन्त
मीडे॥ २॥ य: पादपङ्कजयुगं रघुनाथपत्न्या नैराश्य रूषित विरक्तमपि स्वरागै:। प्रागेव रागि
विदधे बहु वन्दमानो वन्देऽञ्जनाजनुषमेव विशेषतुष्ट्यै॥ ३॥ ताञ्जानकी विरह वेदन हेतुभूतान्
प्रागाकलय्य सदशोकवनीय वृक्षान्। लङ्कालकानिव घनानुदपाटयद्यस्तं हेमसुन्दरकपिं प्रणमामि
पुष्ट्यै॥ ४॥ घोष प्रतिध्वनित शैल गुहा सहस्र सम्भ्रान्तनादितवलन्मृगनाथ यूथम्। अक्षय क्षय क्षणविल

क्षितराक्षसेन्द्रमिन्द्रं कपीन्द्रपृतनावलयस्य वन्दे ॥५॥ हेलाविलङ्घितमहार्णवमप्यमन्दं चूर्णद्रुमदावितिविक्षत राक्षसेषु। स्वम्मोदवारिधिमपारमिवेक्षमाणं वन्देऽहमक्षयकुमारकमारकेशम् ॥६॥ जम्भारिजित्प्रसभलम्भित पाशबन्धं ब्रह्मानुरोधमिव तत्क्षणमुद्वहन्तम्। रौद्रावतारमपि रावणदीर्घदृष्टि सङ्कोचकारणमुदारहरिं भजामि ॥७॥ दर्पोन्नमन्निशिचरेश्वरमूर्धचञ्चत्कोटीरचुम्बि निजबिम्बमुदीक्ष्य हृष्टम्। पश्यन्तमात्मभुजयन्त्रणपिष्यमाणतत्कायशोणितनिपातमपेक्षि वक्षः ॥८॥ अक्षप्रमृत्यमरविक्रमवीरनाशा क्रोधादिव द्रुतमुदञ्चितचन्द्रहासाम्। निन्दापिताम्रघनगर्जनघोरघोषैः संस्तम्भयन्तमभिनौमि दशास्यमूर्तिम् ॥९॥ आशंस्यमानविजयं रघुनाथधाम संसन्तमात्मकृतभूरिपराक्रमेण। दौत्ये समागमसमन्वयमादिशन्तं वन्दे हरेः क्षितिभृतः पृतनाप्रधानम् ॥१०॥ यस्यौचितीं समुपदिष्टवतोऽधिपुच्छं दम्भान्वितां धियमपेक्ष्य विवर्धमानः। नक्तञ्चराधिपतिरोषहिरण्यरेता लङ्कां दिधक्षुरपतत्तमहं वृणोमि ॥११॥ क्रन्दन्निशाचरकुलां ज्वलनावलीढैः साक्षाद्गृहैरिव बहिः परिदेवमानाम्। स्तब्धस्वपुच्छतटलग्नकृपीटयोनिदन्दह्यमाननगरीं परिगाहमानाम् ॥१२॥ मूर्तैर्गृहासुभिरिव धुधुरं व्रजद्भिर्व्योम्नि क्षणं परिगतं पतगैर्ज्वलद्भिः। पीताम्बरं दधतमुच्छ्रितदीप्तिपुच्छं सेनां वहद्भिहगराजमिवाहमीडे ॥१३॥ स्तम्भीभवत्स्वगुरुबालधिलग्नवह्निज्वालोल्ललद्ध्वजपटामिव देवतुष्ट्यै, वन्दे यथोपरि पुरो दिवि दर्शयन्तमद्यैव रामविजयाजिकवैजयन्तीम् ॥१४॥ रक्षश्चयैकचितकल्पकपूश्चितौ यः सीताशुचो निजविलोकनतो मृतायाः। दाहं व्यधादिव तदन्त्यविधेयभूतं लाङ्गूलदत्तदहनेन मुदे स नोऽस्तु ॥१५॥ आशुक्षये रघुपतिप्रणयैकसाक्ष्ये वैदेहराजदुहितुः सरिदीश्वराय। न्यासं ददानमिव पावकमापतन्तमब्धौ प्रभञ्जनतनूजनुषं भजामि ॥१६॥ रक्षस्स्वतृप्ति

रुङ्शान्तिविशेषशोणमक्षक्षय क्षणविधानुमितात्मदाक्ष्यम् । भास्वत्प्रभातरविभानुभरावभासं लङ्काभय-ङ्करममुं भगवन्तमीडे ॥१७॥ तीर्त्वोदधिं जनकजापितमाप्य चूडारत्नं रिपोरपि पुरं परमस्य दग्ध्वा श्रीरामहर्षगलदश्रुचभिषिच्यमानं तं ब्रह्मचारिवरवानरमाश्रये ऽहम् ॥१८॥ यः प्राणवायु जनितो गिरिशस्य शान्तः शिष्योऽपि गौतमगुरुर्मुनि शङ्करात्मा । हव्यो हरस्य हरिजहरितां गतोऽपि धी धैर्य शास्त्रविभवेऽतुलमाश्रये तम् ॥१९॥ स्कन्धोऽधिवाह्य जगदुत्तरगीतिरीत्या यः पार्वतीप्रवर मतोषयदाशुतोषम् । तस्मादवाप च वरानपरानवाप्यान् तं वानरं परमवैष्णवमीश मीडे ॥२०॥ उमा पते कविपतेः स्तुतिर्वाल्पविजृम्भिता । हनूमतस्तुष्टये ऽस्तु वीरविंशतिकाभिधा ॥

॥इति श्री कविपत्युपनामकोमापति शर्मदेव द्विवेदि विरचितं वीरविंशतिकाख्यं श्री हनुमत्स्तोत्रं सम्पूर्णम्॥

श्री हनुमत् प्रार्थना :- अतुलित बलधामं हेमशैलाभ देहं, दनुज वन कृशानुं ज्ञानिनामग्रगण्यम् सकल गुणनिधानं वानराणामधीशं रघुपति वरदूतं वातजातं नमामि ॥१॥ अञ्जनिः गर्भसम्भूतो वायु-पुत्रो महाबलः । कुमारो ब्रह्मचारी च हनूमान् मे प्रतिष्ठिताम् ॥२॥ अंजनानन्दनं वीरं जानकीशोक नाशनम् । कपीशमक्षहन्तारं वन्दे लङ्का भयङ्करम् ॥३॥ मनोजवं मारुततुल्य वेगं, जितेन्द्रियं बुद्धिमतां वरिष्ठम् । वातात्मजं वानरयूथ मुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥४॥ तप्तचामीकरनिभं भीघ्नं संवि-हिताञ्जलिम् । चलत्कुण्डलदीप्तास्यं पद्माक्षं मारुतिं स्मरेत् ॥५॥ मर्कटेश महोत्साह सर्वशोक विनाशन । शत्रून् संहर मां रक्ष श्रियं दापय मे प्रभो ॥६॥ उल्लंघ्य सिन्धोः सलिलं सलीलम् यः शोकवह्निं जनकात्मजायाः । आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिराञ्जनेयम् ॥७॥

अथ भैरव स्तोत्राणि :- अब श्री भैरव के स्तोत्रादि का उल्लेख किया जाता है। श्री भैरव के अनेक रूप हैं तथा अनेक रूपों में उनकी उपासना भी की जाती है। उनमें बटुक भैरव तथा काल भैरव की उपासना मुख्य रूप से की जाती है। श्री भैरव के प्रमुख रूपों से सम्बन्धित विभिन्न स्तोत्र, कवचादि को यहाँ दिया जा रहा है।

श्री बटुक भैरव ध्यान मन्त्रा :- प्रणवं कामदं विद्याल्लज्जा बीजं च सिद्धिदम्। वटुकायेति विज्ञेयं महापातक नाशनम् ॥१॥ उद्यद्भास्कर सन्निभं त्रिनयनं रक्ताङ्गरागस्रजं, स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः। नीलग्रीवमुदार कौस्तुभधरं शीतांशु चूडोज्ज्व-लं, बंधूकारुण वाससं भयहरं देवं सदा भावयेत् ॥२॥ नमो भैरव रूपाय भैरवाय नमो नमः। नमो भद्रस्वरूपाय जगदाद्य नमो नमः ॥३॥ वन्दे बालं स्फटिक सदृशं कुण्डलोद्भासिताङ्गं, दिव्या कल्पैर्नवमणिमयैः किंकिणी नूपुराढ्यैः। दीप्ताकारं विशद वसनं सुप्रसन्नं त्रिनेत्रं, हस्ताग्राभ्यां बटुक सदृशं शूलदण्डौ दधानम् ॥४॥ कर कलित कपालः कुण्डली दण्डपाणिस्तरुण तिमिर नीलो व्याल यज्ञोपवीती। क्रतु समय सपर्या विघ्न विच्छेद हेतु, जयति बटुकनाथः सिद्धिदः साधकानाम् ॥५॥

श्री बटुक भैरव कवचम् :-- श्री महादेव उवाच॥ प्रीयतां भैरवो देवो नमो वै भैरवाय च। देवेशि देह रक्षार्थं कारणं कथ्यतां ध्रुवम् ॥१॥ म्रियंते साधका येन विना श्मशान भूमिषु। रणेषु चाति घोरेषु महामृत्यु भयेषु च ॥२॥ शृंगी सलिल वज्रेषु ज्वरादि व्याधि वह्निषु॥ देवेषु-

वाच॥ कथयामि शृणु प्राज्ञ बटुकं कवचं शुभं। गोपनीयं प्रयत्नेन मातृकाजारजो यथा ॥३॥

"ॐ अस्य श्री बटुक भैरव कवचस्य आनंद भैरव ऋषिः त्रिष्टुप् छन्दः श्रीबटुक भैरवो देवता वं बीजं हीं शक्तिः ॐ बटुकायेति कीलकम् ममाभीष्ट सिद्ध्यर्थे जपे विनियोगः॥

ॐ सहस्रारे महाचक्रे कर्पूरधवले गुरुः॥४॥ पातु मां बटुको देवो भैरवः सर्व कर्मसु। पूर्वस्यामसिताङ्गो मां दिशि रक्षतु सर्वदा॥५॥ आग्नेयां च रुरुः पातु दक्षिणे चण्डभैरवः। नैर्ऋत्यां क्रोधनः पातु उन्मत्तः पातु पश्चिमे॥६॥ वायव्यां मां कपाली च नित्यं पायात्सुरेश्वरः। भीषणो भैरवः पातु उत्तरस्यां तु सर्वदा॥७॥ संहार भैरवः पायादीशान्यां च महेश्वरः। ऊर्ध्वं पातु विधाता च पाताले नंदको विभुः॥८॥ सद्योजातस्तु मां पायात्सर्वतो देवसेवितः। वामदेवो वनांते च वने घोरस्तथाऽवतु च॥९॥ जले तत्पुरुषः पातु स्थले ईशान एव च। डाकिनी पुत्रकः पातु पुत्रान् मे सर्वतः प्रभुः॥१०॥ हाकिनी पुत्रकः पातु दारांस्तु लाकिनी सुतः। पातु शाकिनिका पुत्रः सैन्यं वै काल भैरवः॥११॥ मालिनी पुत्रकः पातु पशूनश्वान् गजांस्तथा। महाकालोऽवतु क्षेत्रं श्रियं मे सर्वतो गिरा॥१२॥ वाद्यं वाद्यप्रियः पातु भैरवी नित्यसम्पदा। एतत्कवचमीशान तव स्नेहात्प्रकाशितम्॥१३॥ नाख्येयं नरलोकेषु सारभूतं सुरप्रियम्। यस्मै कस्मै न दातव्यं कवचं सुरदुर्लभम्॥१४॥ न देयं परशिष्येभ्यः कृपणेभ्यश्च शङ्कर। यो ददाति निषिद्धेभ्यः सर्वभ्रष्टो भवेत्किल॥१५॥ अनेन कवचेनैव रक्षां कृत्वा विचक्षणः। विचरन्यत्र कुत्रापि न विघ्नैः परिभूयते॥१६॥ मन्त्रेण रक्षते योगी कवचं रक्षकं यतः। तस्मात्सर्व प्रयत्नेन दुर्लभं पापचेतसाम्॥१७॥ भूर्जे रम्भात्वचि वापि लिखित्वा विधिवत्प्रभो। कुंकुमेनाष्टगंधेन

श्री बटुक भैरव पूजन यन्त्र

गोरोचनैश्च केसरैः ॥१८॥ धारयेत्पाठयेद्वापि संपठेद्वापि नित्यशः। संप्राप्नोषि फलं सर्वं नात्र कार्याविचारणा ॥१९॥ सततं पठयेत् यत्र तत्र भैरव संस्थितीः। न शक्नोमि प्रभावं वै कवचस्यास्य वर्णितुम् ॥२०॥ नमो भैरव देवाय सर्वभूताय वै नमः। नमस्त्रैलोक्य नाथाय नाथानाथाय वै नमः ॥२१॥

॥ इति श्री भैरवतन्त्रे देवी रहस्योक्तं श्रीबटुक भैरव कवचम् समाप्तम् ॥

॥अथ श्री बटुक भैरव पञ्जर कवचम् ॥

पार्वत्युवाच॥ देवदेव महादेव संसार प्रियकारकः। पञ्जरं बटुकस्यास्य कथनीयं मम प्रभो॥

श्री शिव उवाच ॥ पूर्व भस्मासुरत्रासाद् भय विह्वलतां स्वयम्। पठनादेव मे प्राणा रक्षितः परमेश्वरि ॥२॥ सर्वदुष्ट विनाशाय सर्व रोग

निवारणम् । दुःखशांतिकरं देवि ह्यल्पमृत्यु भयापहम् ॥ ३॥ राजा वश्यकरं चैव त्रैलोक्य विजय प्रदम् । सर्वलोकेषु पूज्यश्च लक्ष्मीस्तस्य गृहे स्थिरा ॥ ४॥ अनुष्ठानं कृतं देवि पूजनं च दिने दिने विना पञ्जर पाठेन तत्सर्वं निष्फलं भवेत् ॥ ५॥

अस्य श्री बटुक भैरव पञ्जर कवच मन्त्रस्य कालाग्नि रुद्र ऋषिः। अनुष्टुप् छन्दः बटुक भैरवो देवता । ह्रां बीजं । ॐ भैरवी वल्लभा शक्तिः । ॐ दण्डपाणये नमः कीलकम् । मम सकल कामना सिद्ध्यर्थे जपे विनियोगः ॥ ६॥

ॐ ह्रां प्राच्यां डमरुहस्तो रक्तवर्णो महाबलः। प्रत्यक्ष महमीशान बटुकाय नमो नमः ॥ ७॥ ॐ ह्रीं दण्डधारी दक्षिणे च पश्चिमे खड्गधारिणे । ॐ ह्रूं घण्टावादी मूर्त्तिरुत्तरस्यां दिशिस्तथा ॥ ८॥ ॐ ह्रैं अग्निरूपो ह्याग्नेय्यां नैर्ऋत्यां च दिगम्बरः । ॐ ह्रौं सर्वभूतस्था वायव्ये भूतानां हितकारकः ॥ ९॥ ॐ ह्रः अष्टसिद्धिश्च ईशाने सर्व सिद्धिकरः परः । प्रत्यक्ष महमीशान बटुकाय नमोनमः ॥ १०॥ ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः स्वाहा ऊर्ध्वं खेचरिणं न्यसेत् । रुद्ररूपस्तु पाताले बटुकाय नमोनमः ॥ ११॥ ॐ ह्रीं बटुकाय मूर्ध्नि ललाटे भीमरूपिणम् । आपदुद्धरणं नेत्रे मुखे च बटुकं न्यसेत् ॥ १२॥ कुरु कुरु सर्वसिद्धिर्देहे गेहे व्यवस्थितः । बटुकाय ह्रीं सर्वदेहे विश्वस्य सर्वतो दिशि ॥ १३॥ आपदुद्धारकः पातु ह्यापादतल मस्तकम् । हसक्षमलवरयुं पातु पूर्वे दण्डहस्त स्तु दक्षिणे ॥ १४॥ हसक्षमलवरयुं नैर्ऋत्ये हसक्षमलवरयुं पश्चिमे ऽवतु । सर्वभूतस्थो वायव्ये हसक्षमलवरयुं घंटावादिन उत्तरे ॥ १५॥ हंसः सोऽहं तु ईशाने चाष्टसिद्धिकरः परः । क्षं क्षेत्रपाल ऊर्ध्वे तु पाताले शिवसन्निभः ॥ १६॥ एवं दश दिशो रक्षेद् बटुकाय नमोनमः । इति ते

कथितं ह्रीं श्रीं क्लीं ऐं सदावतु ॥१७॥ ॐ फ्रें हुं फट् च सर्वत्र त्रैलोक्ये विजयी भवेत्। लक्ष्मीं
ऐं श्रीं लं पृथिव्यां च आकारो हं ममावतु ॥१८॥ स्रौं प्रौं ज्रौं ॐ यं वायव्यां रं रं रं तेजोरूपि
णम्। ॐ कं खं गं घं ङं बटुकं चं छं जं झं ञं कपालिनम् ॥१९॥ टं ठं डं ढं णं क्षेत्रेशं तं थं दं
धं नं उमाप्रियम्। पं फं बं भं मं ममरक्ष यं रं लं भैरवोत्तमम् ॥२०॥ वं शं षं सं आदिनाथं
ळं क्षं वै क्षेत्रपालकम्। एवं पञ्जरमाख्यातं सर्वसिद्धिकरं भवेत् ॥२१॥
दुःख दारिद्र्य शमनं रक्षकं सर्वतो दिशः। आवश्यं सर्वतोवश्यं सर्वबीजैश्च
संपुटम् ॥२२॥ सर्वरोग हरं दिव्यं सर्वत्र सुखमाप्नुयात्। एवं रहस्यमाख्यातं देवानामपि दुर्लभम्
॥२३॥ वज्रपञ्जरनामेदं ये शृण्वन्ति वरानने। आयुरारोग्यमैश्वर्यं कीर्तिलाभं सुखं जपः ॥२४॥ लक्ष्मी
मनोरमा बुद्धिस्तेषां गेहे व्यवस्थिता। सुशीलाय सुदाताय गुरुभक्तिपराय च ॥२५॥ तस्य शीघ्रं च
दातव्यमन्यथा न कदाचन। गोपनीय प्रयत्नेन सर्वगोप्यमयं भवेत् ॥२६॥ यस्मै कस्मै न
दातव्यं न दातव्यं कदाचन। राज्यं देयं शिरो देयं न देयं भैरवाक्षरम् ॥२७॥ एककालं द्विकालं
वा त्रिकालं पठते नरः। सर्व पाप विनिर्मुक्तो शिवेन सह मोदते ॥२८॥

॥ इति श्री शक्ति रहस्ये श्रीबटुक भैरव पञ्जर कवचम् समाप्तम् ॥

फलश्रुति - श्रीबटुक भैरव का यह कवच दुःख - दारिद्र्य नाशक, सर्वसिद्धि दायक, सर्व-रोग हर, सर्वत्र सुख दायक, सब दिशाओं में रक्षा करने वाला एवं आयु, आरोग्य, ऐश्वर्य, कीर्ति, सुख, सम्पत्ति एवं श्रेष्ठ बुद्धि को देने वाला है। जो व्यक्ति इसका नित्य पाठ करता है, वह शिवलोक पाता है।

मं० मं० ३२८

भा० टी०

अथ श्रीबटुक भैरव स्तवराजः - आचमन तथा प्राणायाम के पश्चात् निम्नलिखित श्रीबटुक भैरव स्तवराज का पाठ तथा न्यासादि करने चाहिए।

" मेरुपृष्ठे सुखासीनं देवदेवं त्रिलोचनम्। शङ्करं परिपप्रच्छ पार्वती परमेश्वरम् ॥१॥ श्री पार्वत्युवाच ॥ भगवन्सर्वधर्मज्ञ सर्वशास्त्रागमादिषु। आपदुद्धारकं मन्त्रं सर्वसिद्धिप्रदं नृणाम् ॥२॥ सर्वेषां चैव भूतानां हितार्थं वाञ्छितं मया। विशेषतस्तु राज्ञां वै शान्तिपुष्टिप्रदायकम् ॥३॥ अङ्गन्यास करन्यास देहन्यास समन्वितम्। वक्तुमर्हसि देवेश मम (प्रसाधनमिति वा पाठः) हर्ष विवर्द्धनम् ॥४॥

ईश्वर उवाच॥ शृणु देवि महामन्त्रमापदुद्धार हेतुकम्। सर्वदुःख प्रशमनं सर्वशत्रुविनाशनम् ॥५॥ अपस्मारादि रोगाणां ज्वरादीनां विशेषतः। नाशनं स्मृति मात्रेण मन्त्रराजमिमं प्रिये ॥६॥ ग्रहराजभयानां च नाशनं सुखवर्द्धनम्। स्नेहाद्वक्ष्यामि मन्त्रं सर्वसारमिमं प्रिये ॥७॥ सर्वकामार्थदं मन्त्रं राजभोगप्रदं नृणाम्। आपदुद्धार मन्त्रस्य मूलविद्यां शृणु प्रिये ॥८॥ यस्य संस्मरणादेव भूतानां नाशनं वरम्। प्रणवं पूर्वमुद्धृत्य देवी प्रणवमुद्धरेत् ॥९॥ बटुकायेति वै पश्चादापदुद्धारणाय च। कुरु द्वयं ततः पश्चाद् बटुकाय पुनर्वदेत् ॥१०॥ देवी प्रणवमुद्धृत्य मन्त्रोद्धारमिमं प्रिये। एकविंशति वर्णास्तु मंत्रे सत्यं प्रकाशितः ॥११॥ मन्त्रोद्धारमिमं देवि त्रैलोक्ये चातिदुर्लभम्। तद्यन्त्रं च प्रवक्ष्यामि यन्त्रे देवं च पूजयेत् ॥१२॥ त्रिकोणं च तथा दत्त्वा षट्कोणं च ततो न्यसेत्। ततश्च वलये कुर्याच्चतुष्कोणं ततश्चरेत् ॥१३॥ मन्त्रं दलं समारभ्य मन्त्राक्षराणि पूरयेत्। उपरितानि सव्येन सर्वाणि पूरयेत् क्रमात् ॥१४॥ उर्वरित दले

तस्य लक्ष्मीबीजं न्यसेत्सदा। दिक्पालांश्च समारोप्य कोणेष्ट भैरवांलिखेत् ॥२५॥ एवं यन्त्रं च सम्पूज्य स्वस्थो भूत्वा जपेन्नरः। मन्त्राक्षराणां संख्याकैस्तन्तुभिर्ब्रह्मसूत्रजैः॥ वर्त्ति दत्वा घृते नैज दीपं तत्र प्रदापयेत् ॥२६॥

अथ दीपदान मन्त्रम्

"ॐ ह्रीं श्रीं क्लीं ह्रीं श्रीं वं सर्वह्लादे महाबल पराक्रमाय बटुकाय इमं दीपं गृहाण सर्वकार्यार्थ साधकाय दुष्टान्नाशय नाशय त्रासय त्रासय सर्वतो मम रक्षां कुरु कुरु फट् स्वाहा ॥२७॥

त्रिराचम्य च मन्त्रैश्च हस्तं प्रक्षाल्य वै तदा। हस्ते जलं ततो गृह्य विनियोगं पठेद् द्रुयम् ॥२८॥ अपुकाश्चयमिदं मन्त्रं सर्वशक्ति समन्वितम् स्मरणादेव मन्त्रस्य भूत प्रेत पिशाचकाः॥२९॥ विद्रवंत्यति भीता वै कालरुद्रादिक प्रजाः। पठेद्वा पाठयेद्वापि पूजयेद्वापि पुस्तकम्॥२०

श्रीस्वर्णाकर्षण भैरव यन्त्र

मं० मं० ८ ३ ०

भा० टी०

नाग्नि चोर भयं तत्र ग्रहराजभयं तथा। न च मारीभयं क्वापि सर्वत्र सुख माग्भवेत् ॥२१॥ आयुरारो-
ग्यमैश्वर्यं पुत्र पौत्रादि सम्पद:। भवंति सततं तस्य पुस्तकस्यापि पूजनात् ॥२२॥

पार्वत्युवाच:॥ य एष भैरवो नाम आपदुद्धार कोमत:। त्वया च कथितो देव
भैरव: कल्प उत्तम: ॥२३॥ तस्य नाम सहस्राणि प्रयुतान्यर्बुदानि च। सारमुद्धृत्य तेषां वै नामाष्ट
शतकं वद ॥२४॥ यानि संकीर्तयन्मर्त्य: सर्व दु:ख विवर्जित:। सर्वान्कामानवाप्नोति साधक:
सिद्धि मेव च ॥२५॥

ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मन:। आपदुद्धारणस्येह नामा-
ष्टशतमुत्तमम् ॥२६॥ सर्वपापहरं पुण्यं सर्वापद्विनिवारणम्। सर्वकामार्थदं देवि साधकानां सुखावहम् ॥२७॥
सर्वमङ्गलमाङ्गल्यं सर्वोपद्रवनाशनम्। आयुष्करं पुष्टिकरं श्रीकरं च यशस्करं ॥२८॥ नामाष्टशतकस्यास्य
छन्दोऽनुष्टुप् प्रकीर्तितम्। बृहदारण्यको नाम ऋषिर्देवोऽस्य भैरव: ॥२९॥ अष्टबाहुस्त्रिनयनं बीजशक्ति
समीरिते। ॐ कीलकं शेषमिष्ट सिद्धौ तु विनियोजयेत् ॥३०॥ सर्वकामार्थ सिद्ध्यर्थे विनियोग: प्रकीर्तित:।
आदौ कृत्वा षडङ्गं च ह्रां वां बीजादि निर्मितम् ॥३१॥ अङ्गुष्ठादिकरान्तं च यथोक्तं हृदयादिकम्। न्यासं कुर्याच्च
विधिवद्भक्त्या भैरव तुष्टये ॥३२॥ सद्योजातादिभिर्मन्त्रै: कनिष्ठकादि पूर्वकम्। देहाङ्गन्यासकंचैव
पूर्वं कुर्याच्च साधक: ॥३३॥ यथाकामनया ध्यात्वा ध्यानं च त्रिविधं यत:। आद्यान्ते स्तोत्र पाठ
स्य मूलमन्त्रं जपेन्नर: ॥३४॥ अष्टोत्तरशतं धीमान्यथा संख्यमथापि वा। जपांतेऽप्युत्तरन्यासा:
कर्तव्या जपसिद्धये ॥३५॥ एवं न्यासविधिं देवि भैरवस्य महात्मन:। नामाष्टशतकं पश्चा
ज्जपेदापन्निवारकम् ॥३६॥ स्थानेषु येषु नामानि शृणु मत्प्राण वल्लभे।

अथ देहन्यास नामानि -

भैरवं मूर्ध्नि विन्यस्य ललाटे भीमदर्शनम् ॥३७॥ अक्ष्णोर्भूताश्रयं न्यस्य कर्णयोर्भूत
नायकम्। नासिकायां त्रिशूलं च जिह्वायां रक्तपं न्यसेत् ॥ कण्ठमध्ये नागहारं नागहारोपवीतकम्।
क्षेत्रज्ञं करयोर्मध्ये क्षेत्रपालं हृदि न्यसेत् ॥३९॥ क्षेत्रदं नाभिदेशे तु कट्यां सर्वाघनाशनम्।
त्रिनेत्रमूर्वोर्विन्यस्य जंघयो रक्तपायिनम् ॥४०॥ पादयोर्देवदेवेशं सर्वाङ्गे बटुकं न्यसेत्।
एवं न्यास विधिं कृत्वा साक्षाद् भैरवो भवेत् ॥४१॥ अथातः संप्रवक्ष्यामि अंगुलीन्यासमुत्तमम्।
न्यसेद् भैरवमङ्गुष्ठे तर्जन्यां भीमदर्शनम् ॥४२॥ भूतमेशं मध्यमायामनामिकायां भूतनायकम्। कनिष्ठि-
कायां क्षेत्रियं क्षेत्रपालं करद्वये ॥४३॥ क्षेत्रज्ञं दिग्दिशायां वै भैरवं सर्वतः पुनः।

अथाङ्गन्यासः -

भैरवं शिरसि न्यस्य ललाटे भीमदर्शनम् ॥४४॥ नेत्रयोर्भूतहननं सारमेयानुगं भ्रुवोः।
कर्णयोर्भूतनाथं च प्रेतवाहं कपोलयोः ॥४५॥ नासापुटेऽोष्ठयोश्चैव भस्माङ्गं सर्पभूषणम्। अनादि
नाथमास्ये च शक्तिहस्तं गले न्यसेत् ॥४६॥ स्कंधयोर्दैत्यशमनं बाह्वोरतुलतेजसम्। पाण्योः
कपालिनं न्यस्य हृदये मुण्डमालिनम् ॥४७॥ शान्तं वक्षस्थले न्यस्य स्तनयोः कामचारिणम्। उदरे
च सदातुष्टं क्षेत्रेशं पार्श्वयोस्तथा ॥४८॥ क्षेत्रपालं पृष्ठदेशे क्षेत्रज्ञं नाभिदेशके। पापौघ
नाशनं कट्यां बटुकं लिङ्गदेशके ॥४९॥ गुदे रक्षाकरं न्यस्य तथोर्वो रक्तपायिनम्। जानुनोर्घुर्घुरारावं
जंघयो रक्तपायिनम् ॥५०॥ गुल्फयोः पादुकासिद्धं पादपृष्ठे सुरेश्वरम्। आपादमस्तकं चैव आपदु-
द्धारकं तथा ॥५१॥

मं०
मं०
भा०
टी०

ॐ ह्रीं क्ष्मौं ग्रौं ह्रीं ॐ स्वाहा आपदुद्धारणभैरवाय नमः ॥

अनेन व्यापकम्-

पूर्वे डमरुहस्तं च दक्षिणे दण्डधारिणम्। खड्गहस्तं पश्चिमायां घंटा वादिनमुत्तरे ॥
॥५२॥ आग्नेय्यामग्निवर्णं च नैर्ऋत्यां च दिगम्बरम्। वायव्यां सर्वभूतस्थमीशान्यां चाष्टसिद्धिदम् ॥
॥५३॥ ऊर्ध्वे खेचारिणं न्यस्य पाताले रौद्ररूपिणम्। एवं विन्यस्य देहेषु कराङ्गेषु ततोन्यसेत् ॥
॥५४॥ रुद्रमङ्गुष्ठयोर्न्यस्य तर्जन्योस्तु शिखीसखम्। शिवं मध्यमयोर्न्यस्याऽनामिकयोस्तु त्रिशूलिनम् ॥५५
॥ ब्रह्माणं तु कनिष्ठायां तलयोस्त्रिपुरांतकम्। मांसाशिनं कराग्रे च करपृष्ठे दिगम्बरम् ॥५६
॥ सिद्धहृदये भूतनाथाय आदिनाथाय मूर्द्धनि। आनन्दपदपूर्वाय नाथायाथ शिखासु च ॥५७॥ सिद्ध
॥५८॥ श्रीमदानंद शाबरनाथाय कवचे विन्यसेत्तथा। सहजानन्दनाथाय न्यसेन्नेत्रत्रये तथा ॥५८॥ ...
॥५९॥ देवीबीजानाथाय अस्त्रै चैव प्रयोजयेत्। बीजपूर्वोद्धृतं मन्त्रं न्यासं कुर्याद्विचक्षणः ॥५९॥ ...
॥६०॥ ध्यानं तदनंतरम् ॥६०॥ ध्यानं हते भूपात्सिद्धिर्भवति नान्यथा। एवं न्यासं विधिं कृत्वा ध्यायेच्च तदनंतरम् ॥६०॥ ध्यानं
तस्य प्रवक्ष्यामि यथाध्यात्वापठेन्नरः ॥ ६१ ॥

अथ त्रिगुणात्मकं ध्यानम्-

शुद्धस्फटिकसंकाशं सहस्रादित्यवर्चसम्। नीलजीमूतसंकाशं नीलांजनसमप्रभम् ॥
६२॥ अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकम्। दंष्ट्राकरालवदनं नूपुरावलिसंकुलम् ॥६३॥ भुजङ्ग
मेखलं देवमग्निवर्णं शिरोरुहम्। दिगंबरं कुमारेशं बटुकाख्यं महाबलम् ॥६४॥ खट्वाङ्गमसिपाशं
च शूलं दक्षिणभागतः। डमरुं च कपालं च वरदं भुजगं तथा ॥६५॥ आत्मवर्णसमोपेतं सारमेयसमन्वितम्

श्रीमहाकाल भैरव यन्त्र

अथ सात्त्विक ध्यानम् -

बन्दे बालं स्फटिक सदृशं कुण्डलोद्भासिताङ्गं ।
दिव्या कल्पैर्नवमणिमयैः किंकिणी नूपुराढ्यैः ॥
दीप्ताकारं विशद रसनां सुप्रसन्नं त्रिनेत्रम् ।
हस्ताग्राभ्यां बटुक सदृशं शूल दण्डोपधानम् ॥

अथ राजस ध्यानम् -

उद्यद् भास्कर सन्निभं त्रिनयनं रक्ताङ्ग रागस्रजं
स्मेरास्यं वरदं कपालमभयं शूलं दधानं करे ॥
नीलग्रीवमुदारभूषणयुतं शीतांशु खण्डोज्ज्वलं ।
बंधूकारुण वाससं भयहरं देवं सदा भावये ॥

अथ तामस ध्यानम् -

ध्यायेन्नीलाद्रिकान्तिं शशिकलधरं मुण्डमालं महेशं,
दिग्वस्त्रं पिङ्गकेशं डमरुमथ सृणिं खड्गपाशाभयानि
नागं घण्टा कपालं करसरसिरुहैर् बिभ्रतं भीमदंष्ट्रं ।
दिव्याकल्पं त्रिनेत्रं मणिमयविलसद् किंकिणी
नूपुराढ्यम् ॥

अथ साधारणं ध्यानम् -

करकलित कपाल: कुण्डली दण्डपाणिस्तरुणतिमिर नीलो व्याल यज्ञोपवीती।
क्रतुसमय सपर्या विघ्नविच्छेद हेतुर्जयति बटुकनाथ: सिद्धि: साधकानाम् ॥७०॥
आनीलकुंतलमलक्तककरक्त वर्णं मौनी कृतं कृत मनोज्ञ मुखारविन्दम्।
कल्याणकीर्ति कमनीय कपालपाणिं वन्दे महाबटुकनाथमभीष्ट सिद्ध्यै:॥७१॥
आनम्र सर्वगीर्वाण शिरोभृंगागसंगितम्। भैरवस्य पदाम्भोजं भूयोऽस्य नौमि भूतये॥७२॥
ध्यात्वा जपेत्तु संहृष्ट: सर्वान् कामानवाप्नुयात्। आयुरारोग्यमैश्वर्यं सिद्धार्थे विनियोजयेत्॥
साधक: सर्वलोकेषु सत्यं सत्यं न संशय:। लक्षवारं जपेन्मन्त्रं होमं कुर्याद्यथाविधि॥७४॥

ॐ अस्य श्री बटुक भैरव स्तोत्रमंत्रस्य बृहदारण्यक ऋषि। अनुष्टुप छन्द:। श्री बटुक भैरवो देवता। अष्टबाहुमिति बीजम्। त्रिनयनमिति शक्ति:। प्रणव: कीलकम्। ममाभीष्टसिद्ध्यर्थे जपे विनियोग:॥

बृहदारण्यक ऋषये नम: शिरसि। अनुष्टुप् छन्दसे नम: मुखे। बटुक भैरव देवता नम: हृदो:। अष्टबाहुमिति बीजाय नम: गुह्ये। त्रिनयनमिति शक्तये नम: पादयो:। ॐ कीलकाय नम: नाभौ। ॐ विनियोगाय नम: सर्वांगे।

ॐ ह्रां बां ईशान: सर्वविद्यानामीश्वर सर्वभूतानां ब्रह्माधिपति ब्रह्मणोऽधिपति ब्रह्मा शिवो मे अस्तु सदाशिवोम् अंगुष्ठाभ्यां नम:।

ॐ ह्रीं बीं तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्र: प्रचोदयात्। तर्जनीभ्यां नम:।

ॐ ह्रूं बूं अघोरेभ्योऽथ घोरेभ्यो घोर घोरतरेभ्यः । सर्वेभ्यः सर्व शर्वेभ्यो नमस्ते अस्तु रुद्र रूपेभ्यः । मध्यमाभ्यां नमः ।

ॐ ह्रैं बैं वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बल विकरणाय नमो बलाय नमो बल प्रमथनाय नमः सर्वभूत दमनाय नमो मनोन्मनाय नमः । अनामिकाभ्यां नमः ।

ॐ ह्रौं बौं सद्योजातं प्रपद्यामि सद्योजाताय वै नमोनमः । कनिष्ठिकाभ्यां नमः ।

ॐ ह्रः बः पंचवक्त्राय महादेवाय नमः । करतलकर पृष्ठाभ्यां नमः ।

अथ हृदयादि न्यासः -

ॐ ह्रां बां ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपति ब्रह्मा शिवो मे अस्तु सदाशिवोम् । हृदयाय नमः ।

ॐ ह्रीं बीं तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्र : प्रचोदयात् । शिरसेस्वाहा

ॐ ह्रूं बूं अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः । शिखायै वषट् ।

ॐ ह्रैं वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कल विकरणाय नमो बल विकरणाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः । कवचाय हुम् ।

ॐ ह्रौं श्रौं सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः । नेत्रत्रयाय वौषट् ।
ॐ ह्रः श्रः पंचवक्त्राय महादेवाय नमः । अस्त्राय फट् ।

अथ देहन्यासः-

ॐ ह्रीं भैरवाय नमः मूर्ध्नि । ॐ ह्रीं भीमदर्शनाय नमः ललाटे । ॐ ह्रीं भूताश्रयाय नमः नेत्रयोः । ॐ ह्रीं भूतनायकाय नमः कर्णयोः । ॐ ह्रीं त्रिशूलाय नमः नासिकायाम् । ॐ ह्रीं रक्तपाय नमः जिह्वायाम् । ॐ ह्रीं नागहार यज्ञोपवीतिने नमः कण्ठ मध्ये । ॐ ह्रीं क्षेत्रज्ञाय नमः करयोः ॐ ह्रीं क्षेत्रपालाय नमः हृदये । ॐ ह्रीं क्षेत्रदाय नमः नाभौ । ॐ ह्रीं सर्वविघ्ननाशाय नमः कट्याम् ॐ ह्रीं त्रिनेत्राय नमः ऊर्वोः । ॐ ह्रीं रक्तपायिने नमः जंघयोः । ॐ ह्रीं देवदेशाय नमः सर्वाङ्गे ।

अथ करन्यासः-

ॐ ह्रीं भैरवाय नमः अङ्गुष्ठाभ्यां । ॐ ह्रीं भीमदर्शनाय नमः तर्जनीभ्यां । ॐ ह्रीं भूताश्रयाय नमः मध्यमाभ्यां । ॐ ह्रीं भूतनायकाय नमः अनामिकाभ्यां । ॐ ह्रीं क्षत्रियाय नमः कनिष्ठिकाभ्यां । ॐ ह्रीं क्षेत्रपालाय नमः करतलकर पृष्ठाभ्यां । ॐ ह्रीं क्षेत्रज्ञाय नमः दिग्दिशायाम् । ॐ ह्रीं भैरवाय नमः सर्वाङ्गे ।

अथाङ्गन्यासः -

ॐ ह्रीं भैरवाय नमः शिरसि। ॐ ह्रीं भीमदर्शनाय नमः ललाटे। ॐ ह्रीं भूतहननाय नमः नेत्रयोः। ॐ ह्रीं सारमेयानुगाय नमः भ्रुवोः। ॐ ह्रीं भूतनाथाय नमः कर्णयोः। ॐ ह्रीं प्रेतवाहकाय नमः कपोलयोः। ॐ ह्रीं भस्मांगाय नमः नासापुटे। ॐ ह्रीं सर्वभूषणाय नमः ओष्ठयोः। ॐ ह्रीं आदिनाथाय नमः मुखे। ॐ ह्रीं शक्तिहस्ताय नमः गले। ॐ ह्रीं दैत्यशमनाय नमः स्कन्धयोः। ॐ ह्रीं अतुलतेजसे नमः बाह्वोः। ॐ ह्रीं कपालिनमे नमः करयोः। ॐ ह्रीं देवदेवेशाय नमः सर्वाङ्गे।

अथ करन्यासः -

ॐ ह्रीं भैरवाय नमः अंगुष्ठाभ्यां। ॐ ह्रीं भीमदर्शनाय नमः तर्जनीभ्यां। ॐ ह्रीं भूतप्रेष्ठाय नमः मध्यमाभ्यां। ॐ ह्रीं भूतनायकाय नमः अनामिकाभ्यां। ॐ ह्रीं क्षत्रियाय नमः कनिष्ठिकाभ्यां। ॐ ह्रीं क्षेत्रपालाय नमः करतलकर पृष्ठाभ्यां। ॐ ह्रीं क्षेत्रज्ञाय नमः दिग्दिशायाम्। ॐ ह्रीं भैरवाय नमः सर्वाङ्गे।

अथाङ्गन्यासः -

ॐ ह्रीं भैरवाय नमः शिरसि। ॐ ह्रीं भीमदर्शनाय नमः ललाटे। ॐ ह्रीं भूतहननाय नमः नेत्रयोः। ॐ ह्रीं सारमेयानुगायः नमः भ्रुवोः। ॐ ह्रीं भूतनाथाय नमः कर्णयोः। ॐ ह्रीं

प्रेतवाहकाय नमः कपोलयोः । ॐ ह्रीं भस्माङ्गाय नमः नासापुटे । ॐ ह्रीं सर्वभूषणाय नमः ओष्ठयोः ।
ॐ ह्रीं आदिनाथाय नमः मुखे । ॐ ह्रीं शक्तिहस्ताय नमः गले । ॐ ह्रीं दैत्यशमनाय नमः
स्कन्धयोः । ॐ ह्रीं अतुलतेजसे नमः बाह्वो । ॐ ह्रीं कपालिने नमः करयोः । ॐ ह्रीं मुण्डमा-
लिने नमः हृदये । ॐ ह्रीं शान्ताय नमः वक्षःस्थले । ॐ ह्रीं कामचारिणे नमः स्तनयोः । ॐ ह्रीं
सदा तुष्टाय नमः उदरे । ॐ ह्रीं क्षेत्रेशाय नमः नाभौ । ॐ ह्रीं पापौघनाशनाय नमः कट्याम्
ॐ ह्रीं बटुकाय नमः लिङ्गे । ॐ ह्रीं रक्षकराय नमः गुदे । ॐ ह्रीं रक्तलोचनाय नमः
ऊर्व्वोः । ॐ ह्रीं घुर्घुराय नमः जान्वो । ॐ ह्रीं सिद्धपादुकाय नमः गुल्फयोः । ॐ ह्रीं
सुरेश्वराय नमः पादपृष्ठे । ॐ ह्रीं आपदुद्धारकाय नमः आपादतलमस्तक पर्यन्तं न्यसेत् ।

ॐ ह्रीं क्ष्रौं भ्रौं ह्रीं ॐ स्वाहा आपदुद्धारणाय भैरवाय नमः अनेन सर्वाङ्गव्यापकं कुर्यात् ।

अथ दिङ्न्यासः-

ॐ ह्रीं डमरुहस्ताय नमः पूर्वे । ॐ ह्रीं दण्डधारिणे नमः दक्षिणे । ॐ ह्रीं खड्ग
हस्ताय नमः पश्चिमे । ॐ ह्रीं घण्टावादिनं नमः उत्तरे । ॐ ह्रीं अग्निवर्णाय नमः आग्नेय्यां । ॐ ह्रीं
दिगम्बराय नमः नैर्ऋत्ये । ॐ ह्रीं सर्वभूतस्थाय नमः वायव्ये । ॐ ह्रीं अष्टसिद्धिदाय नमः ईशान्ये । ॐ
ह्रीं खेचारि नमः ऊर्ध्वम् । ॐ ह्रीं रौद्ररूपिणे नमः पाताले ।

अथ कर न्यासः-

ॐ ह्रीं रुद्राय नमः अङ्गुष्ठाभ्यां। ॐ ह्रीं शिखी सखाय नमः तर्जनीभ्यां। ॐ ह्रीं शिवाय नमः मध्यमाभ्यां। ॐ ह्रीं त्रिशूलिने नमः अनामिकाभ्यां। ॐ ह्रीं ब्रह्मणे नमः कनिष्ठिकाभ्यां। ॐ ह्रीं त्रिपुरान्तकाय नमः करतलयो। ॐ ह्रीं मांसाशिने नमः कराग्रेषु। ॐ ह्रीं दिगम्बराय नमः करपृष्ठयोः।

अथ षडङ्ग न्यासः-

ॐ ह्रीं भूतनाथाय नमः हृदये। ॐ ह्रीं आदिनाथाय नमः मूर्द्धनि स्वाहा। ॐ ह्रीं आनन्द नाथाय नमः शिखायै वषट्। ॐ ह्रीं सिद्ध शाबरनाथाय नमः कवचाय हुम्। ॐ ह्रीं सहजानंदनाथाय नमः नेत्रत्रयाय वौषट्। ॐ ह्रीं श्री आनन्दनाथाय नमः अस्त्राय फट्।

ॐ अस्य श्री बटुक भैरव मन्त्रस्य बृहदारण्यकः ऋषिः अनुष्टुप् छन्दः। श्री बटुक भैरवो देवता। बं बीजम्। ह्रीं शक्तिः। ॐ कीलकम्। श्री बटुक भैरव प्रसाद सिद्ध्यर्थे स्तोत्रादौ अष्टोत्तर शत मूलमन्त्र जपे विनियोगः।

अथ मन्त्र न्यासः-

ॐ ह्रीं अङ्गुष्ठाय नमः। ॐ बटुकाय तर्जनीभ्यां नमः। ॐ आपदुद्धारणाय मध्यमाभ्यांनमः। ॐ कुरु कुरु अनामिकाभ्यां नमः।

अथ सकलमनोरथ प्राप्त्यर्थमिदं ध्यानम् -

शुद्ध स्फटिक संकाशं सहस्रादित्य वर्चसम् । नीलजीमूत संकाशं नीलांजन समप्रभम् ॥७५॥ अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकम् । दंष्ट्राकरालवदनं नूपुराराव संकुलम् ॥७६॥ भुजङ्गमरि वै देवमग्नि वर्ण शिरोरुहम् । दिगम्बरं कुमारेशं बटुकाख्यं महाबलम् ॥७७॥ खट्वाङ्गमसिपाशं च शूलं दक्षिण भागतः । डमरुं च कपालं च वरदं भुजगं तथा । आत्मवर्ण समोपेतं सारमेय समन्वितम् ॥७८॥

एवं ध्यात्वा 'ॐ ह्रीं भैरव भयकरहर मां रक्षरक्ष हुं फट् स्वाहा ।'- इति मन्त्रेण प्रार्थयित्वा पूर्वोक्त यन्त्र पीठे आवहनादि मुद्राः प्रदर्शयेत् । षोडशोपचारैरभ्यर्चयेत् ॥

अथ बलिदानम् -

शुद्धासन उपविश्य । हां ह्रीं कुं एभिर्बीजैः त्रिभिराचम्य मूलेन प्राणायामं कृत्वा देश कालौ संकीर्त्य । ममामुकफलावाप्तये श्री बटुक प्रीतये बलिदान महं करिष्ये । --- इति संकल्प्य गणपतिं दुर्गां रक्तैश्चन्दनाक्षतपुष्पैरभ्यर्च्य देवस्याग्रे त्रिकोणं चतुरस्रं मण्डलं कृत्वा तत्रगंधाद्यैरभ्यर्च्य पायसं कदला- कारं संपादितं बलिं निधाय गंधपुष्पाभ्यां मूलान्ते 'बलिरूपाय नमः' इति बलिं संपूज्य देवं तत्र संचिन्त्य संपू ज्य हस्ते जलमादाय मूलमन्त्रमुच्चार्य जलं भूमौ निक्षिप्य स्वहस्ते बलिमादाय देवाय समर्पयेत् ।

ततः संकल्पं कुर्यात्

मम सकल कामना सिद्ध्यर्थं श्री बटुक भैरव स्तोत्रस्यैकादश सहस्रपुरश्चरणांगत्वेन प्रति

स्तोत्रं मूल मंत्रस्योत्तर शतसंख्या जप संपुटित पचांशत्संख्यापाठमहं करिष्ये।"

मूलमन्त्रमष्टोत्तरशतवारं जपेत्।

मूलमन्त्रः-"ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं ॐ।"

एवं अष्टोत्तरशत मूल मन्त्र जप कृतेन श्रीबटुक भैरवः प्रीयताम्। बटुकाय नमस्कृत्य पंचोपचारैः संपूज्य स्तोत्रं पठेत्।

अष्टोत्तरशत नामानि- ॐ ह्रीं भैरवो भूतनाथश्च भूतात्मा भूतभावन। क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियो विराट्॥७९॥ श्मशानवासी मांसाशी खर्पराशी स्मरांतकृत्। रक्तपः पानपः सिद्धः सिद्धिदः सिद्धसेवितः॥८०॥ कंकालः कालशमनः कलाकाष्ठातनुः कविः। त्रिनेत्रो बहुनेत्रश्च तथा पिङ्गललोचनः।॥८१॥ शूलपाणिः खड्गपाणिः कंकाली धूम्रलोचनः। अभीरुर्भैरवीनाथो भूतपो योगिनीपतिः॥८२॥ धनदो धनहारी च धनवान्प्रीतिभावितः। नागहारो नागपाशो व्योमकेशः कपालभृत्॥८३॥ कालः कपालमाली च कमनीयः कलानिधिः। त्रिलोचनो ज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपः॥८४॥ त्रिनेत्रतनयो डिम्भः शान्तः शान्तजनप्रियः। बटुको बटुवेशश्च खट्वाङ्ग वर धारकः॥८५॥ भूताध्यक्षः पशुपतिर्भिक्षुकः परिचारकः। धूर्तो दिगम्बरः शूरो हरिणः पाण्डुलोचनः॥८६॥ प्रशान्तः शान्तिदः सिद्धः शंकरः प्रियबान्धवः। अष्टमूर्तिर्निधीशश्च ज्ञानचक्षुस्तपोमयः॥८७॥ अष्टाधारः षडाधारः सर्पयुक्तः शिखीसखः। भूधरो भूधराधीशो भूपतिर्भूधरात्मजः॥८८॥ कंकालधारी मुंडी च नागयज्ञोपवीतवान्। जृंभणो मोहनः स्तंभी मारणः क्षोभणस्तथा॥८९॥ शुद्धनीलांजनप्रख्यो दैत्यहा मुण्डभूषितः। बलिभुग्बलिभुङ्नाथो बालो बाल पराक्रमः॥९०॥ सर्वापत्तारणो दुर्गो दुष्टभूतनिषेवितः। कामी कलानिधिः कांतः कामि

नीजश कुठशी ॥ ९१ ॥ सर्वसिद्धिप्रदो वैद्यो प्रभविष्णुरितीव हि। अष्टोत्तरशतं नाम्नां भैरवस्य महात्मनः ॥ ९२ ॥ मया ते कथितं देवि रहस्यं

फलश्रुतिः -

सर्वकामदम्। य इदं पठति स्तोत्रं नामाष्टशतमुत्तमम् ॥ ९३ ॥ न तस्य दुरितं किंचिन्न च भूत भयं तथा।
न च मारीभयं तस्य गृहराज भयं तथा ॥ ९४ ॥ न शत्रुभ्यो भयं क्वापि प्राप्नुयान्मानवः क्वचित्। पातकानां
भयं नैव पठेत्स्तोत्रमनुत्तमम् ॥ ९५ ॥ मारीभये राजभये तथा चौराग्निजे भये। उत्पत्तिके महाघोरे तथा
दुःस्वप्नदर्शने ॥ ९६ ॥ बंधने च तथा घोरे पठेत्स्तोत्रमनन्यधीः। सर्वप्रशमनं याति भयं भैरव कीर्तनात्।
॥ ९७ ॥ एकादश सहस्रं तु पुरश्चरणमुच्यते। यस्त्रिसंध्यं पठेद्देवि संवत्सरमतंद्रितः ॥ ९८ ॥ ससिद्धिं प्राप्नुया
दिष्टां दुर्लभामपि मानवः। षण्मासं भूमिकामस्तु जपित्वा प्राप्नुयान्महीम् ॥ ९९ ॥ राजशत्रुविनाशाय
जपेन्मासाष्टकं पुनः। रात्रौ वारत्रयं चैव नाशयत्येव शात्रवान् ॥ १०० ॥ जपेन्मासत्रयं मर्त्यो राजानं
वशमानयेत्। धनार्थी च सुतार्थी च दारार्थी यस्तु मानवः ॥ १०१ ॥ जपेन्मासत्रयं देवि वारमेकं तथा
निशि। धनं पुत्रं तथा दारान्प्राप्नुयान्नात्र संशयः ॥ १०२ ॥ रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बंधनात्। भीतो
भयात्प्रमुच्येत देवि सत्यं न संशयः ॥ १०३ ॥ निगडैश्चापि बद्धो यः कारागारे निपातितः। शृंखला बंधनं
प्राप्तं पठेच्चैव दिवानिशिम् ॥ १०४ ॥ यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम्। अप्रकाश्यं परं
गुह्यं न देयं यस्य कस्यचित् ॥ १०५ ॥ सुकुलीनाय शांताय ऋजवे दम्भ वर्जिते। दद्यात्स्तोत्रमिदं पुण्यं
सर्वकाम फल प्रदम् ॥ १०६ ॥ इति श्रुत्वा ततो देवी नामाष्टशतमुत्तमम्। जजाप परया भक्त्या सदा सर्वे-
प्रवरेश्वरि ॥ १०७ ॥ भैरवस्य प्रहृष्टो ऽभूत्सर्वलोक महेश्वरः। वरं ददाति भक्तेभ्यो पठेत्स्तोत्रमनन्यधीः॥
१०८ ॥ संतोषं परमं प्राप्य भैरवस्य महात्मनः ॥ १०९ ॥ वारं वारं भुवनजननी प्रोच्यते साधुवादः।

सत्यं सत्यं जगत सकलो भैरवो देव एक:। यां यां सिद्धिं भुवन जठरे कामयेत्मानवोऽपि:। स्तां तां सिद्धिं वितरति सदा भैरव: सुप्रसन्न: ॥११०॥ पाणिभ्यां परित: प्रपीड्य सुदृढं निश्चोत्य निश्चोत्य च, ब्रह्माण्डं सकलं प्रचालित रसालो चचै: फलाभं मुहु:॥ पायं पायमपाययत्त्रिजगति उन्मत्तवत्तैरसैर्नृत्यं स्ता: डवमंबरेणशिरसा पायान्महाभैरव:॥१११॥ बिभ्राण: शुभ्रवर्णं द्विगुणनवभुजं पञ्चवक्त्रं त्रिनेत्रं। ह्यानं मुद्रेन्दुशास्त्रं विषममुतकं (?) शंखवभैष्णवपञ्चापम्। शूलं खट्वाङ्गबाणान्डमरुमसि गदा वह्नि मारोग्यमाला मिष्टाभीति च दर्भिर्जियति खलुमहाभैरव: सर्व सिद्ध्यै ॥११२॥ क्वाकाश: क्व समीरण: क्व दहन: क्वा पश्च विश्वंभर:। क्व ब्रह्मा क्व जनार्दन: क्व तरणिक्वेन्दुश्च देवासुरा:। कल्पान्तेभादिशारन प्रमुदित: श्रीसिद्धयोगीश्वरो। क्रीडानाटक नायको विजयते देवो महाभैरव:॥११३॥

लिखित्वा परमा भक्त्या भैरवस्तोत्रमुत्तमम्। अष्टानां ब्राह्मणानां च देयं पुस्तकमादरात्॥११४॥ पायान्समीहते कामां स्तांस्ताम्प्राप्नोत्य संशयम्। इह लोके सुखं प्राप्य पुस्तकस्य प्रसादत:॥ शिवलोकमनु प्राप्य शिवेन सह मोदते॥११५॥ लिखित्वा भूर्जपत्रे तु त्रिलोह परिवेष्टितम्। सौम्ये च वस्तु वसने कर्वटे च सुशोभने॥११६॥ करे बाहौ गले कट्यां मूर्ध्नि त्रि-लोह गोपितम्। यस्तु धारयते स्तोत्रं सर्वत्र जयमाप्नुयात्॥११७॥

॥इति श्री रुद्रयामलोक्तापदुद्धारकं श्री बटुक भैरव स्तोत्रम् समाप्तम्॥

अथ श्री काल भैरवाष्टकम् – देवराज सेव्यमान पावनांघ्रि पंकजं, कालयज्ञ सूत्रमिन्दु
शेखरं कृपाकरम् । नारदादि योगिवृन्दवन्दितं दिगम्बरं, काशिकापुराधिनाथ काल भैरवं भजे ॥१॥ भानुकोटि
भास्वरं भवाब्धितारकं परं, नीलकंठमीप्सितार्थ दायकं त्रिलोचनम् । कालकाल मंबुजाक्ष मक्षशूल मक्षरं,
काशिकापुराधिनाथ काल भैरवं भजे ॥२॥ शूलटंक पाश दंडपाणिमादिकारणं, श्यामकायमादिदेवमक्षरं
निरामयम् । भीम विक्रमं प्रभुं विचित्र ताण्डव प्रियं, काशिकापुराधिनाथ काल भैरवं भजे ॥३॥ भुक्ति
मुक्तिदायकं प्रशस्त चारुविग्रहं, भक्तवत्सलं स्थितं समस्त लोक विग्रहम् । विनिक्वणन्मनोज्ञ हेमकिं-
किणीलसत्कटिं, काशिकापुराधिनाथ काल भैरवं भजे ॥४॥ धर्मसेतु पालकं त्वधर्ममार्ग नाशकं.
कर्मपाश मोचकं सुशर्मदायकं विभुम् । स्वर्णवर्ण शेषपाश शोभितांग मण्डलं, काशिकापुराधिनाथ
कालभैरवं भजे ॥५॥ रत्नपादुका प्रभाभिराम पादयुग्मकं, नित्यमद्वितीयमिष्ट दैवतं निरंजनम् । मृत्यु
दर्पनाशनं करालदंष्ट्र मोक्षणं, काशिकापुराधिनाथ काल भैरवं भजे ॥६॥ अट्टहास भिन्नपद्मजां
डकोश संतति, दृष्टिपात नष्टपाप जालमुग्रशासनम् । अष्ट सिद्धि दायकं कपालमालि कंधरं,
काशिका पुराधिनाथ काल भैरवं भजे ॥७॥ भूतसंघ नायकं विशाल कीर्ति दायकं, काशिवास
लोक पुण्यपाप शोधकं विभुम् । नीतिमार्ग कोविदं पुरातनं जगत्पतिं, काशिकापुराधिनाथ कालभै-
रवं भजे ॥८॥

काल भैरवाष्टकं पठंति ये मनोहरं, ज्ञानमुक्ति साधनं विचित्र पुण्य वर्द्धनम् । शोक
मोह दैन्य लोभ कोपताप नाशनं, ते प्रयांति काल भैरवांघ्रिसन्निधिं ध्रुवम् ॥ ९ ॥

टिप्पणी: श्रीभैरव के उक्त सभी कवच तथा स्तोत्र नित्य पाठ करने योग्य तथा फल दायक हैं।

स्फुट स्तोत्राणि - प्रमुख देवताओं के स्तोत्र तथा कवचादि का उल्लेख किया जा चुका अब विभिन्न देवताओं से सम्बन्धित कुछ अन्य स्तोत्र यहाँ दिए जा रहे हैं। ये सभी स्तोत्र नित्य पाठ करने योग्य तथा मनोभिलाषा पूरक हैं। विभिन्न देवियों से सम्बन्धित स्तोत्र कवचादि का उल्लेख आगे किया जाएगा।

श्रीराम रक्षास्तोत्रम् :- "अस्य श्री रामरक्षा स्तोत्र मन्त्रस्य बुध कौशिक ऋषिः, श्रीसीतारामचन्द्रो देवता, अनुष्टुप् छन्दः, सीता शक्तिः, श्रीमान् हनुमान् कीलकं श्रीरामचन्द्र प्रीत्यर्थे रामरक्षा स्तोत्र जपे विनियोगः।

अथ ध्यानम् - ध्यायेदाजानु बाहुं धृतशर धनुषं बद्धपद्मासनस्थं, पीतं वासो वसानं नवकमलदलस्पर्धि नेत्रं प्रसन्नम्। वामाङ्कारूढ सीतामुख कमलमिलल्लोचनं नीरदाभं, नानालङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम्॥

स्तोत्रम् - चरितं रघुनाथस्य शतकोटि प्रविस्तरम्। एकैकमक्षरं पुंसां महापातकनाशनम् ॥१॥ ध्यात्वा नीलोत्पलं श्यामं रामं राजीव लोचनम्। जानकीलक्ष्मणोपेतं जटामुकुट मण्डितम्॥२॥ सासितूण धनुर्बाणपाणिं नक्तंचरान्तकम्। स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम्॥३॥ रामरक्षां पठेत्प्राज्ञः पापघ्नीं सर्वकामदाम्। शिरो मे राघवः पातु भालं दशरथात्मजः॥४॥ कौसल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती। घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः॥५॥ जिह्वां विद्यानिधिः पातु कण्ठं भरत वन्दितः। स्कंधौ दिव्यायुधः पातु भुजौ भग्नेश कार्मुकः॥६॥ करौ सीतापतिः पातु हृदयं जामदग्न्यजित्। मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः॥७॥ सुग्रीवेशः कटिं पातु

सक्थिनी हनुमत्प्रभुः । ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत् ॥ ८॥ जानुनी सेतुकृत्पातु जङ्घे दशमुखान्त-
कः । पादौ विभीषण श्रीदः पातु रामोऽखिलं वपुः ॥ ९॥ एतां रामबलोपेतां रक्षां यः सुकृती पठेत् । स
चिरायुः सुखी पुत्री विजयी विनयी भवेत् ॥ १०॥ पाताल भूतल व्योम चारिणश्छद्म चारिणः । न द्रष्टुमपि
शक्तास्ते रक्षितं रामनामभिः ॥ ११॥ रामेति रामभद्रेति रामचन्द्रेति वा स्मरन् । नरो न लिप्यते पापै-
र्भुक्तिं मुक्तिं च विन्दति ॥ १२॥ जगज्जैत्रैक मन्त्रेण रामनाम्नाभिरक्षितम् । यः कण्ठे धारयेत्तस्य करस्था:
सर्वसिद्धयः ॥ १३॥ वज्रपञ्जर नामेदं यो रामकवचं स्मरेत् । अव्याहताज्ञः सर्वत्र लभते जयमङ्गलम् ॥ १४॥
आदिष्टवान्यथा स्वप्ने रामरक्षामिमां हरः । तथा लिखितवान्प्रातः प्रबुद्धो बुधकौशिकः ॥ १५॥ आरामः कल्प
वृक्षाणां विरामः सकलापदम् । अभिरामस्त्रिलोकानां रामः श्रीमान्स नः प्रभुः ॥ १६॥ तरुणौ रूपसम्पन्नौ
सुकुमारौ महाबलौ । पुण्डरीक विशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥ १७॥ फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचा-
रिणौ । पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥ १८॥ शरण्यौ सर्वसत्वानां श्रेष्ठौ सर्वधनुष्मताम् । रक्षःकुल
निहन्तारौ त्रायेतां नो रघूत्तमौ ॥ १९॥ आत्तसज्ज धनुषाविषुस्पृशावक्षयाशुगनिषङ्गसङ्गिनौ । रक्षणाय मम
रामलक्ष्मणावग्रतः पथि सदैव गच्छताम् ॥ २०॥ सन्नद्धः कवची खड्गी चापबाण धरो युवा । गच्छन्म-
नोरथान्नश्च रामः पातु सलक्ष्मणः ॥ २१॥ रामो दाशरथिः शूरो लक्ष्मणानुचरो बली । काकुत्स्थः पुरुषः
पूर्णः कौसल्येयो रघूत्तमः ॥ २२॥ वेदान्त वेद्यो यज्ञेशः पुराणपुरुषोत्तमः । जानकीवल्लभः श्रीमानप्रमेय
पराक्रम ॥ २३॥ इत्येतानि जपन्नित्यं मद्भक्तः श्रद्धयान्वितः । अश्वमेधाधिकं पुण्यं सम्प्राप्नोति न
संशयः ॥ २४॥ रामं दूर्वादलं श्यामं पद्माक्षं पीतवाससम् । स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो नराः
॥ २५॥ रामं लक्ष्मण पूर्वजं रघुवरं सीतापतिं सुन्दरम् । काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं

धार्मिकम्। राजेन्द्रं सत्यसंधं दशरथतनयं श्यामलं शान्तमूर्तिम्। वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम्॥२६॥ रामाय रामभद्राय रामचन्द्राय वेधसे। रघुनाथाय नाथाय सीतायाः पतये नमः॥२७॥ श्रीराम राम रघुनन्दन राम राम, श्रीराम राम भरताग्रज राम राम। श्रीराम राम रणकर्कश राम राम, श्रीराम राम शरणं भव राम राम॥२८॥ श्रीरामचन्द्रचरणौ मनसा स्मरामि, श्रीरामचन्द्रचरणौ वचसा गृणामि। श्रीरामचन्द्रचरणौ शिरसा नमामि, श्रीरामचन्द्रचरणौ शरणं प्रपद्ये॥२९॥ माता रामो मत्पिता रामचन्द्रः सर्वस्वं मे रामचन्द्रो दयालुर्नान्यं जाने नैव जाने न जाने॥३०॥ दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मजा। पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम्॥३१॥ लोकाभिरामं रणरङ्गधीरं राजीवनेत्रं रघुवंशनाथम्। कारुण्यरूपं करुणाकरं तं श्रीरामचन्द्रं शरणं प्रपद्ये॥३२॥ मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम्। वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये॥३३॥ कूजन्तं रामरामेति मधुरं मधुराक्षरम्। आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्॥३४॥ आपदामपहर्तारं दातारं सर्वसम्पदाम्। लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम्॥३५॥ भर्जनं भवबीजानामर्जनं सुखसम्पदाम्। तर्जनं यमदूतानां रामरामेति गर्जनम्॥३६॥

रामो राजमणिः सदा विजयते रामं रमेशं भजे। रामेणाभिहता निशाचरचमू रामाय तस्मै नमः॥३७॥ रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं, रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर॥३७॥ राम रामेति रामेति रमे रामे मनोरमे। सहस्रनाम तत्तुल्यं रामनाम वरानने॥

॥ इति श्री बुधकौशिकमुनि विरचितं श्रीरामरक्षास्तोत्रं सम्पूर्णम्॥

श्रीकृष्णाष्टकम् :- "भजे व्रजैकमण्डलं समस्त पापखण्डनं, स्वभक्तचित्तरञ्जनं सदैव नन्दनन्दनम् । सुपिच्छगुच्छमस्तकं सुनादवेणुहस्तकं, अनङ्गरङ्गसागरं नमामि कृष्णनागरम् ॥१॥ मनोजगर्वमोचनं विशाललोललोचनं, विधूतगोपशोचनं नमामि पद्मलोचनम् । करारविन्दभूधरं स्मितावलोकसुन्दरं, महेन्द्रमानदारणं नमामि कृष्णवारणम् ॥२॥ कदम्बसूनकुण्डलं सुचारुगण्डमण्डलं, व्रजाङ्गनैकवल्लभं नमामि कृष्णदुर्लभम् । यशोदया समोदया सगोपया सनन्दया युतं सुखैकदायकं नमामि गोपनायकम् ॥३॥ सदैव पादपङ्कजं मदीयमानसे निजं, दधानमुक्तमालकं नमामि नन्दबालकम् । समस्तदोषशोषणं समस्तलोकपोषणं समस्तगोपमानसं नमामि नन्दलालसम् ॥४॥ भुवो भरावतारकं भवाब्धिकर्णधारकं, यशोमती किशोरकं नमामि चित्तचोरकम् । दृगन्तकान्तभङ्गिनं सदा सदालसङ्गिनं, दिने दिने नवं नवं नमामि नन्दसम्भवम् ॥५॥ गुणाकरं सुखाकरं कृपाकरं कृपापरं, सुरद्विषन्निकन्दनं नमामि गोपनन्दनम् । नवीनगोपनागरम् नवीन केलिलम्पटं, नमामि मेघसुन्दरं तडित्प्रभालसत्पटम् ॥६॥ समस्तगोपनन्दनं हृदम्बुजैकमोदनं, नमामि कुञ्जमध्यगं प्रसन्नभानुशोभनम् । निकामकामदायकं दृगन्तचारुसायकं, रसालवेणुगायकं नमामि कुञ्जनायकम् ॥७॥ विदग्धगोपिकामनोमनोज्ञतल्पशायिनं, नमामि कुञ्जकानने प्रवृद्धवह्निपायिनम् । यदा तदा यथा तथा तथैव कृष्ण सत्कथा, मया सदैव गीयतां तथा कृपाविधीयताम् ॥८॥

प्रमाणिकाष्टकद्वयं जपत्यधीत्य यः पुमान् । भवेत्स नन्दनन्दने भवे भवे सुभक्तिमान् ॥

॥ इति श्रीमच्छङ्कराचार्यकृतं श्रीकृष्णाष्टकं सम्पूर्णम् ॥

मं० मं० २८०

भा० टी०

अथ चर्पटपञ्जरिका स्तोत्रम् :- दिनमपि रजनी सायं प्रातः शिशिर वसन्तौ पुनरायातः । कालः क्रीडति गच्छत्यायुस्तदपि न मुञ्चत्याशावायुः ॥१॥ भजगोविन्दं भज गोविन्दं भजगोविन्दं मूढमते । प्राप्ते सन्निहिते मरणे नहि नहि रक्षति डुकृञ् करणे ॥ (ध्रुवपदम्)

अग्रे वह्निः पृष्ठे भानुः रात्रौ चिबुक समर्पित जानुः । करतल भिक्षा तरुतल वासस्तदपि न मुञ्चत्याशापाशः ॥ भज०॥२॥ यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः । पश्चाद्धावति जर्जर देहे वार्तां पृच्छति कोऽपि न गेहे ॥ भज०॥३॥ जटिलो मुण्डी लुञ्चित केशः काषायाम्बर बहुकृत वेषः । पश्यन्नपि च न पश्यति लोको ह्युदरनिमित्तं बहुकृत शोकः ॥ भज०॥४॥ भगवद्गीता किञ्चिदधीता गङ्गाज-ललवकणिका पीता । सकृदपि यस्य मुरारिसमर्चा तस्य यमः किं कुरुते चर्चाम् ॥ भज०॥५॥ अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम् । वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशा पिण्डम् ॥ भज०॥६॥ बालस्तावत्क्रीडासक्तस्तरुणस्तावत्तरुणीरक्तः । वृद्धस्तावच्चिन्तामग्नः पारे ब्रह्मणि कोऽपि न लग्नः ॥ भज०॥७॥ पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् । इह संसारे खलु दुस्तोर कृपया पारे पाहि मुरारे ॥ भज०॥८॥ पुनरपि रजनी पुनरपि दिवसः पुनरपि पक्षः पुनरपि मासः । पुनरप्ययनं पुनरपि वर्षं तदपि न मुञ्चत्याशामर्षम् ॥ भज०॥९॥ वयसि गते कः कामविकारः शुष्के नीरे कः कासारः । नष्टे द्रव्ये कः परिवारो ज्ञाते तत्त्वे कः संसारः ॥ भज०॥१०॥ नारीस्तनभरनाभिनिवेशं मिथ्यामाया मोहावेशम् । एतन्मांसवसादिविकारं मनसि विचारय बारम्बारम् ॥ भज०॥११॥ कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः । इति परिभावय सर्वमसारं विश्वं त्यक्त्वा स्वप्न विचारम् ॥ भज०॥१२॥ गेयं गीतानाम सहस्रम् ध्येयं श्रीपति रूपमजस्रम् । नेयं सज्जन सङ्गे चित्तं देयं दीनजनाय च वित्तम् ॥ भज०

॥२३॥ यावज्जीवो निवसति देहे कुशलं तावत्पृच्छति गेहे। गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये ॥भज०॥२४॥ सुखतः क्रियते रामाभोगः पश्चाद्धन्त शरीरे रोगः। यद्यपि लोके मरणं शरणं तदपि न मुञ्चति पापाचरणम् ॥भज०॥२५॥ रथ्याचर्पटविरचितकन्थः पुण्यापुण्यविवर्जितपन्थः। नाहं न त्वं नायं लोकस्तदपि किमर्थं क्रियते शोकः ॥भज०॥२६॥ कुरुते गङ्गासागरगमनं व्रतपरिपालनमथवा दानम्। ज्ञानविहीनः सर्वमतेन मुक्तिं न भजति जन्मशतेन ॥भज०॥२७॥

॥इति श्रीशङ्कराचार्यविरचितं चर्पटपञ्जरिका स्तोत्रं सम्पूर्णम्॥

टिप्पणी- उक्त स्तोत्र का नित्य पाठ करते रहने से आत्म-ज्ञान प्राप्त होता है तथा संसार से विरक्ति होती है। आत्मकल्याण के इच्छुकों को इसका नित्य चिन्तन सहित पाठ करना चाहिए।

अथ देवी स्तोत्राणि:- अब भगवती दुर्गा, महामायाकाली आदि देवियों से सम्बन्धित स्तोत्र कवचादि का उल्लेख किया जा रहा है।

श्री दुर्गा कवचम् - "ॐ अस्य श्रीचण्डीकवचस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, चामुण्डा देवता, अङ्गन्यासोक्तमातरो बीजम्, दिग्बन्ध देवतास्तत्त्वम्, श्री जगदम्बा प्रीत्यर्थे सप्तशती पाठाङ्गत्वेन जपे विनियोगः।'

ॐ नमश्चण्डिकायै ॥ मार्कण्डेय उवाच॥ ॐ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम्। यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥१॥ ब्रह्मोवाच॥ अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम्।

देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥२॥ प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी। तृतीयं चन्द्रघण्टे-
ति कूष्माण्डेति चतुर्थकम् ॥३॥ पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च। सप्तमं कालरात्रीति महा-
गौरीति चाष्टमम् ॥४॥ नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः। उक्तान्येतानि नामानि ब्रह्मणैव महा-
त्मना ॥५॥ अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे। विषमे दुर्गमे चैव भयार्ताः शरणं गताः ॥६॥ न
तेषां जायते किंचिदशुभं रणसंकटे। नापदं तस्य पश्यामि शोकदुःखभयं न हि ॥७॥ यैस्तु भक्त्या
स्मृता नूनं तेषां वृद्धिः प्रजायते। ये त्वां स्मरन्ति देवेशि रक्षसे तान्न संशयः ॥८॥ प्रेतसंस्था तु चामु-
ण्डा वाराही महिषासना। ऐन्द्री गजसमारूढा वैष्णवी गरुडासना ॥९॥ माहेश्वरी वृषारूढा कौमारी
शिखिवाहना। लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ॥१०॥ श्वेतरूपधरा देवी ईश्वरी वृषवाहना।
ब्राह्मी हंससमारूढा सर्वाभरणभूषिता ॥११॥ इत्येता मातरः सर्वाः सर्वयोगसमन्विताः। नानाभरणशोभा-
ढ्या नानारत्नोपशोभिताः ॥१२॥ दृश्यन्ते रथमारूढा देव्यः क्रोधसमाकुलाः। शङ्खं चक्रं गदां शक्तिं हलं च
मुसलायुधम् ॥१३॥ खेटकं तोमरं चैव परशुं पाशमेव च। कुन्तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम् ॥१४॥
दैत्यानां देहनाशाय भक्तानामभयाय च। धारयन्त्यायुधानीत्थं देवानां च हिताय वै ॥१५॥ नमस्तेऽस्तु
महारौद्रे महाघोरपराक्रमे। महाबले महोत्साहे महाभयविनाशिनि ॥१६॥ त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां
भयवर्द्धिनि। प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता ॥१७॥ दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्ग-
धारिणी। प्रतीच्यां वारुणी रक्षेद् वायव्यां मृगवाहिनी ॥१८॥ उदीच्यां पातु कौमारी ऐशान्यां शूल-
धारिणी। ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद् वैष्णवी तथा ॥१९॥ एवं दश दिशो रक्षेच्चामुण्डा शववाहना।
जया मे चाग्रतः पातु विजया पातु पृष्ठतः ॥२०॥ अजिता वामपार्श्वे तु दक्षिणे चापराजिता। शिखा-

उद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ॥२१॥ मालाधारी
ललाटे च भ्रुवौ रक्षेद् यशस्विनी । त्रिनेत्रा च भ्रुवोर्मध्ये
यमघण्टा च नासिके ॥२२॥ शङ्खिनी चक्षुषोर्मध्ये
श्रोत्रयोर्द्वारवासिनी । कपोलौ कालिका रक्षेत्कर्णमूले तु
शाङ्करी ॥२३॥ नासिकायां सुगन्धा च उत्तरोष्ठे च
चर्चिका । अधरे चामृतकला जिह्वायां च सरस्वती
॥२४॥ दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका ।
घण्टिकां चित्रघण्टा च महामाया च तालुके ॥२५॥
कामाक्षी चिबुकं रक्षेद् वाचं मे सर्वमङ्गला । ग्रीवायां
भद्रकाली च पृष्ठवंशे धनुर्धरी ॥२६॥ नीलग्रीवा
बहिःकण्ठे नलिकां नलकूबरी । स्कन्धयोः खड्गिनी
रक्षेद् बाहू मे वज्रधारिणी ॥२७॥ हस्तयोर्दण्डि-
नी रक्षेदम्बिका चाङ्गुलीषु च । नखाञ्छूलेश्वरी
रक्षेत्कुक्षौ रक्षेत्कुलेश्वरी ॥२८॥ स्तनौ रक्षेन्महादेवी
मनः शोकविनाशिनी । हृदये ललितादेवी उदरे
शूलधारिणी ॥२९॥ नाभौ च कामिनी रक्षेद् गुह्यं
गुह्येश्वरी तथा । पूतना कामिका मेढ्रं गुदे महिष-

श्री दुर्गा पूजन यन्त्र

वाहिनी ॥३०॥ कट्यां भगवती रक्षेज्जानुनी विन्ध्यवासिनी । जङ्घे महाबला रक्षेत्सर्वकामप्रदायिनी ॥३१॥ गुल्फ-
योर्नारसिंही च पादपृष्ठे तु तैजसी । पादाङ्गुलीषु श्री रक्षेत्पादाधस्तलवासिनी ॥३२॥ नखान् दंष्ट्राकराली
च केशांश्चैवोर्ध्वकेशिनी । रोमकूपेषु कौबेरी त्वचं वागीश्वरी तथा ॥३३॥ रक्तमज्जा वसामांसान्य-
स्थिमेदांसि पार्वती । अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥३४॥ पद्मावती पद्मकोशे कफे चूडा-
मणिस्तथा । ज्वालामुखी नखज्वालामभेद्या सर्वसन्धिषु ॥३५॥ शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी
तथा । अहंकारं मनोबुद्धिं रक्षेन्मे धर्मधारिणी ॥३६॥ प्राणापानौ तथा व्यानमुदानं च समानकम् । वज्र-
हस्ता च मे रक्षेत्प्राणं कल्याणशोभना ॥३७॥ रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी ।
सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥३८॥ आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी । यशः कीर्तिं च
लक्ष्मीं च धनं विद्यां च चक्रिणी ॥३९॥ गोत्रमिन्द्राणि मे रक्षेत्पशून्मे रक्ष चण्डिके । पुत्रान् रक्षेन्महाल-
क्ष्मीर्भार्यां रक्षतु भैरवी ॥४०॥ पन्थानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा । राजद्वारे महालक्ष्मीर्विजया
सर्वतः स्थिता ॥४१॥ रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु तत्सर्वं रक्ष मे देवि जयन्ती पापनाशिनी
॥४२॥

फलश्रुति: पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः । कवचेनावृतो नित्यं यत्र यत्रैव गच्छ-
ति ॥४३॥ तत्र तत्रार्थलाभश्च विजयः सर्वकामिकः । यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चि-
तम् ॥४४॥ परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् ॥ निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः ।
त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतः पुमान् ॥४५॥ इदं तु देव्याः कवचं देवानामपि दुर्लभम् ।
यः पठेत्प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः ॥४६॥ दैवी कला भवेत्तस्य त्रैलोक्येष्वपराजितः । जीवेद्

वर्षशतं सागमपमृत्युविवर्जित: ॥४७॥ नश्यन्ति व्याधय: सर्वे लूताविस्फोटकादय: । स्थावरं जङ्गमं चैव कृत्रिमं चापि यद्विषम् ॥४८॥ अभिचाराणि सर्वाणि मन्त्र यन्त्राणि भूतले । भूचरा: खेचराश्चैव जलजा श्चोपदेशिका: ॥ ४९॥ सहजा कुलजा माला डाकिनी शाकिनी तथा । अन्तरिक्षचरा घोरा डाकिन्यश्च महाबला: ॥५०॥ ग्रह भूत पिशाचाश्च यक्ष गन्धर्व राक्षसा: । ब्रह्म राक्षस वेताला: कूष्माण्डा भैरवादय: ॥५१॥ नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते । मानोन्नतिर्भवेद् राज्ञस्तेजोवृद्धि करं परम् ॥५२॥ यशसा वर्द्धते सोऽपि कीर्तिमण्डित भूतले । जपेत्सप्तशती चण्डीं कृत्वा तु कवचं पुरा ॥ ५३॥ यावद् भूमण्डलं धत्ते सशैल वनकाननम् । तावत्तिष्ठति मेदिन्यां सन्तति: पुत्र पौत्रिकी ॥ ५४॥ देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् । प्राप्नोति पुरुषो नित्यं महामाया प्रसादत: ॥ ५५॥ लभते परमं रूपं शिवेन सह मोदते ॥ ॐ ॥ ५६॥"

॥ इति श्री देव्या: कवचं सम्पूर्णम् ॥

अथ अर्गला स्तोत्रम् :- " ॐ अस्य श्री अर्गला स्तोत्र मन्त्रस्य विष्णु ऋषि: अनुष्टुप छन्द:, श्री महालक्ष्मी देवता, श्री जगदम्बा प्रीतये सप्तशती पाठाङ्गत्वेन जपे विनियोग: ॥"

ॐ नमश्चण्डिकायै ॥ मार्कण्डेय उवाच ॥ ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी । दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥ १॥ जयत्वं देवि चामुण्डे जय भूतार्तिहारिणि । जय सर्वगते देवि कालरात्रि नमोऽस्तु ते ॥ २॥ मधुकैटभविद्राविविधातृ वरदे नम: । रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥३॥ महिषासुरनिर्णाशि भक्तानां सुखदे नम: । रूपं देहि जयं देहि यशो

देहि द्विषो जहि ॥४॥ रक्तबीज वधे देवि चण्डमुण्डविनाशिनि। रूपं देहि जयं देहि यशो देहि द्विषो जहि
॥५॥ शुम्भस्यैव निशुम्भस्य धूम्राक्षस्य च मर्दिनि। रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥६॥
वन्दिताङ्घ्रियुगे देवि सर्व सौभाग्यदायिनि। रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥७॥ अचि-
न्त्यरूपचरिते सर्वशत्रुविनाशिनि। रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥८॥ नतेभ्यः सर्वदा
भक्त्या चण्डिके दुरितापहे। रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥९॥ स्तुवद्भ्यो भक्तिपूर्वं
त्वां चण्डिके व्याधिनाशिनि। रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१०॥ चण्डिके सततं ये
त्वामर्चयन्तीह भक्तितः। रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥११॥ देहि सौभाग्यमारोग्यं
देहि मे परमं सुखम्। रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१२॥ विधेहि द्विषतां नाशं विधे-
हि बलमुच्चकैः। रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१३॥ विधेहि देवि कल्याणं विधेहि
परमां श्रियम्। रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१४॥ सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१५॥ विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु। रूपं
देहि जयं देहि यशो देहि द्विषो जहि ॥१६॥ प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे। रूपं देहि जयं
देहि यशो देहि द्विषो जहि ॥१७॥ चतुर्भुजे चतुर्वक्त्र संस्तुते परमेश्वरि। रूपं देहि जयं देहि यशो
देहि द्विषो जहि ॥१८॥ कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके। रूपं देहि जयं देहि यशो
देहि द्विषो जहि ॥१९॥ हिमाचलसुतानाथ संस्तुते परमेश्वरि। रूपं देहि जयं देहि यशो देहि द्विषो
जहि ॥२०॥ इन्द्राणीपति सद्भाव पूजिते परमेश्वरि। रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२१॥
देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि। रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२२॥ देवि भक्त

दशमहाविद्यान्तर्गत दुर्गा पूजन यन्त्र

जनोद्दामदत्तानन्दोदये ऽम्बिके। रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२३॥ पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम्। तारिणीं दुर्ग संसारसागरस्य कुलोद्भवाम् ॥२४॥ इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः। स तु सप्तशती संख्या वरमाप्नोति सम्पदाम् ॥२५॥

॥इति श्री देव्या अर्गला स्तोत्रं सम्पूर्णम्॥

टिप्पणी: 'श्री दुर्गा सप्तशती' का पाठ करने से पूर्व उक्त कवच तथा स्तोत्र का पाठ करना आवश्यक है। यदि सप्तशती का पाठ न किया जाय, केवल उक्त कवच तथा स्तोत्र का ही नित्य पाठ किया जाय तो भी साधक की समस्त कामनाऐं पूर्ण होती हैं तथा रोग, शोक, भय आदि से छुटकारा मिलता है।

अगले पृष्ठों में देवी से सम्बन्धित अन्य प्रमुख स्तोत्रादि का उल्लेख किया गया है।

अथ श्री दुर्गास्तोत्रराजम् :- ॥ श्री भैरव उवाच ॥ अधुना देवि वक्ष्यामि दुर्गास्तोत्रं मनोहरम्। मूलमन्त्रमयं दिव्यं सर्व सारस्वत प्रदम् ॥ १ ॥ दुर्गातिशमनं पुण्यं साधकानां जयप्रदम्। दुर्गाया अद्भूतं तु स्तोत्रराजं परात्परम् ॥ २ ॥ श्री दुर्गास्तोत्र राजस्य ऋषिर्देवो महेश्वरः। छन्दोऽनुष्टुब्देवता श्री दुर्गाऽष्टाक्षरा शिवे ॥ ३ ॥ दुं बीजं च पराशक्तिर्नमः कीलकमीश्वरि। धर्मार्थ काम मोक्षार्थे दुर्गा स्तोत्र पाठे विनियोगः ॥ ४ ॥

अथ ध्यानम् - दूर्वानिभां त्रिनयनां विलसत्किरीटां, शङ्खाब्ज खड्ग शर खेटक शूल चापान्। सन्तर्जनीं च दधतीं महिषासनस्थां, दुर्गां नवार कुल पीठगतां भजेऽहम् ॥ ५ ॥ तारे तारं मन्त्र मालासु बीजं, ध्यायेदन्तर्यो बलं बालकान्तः। तस्य स्मारं स्मारमंघ्रिद्वयीं द्राग्रम्भाऽयाति स्वर्गता कामवश्या ॥ ६ ॥ मायां जपेद्यस्तव मन्त्रमध्ये दुर्गे सदा दुर्गति खेदखिन्नः। भवेत्स भूमौ नृप मौलि माला माणिक्य निर्घृष्ट पदारविन्दः ॥ ७ ॥ चाक्रिकं यदि जपेत्तवाम्बिके चक्रमध्यगत ईश्वरेश्वरि। साधको भवति चक्रवर्तिनां नायको नयविलास कोविदः ॥ ८ ॥ चक्रिबीजमपरं स्मरेच्छिवे योऽरि वर्ग विहिताहित व्ययः। आजिमण्डलगतो जपेद्रिपून्वाजिवारणरथाश्रितो नरः ॥ ९ ॥ दूर्वा बीजं यो जपेत्प्रेत भूमौ सायं माया भस्मना लिप्तकायः। गीर्वाणानां नायको देवमन्त्री भुक्त्वा राज्यं प्राज्यप्राज्यं करोति ॥ १० ॥ वायव्यबीजं यदि साधको जपेत्प्रियाकुच द्वन्द्व विमर्दन क्षमः। समस्त कान्ता जन नेत्र वागुरै र्विलास हंसो भविता स पार्वति ॥ ११ ॥ विश्वे विश्वेश्वरि यदि जपेत्कामवेलाकलातौ रात्रौ मात्राक्षरविलसितन्यास ईशानि मातः। तस्य स्मेराननसरसिजभ्राजमानाङ्घ्रि लक्ष्मीर्वश्याऽवश्यं सुरसुरवधू मौलिमालोर्वशी सा ॥ १२ ॥ भूगेहाञ्चित सत्त्रिवृत्त विलसन्नागार वृत्ताञ्चित व्यग्रारोल्लसिता

त्रिकोणविलसच्छ्रीविन्दुपीठस्थिताम्। ध्यायेच्चेतसि शर्वपत्नि भवतीं माध्वीरसाघूर्णितां, यो मन्त्री स
भविष्यति स्मरसमः स्त्रीणां धरण्यां दिवि ॥२३॥ दुर्गास्तवं मनुमयं मनुराजमौलि माणिक्यमुत्तमशिलाङ्;
रहस्यभूतम्। प्रातः पठेद्यदि जपावसरेऽर्चनायां भूमौ भवेत्स नृपतिर्दिवि देवनाथः ॥२४॥ इति स्तोत्रं
महापुण्यं पञ्चाङ्गैक शिरोमणिम्। यः पठेदर्धरात्रे तु तस्य वश्यं जगत्त्रयम् ॥२५॥

॥ इति श्री देवी रहस्ये श्रीदुर्गास्तोत्रराजम् सम्पूर्णम् ॥

टिप्पणी – यह दुर्गास्तोत्रराज सर्वोत्तम है। यदि प्रातः काल पूजन के समय इसका पाठ किया जाय
तो पाठकर्ता पृथ्वी पर राजा तथा स्वर्ग में इन्द्र का पद प्राप्त करता है। जो व्यक्ति अर्द्धरात्रि में इस
का पाठ करता है, वह तीनों लोकों को अपने वश में कर लेता है।

अथ श्री ब्रह्माण्डविजय दुर्गाकवचम् - ॥नारद उवाच॥ कवचं कथितं ब्रह्मन् पद्मा-
क्षस्य मनोहरम्। परं दुर्गतिनाशिन्या कवचं कथय प्रभो ॥१॥ पद्माक्षः प्राणतुल्यं च जीवनाय
चकार यम्। कवचानां च यत्सारं दुर्गनाशन कारणम् ॥२॥ ॥नारायण उवाच॥ शृणु नारद वक्ष्यामि
दुर्गायाः कवचं शुभम्। श्रीकृष्णेनैव यद्दत्तं गोलोके ब्रह्मणे पुरा ॥३॥ ब्रह्मा त्रिपुरसंग्रामे शङ्कराय
ददौ पुरा। जघान त्रिपुरं रुद्रो यद्धृत्वा भक्तिपूर्वकम् ॥४॥ हरो ददौ गौतमाय पद्माक्षाय च
गौतमः। यतो बभूव पद्माक्षः सप्तद्वीपेश्वरो महान् ॥५॥ यद्धृत्वा पठनाद् ब्रह्मा ज्ञानवान् शक्ति-
मान् प्रभुः। शिवो बभूव सर्वज्ञो योगिनां च गुरुर्यतः ॥६॥ शिवतुल्यो गौतमश्च बभूव मुनि
सत्तमः। यतो बभूव पद्माक्षः सप्तद्वीपेश्वरो जयी ॥७॥

ब्रह्माण्डविजयस्यास्य कवचस्य प्रजापतिः ।
ऋषिश्छन्दश्च गायत्री देवी दुर्गतिनाशिनी ॥८॥
ब्रह्माण्डविजयेष्वेव विनियोगः प्रकीर्तितः । पुण्य
जीवश्च महतां कवचं परमाद्भुतम् ॥९॥

दुर्गा दुर्गतिनाशिन्यै स्वाहा मे पातु मस्तकम्
ह्रीं मे पातु कपालं च ऐं ह्रीं श्रीं पातु लोचने ॥१०
पातु मे कर्णयुग्मं च दुं दुर्गायै नमः सदा । ऐं
ह्रीं श्रीं इति नासां मे सदा मां पातु सर्वतः ॥११॥
दुर्गे दुर्गे रक्षणीति स्वाहा चास्यं सदाऽवतु ।
श्रीं ह्रीं क्लीं इति दंताली पातु ह्रीमोष्ठयुग्मकम् ॥
१२॥ ह्रीं ह्रीं ह्रीं पातु कण्ठं च दुर्गे रक्षतु गण्डक
म् । स्कन्धं दुर्गविनाशिन्यै स्वाहा पातु निरन्तरम्
॥१३॥ वक्षो विपद्विनाशिन्यै स्वाहा मे पातु सर्वतः
दुर्गे दुर्गे रक्षणीति स्वाहा नाभिं सदाऽवतु ॥१४॥
दुर्गे दुर्गे रक्ष रक्ष पृष्ठं मे पातु सर्वतः । ॐ दुं
दुर्गायै स्वाहा च हस्तौ पादौ सदाऽवतु ॥१५॥
श्रीं ह्रीं दुर्गायै स्वाहा च सर्वाङ्गं मे सदाऽवतु ।

दशमहाविद्यान्तर्गत त्रिपुर भैरवी पूजन यन्त्र

प्राच्यां पातु महामाया आग्नेय्यां पातु कालिका ॥१६॥ दक्षिणे दक्षकन्या च नैऋत्यां शिवसुन्दरी। पश्चिमे पार्वती पातु वाराही वारुणे सदा ॥१७॥ कुबेरमाता कौबेर्यामीशान्यामीश्वरी सदा। ऊर्ध्वं नारायणी पातु ह्यम्बिकाऽधः सदाऽवतु ॥१८॥ ज्ञानं ज्ञानप्रदा पातु स्वप्ना स्वप्ने सदाऽवतु। इति ते कथितं वत्स सर्वमन्त्रौघविग्रहम् ॥१९॥

फलश्रुतिः - ब्रह्माण्ड विजयं नाम कवचं परमाद्भुतम्। स्नानात् सर्वतीर्थेषु सर्वदानेषु यत्फलं ॥२०॥ सर्वव्रतोपवासे च तत्फलं लभते नरः। गुरुमभ्यर्च्य विधिवद्वस्त्रालङ्कारचन्दनैः ॥२१॥ कण्ठे वा दक्षिणे बाहौ कवचं धारयेत्तु यः। कवचं काण्वशाखोक्तमुक्तं नारद सुन्दरम् ॥२२॥ यस्मै कस्मै न दातव्यं गोपनीयं सुदुर्लभम् ॥२३॥"

॥ इति श्री ब्रह्मवैवर्त्ते श्रीब्रह्माण्डविजय दुर्गा कवचम् सम्पूर्णम् ॥

टिप्पणी - उक्त कवच समस्त मनोभिलाषाओं का पूरक तथा समस्त पाप-तापों को नष्ट करने वाला है। इसको धारण करने से सब प्रकार के व्रतों का फल प्राप्त होता है। गुरुदेव की विधि पूर्वक पूजा करके इसे कण्ठ अथवा दाहिनी भुजा में धारण करने से सर्वत्र रक्षा होती है तथा समस्त तीर्थों में स्नान एवं समस्त तीर्थों के जल का पान करने का फल प्राप्त होता है।

श्रीदुर्गा आपदुद्धार स्तोत्रम् :- "नमस्ते शरण्ये शिवे सानुकम्पे, नमस्ते जगद्व्यापिके विश्वरूपे। नमस्ते जगद्वन्द्य पादारविन्दे, नमस्ते जगत्तारिणि त्राहि दुर्गे ॥१॥ नमस्ते जगच्चिन्त्य मानस्वरूपे, नमस्ते महायोगिनि ज्ञानरूपे। नमस्ते नमस्ते सदानन्दरूपे, नमस्ते जगत्तारिणि

त्राहि दुर्गे ॥२॥ अनाथस्य दीनस्य तृष्णातुरस्य, भयार्तस्य भीतस्य बद्धस्य जन्तोः। त्वमेका गतिर्देवि निस्तारकर्त्री, नमस्ते जगत्तारिणि त्राहि दुर्गे ॥३॥ अरण्ये रणे दारुणे शत्रुमध्येऽनले सागरे प्रान्तरे राजगेहे। त्वमेका गतिर्देवि निस्तारनौका, नमस्ते जगत्तारिणि त्राहि दुर्गे ॥४॥ अपारे महादुस्तरेऽत्यन्तघोरे, विपत्सागरे मज्जतां देहभाजाम्। त्वमेका गतिर्देवि निस्तारनौका, नमस्ते जगत्तारिणि त्राहि दुर्गे ॥५॥ नमश्चण्डिके चण्डदुर्दण्डलीला, समुत्खण्डिता खण्डिताशेषशत्रो। त्वमेका गतिर्देवि निस्तारबीजं, नमस्ते जगत्तारिणि त्राहि दुर्गे ॥६॥ त्वमेवाघभावा धृत सत्यवादीन्न जाताजिता क्रोधनात् क्रोधनिष्ठा। इडा पिङ्गला त्वं सुषुम्ना च नाडी, नमस्ते जगत्तारिणि त्राहि दुर्गे ॥७॥ नमोदेवि दुर्गे शिवे भीमनादे, सरस्वत्यरुन्धत्यमोघस्वरूपे। विभूतिः शची कालरात्रिः सती त्वं, नमस्ते जगत्तारिणि त्राहि दुर्गे ॥८॥

शरणमसि सुराणां सिद्धविद्याधराणां, मुनि मनुज पशूनां दस्युभिस्त्रासितानाम्। नृपति गृहगतानां व्याधिभिः पीडितानां, त्वमसि शरणमेका देवि दुर्गे प्रसीद ॥ ९॥

फलश्रुति - इदं स्तोत्रं मया प्रोक्तमापदुद्धारहेतुकम्। त्रिसन्ध्यमेकसन्ध्यं वा पठनाद्घोर सङ्कटात् ॥१०॥ मुच्यते नात्र सन्देहो भुवि स्वर्गे रसातले। सर्वं वा श्लोकमेकं वा यः पठेद्भक्तिमान् सदा ॥११॥ स सर्वं दुष्कृतं त्यक्त्वा प्राप्नोति परमं पदम्। पठनादस्य देवेशि किं न सिद्ध्यति भूतले ॥१२॥ स्तवराजमिदं देवि संक्षेपात्कथितं मया ॥१३॥

॥ इति श्री सिद्धेश्वरी तन्त्रे श्री दुर्गा आपदुद्धारस्तोत्रम् सम्पूर्णम् ॥

मं० म० यन्त्र २३

भा० टी०

अथ श्रीबगला कवचम् - कैलासाचलमध्यगम्पुरवहं शान्तं त्रिनेत्रं शिवम् । वाम-
स्था कवचं प्रणम्य गिरिजा भूतिप्रदम्पृच्छति ॥ १॥ देवि श्री बगलामुखी रिपुकुलारण्याग्निरूपा च या
तस्याश्चाप विमुक्त मन्त्र सहितम्प्रीत्याधुना ब्रूहि माम् ॥२॥ श्रीशङ्कर उवाच ॥ देवि श्री भव वल्लभे
शृणु महा मन्त्रं विभूति प्रदं, देव्या वर्म युतं समस्त सुखदं साम्राज्यदम्मुक्तिदम् ॥ तारं रुद्र वधूं विर-
ञ्चिमहिला विष्णुप्रिया काम युक्कान्ते श्रीबगलानने मम रिपून्नाशाय युग्मन्त्विति ॥ ४॥ ऐश्वर्य-
र्याणि पदं च देहि युगलं शीघ्रम्मनोवाञ्छितं, कार्यं साधय युग्म युक् शिववधू वह्निप्रियान्तो
मनुः ॥ कंसारेस्तनयञ्च बीजमपराशक्तिश्च वाणी तथा, कीलं श्रीमिति भैरवर्षि सहितं छन्दो
विराट् संयुतम् ॥ ५॥ स्वेष्टार्थस्य परस्य वेत्ति नितरां कार्यस्य सम्प्राप्तये । नानासाध्य महागदस्य
नियतन्नाशाय वीर्यप्रदे ॥ ध्यात्वा श्रीबगलाननाम्मनुवरं जप्त्वा सहस्राख्यकन्दीर्घैः षट्कयुतैश्च
रुद्रमहिला बीजैर्विन्यस्याङ्गके ॥६॥

सौवर्णासन संस्थितां त्रिनयनां पीतांशुकोल्लासिनीं, हेमाभाङ्गरुचिं शशाङ्कमुकुटां
सच्चम्पक स्रग्युताम् । हस्तैर्मुद्गर वज्र पाश रसना: संबिभ्रतीं भूषणैर्व्याप्ताङ्गीं बगलामुखीं त्रिजग-
तां संस्तम्भिनीं चिन्तये ॥ ७॥

ॐ अस्य श्रीबगलामुखी ब्रह्मास्त्र मन्त्र कवचयोः भैरव ऋषिः, विराट् छन्दः, श्रीबग-
लामुखी देवता, क्लीं बीजं, ऐं शक्तिः, श्रीं कीलकं, मम मनोरथ सिद्ध्यर्थे जपे विनियोगः ।

अथाङ्गन्यासः - ॐ भैरव ऋषये नमः शिरसि । ॐ विराट् छन्दसे नमः मुखे ।
ॐ बगलामुखी देवतायै नमः हृदि । ॐ क्लीं बीजाय नमः गुह्ये । ॐ ऐं शक्तये नमः पादयोः ।

ॐ श्रीं कीलकाय नमः सर्वाङ्गे।

ॐ ह्रां अङ्गुष्ठाभ्यां नमः। ॐ ह्रीं तर्जनीभ्यां नमः। ॐ ह्रूं मध्यमाभ्यां नमः। ॐ ह्रैं अनामिकाभ्यां नमः। ॐ ह्रौं कनिष्ठिकाभ्यां नमः। ॐ ह्रः करतल करपृष्ठाभ्यां नमः।

ॐ ह्रां हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा ॐ ह्रूं शिखायै वषट्। ॐ ह्रैं कवचाय हुम्। ॐ ह्रौं नेत्र त्रयाय वौषट्। ॐ ह्रः अस्त्राय फट्।

ॐ ह्रां ऐं श्रीं क्लीं बगलानने मम रिपून्नाशय नाशय मामैश्वर्याणि देहि देहि शीघ्रं मनोवांछित कार्यं साधय साधय ह्रीं स्वाहा॥

अथ कवचम्- शिरो मे पातु ॐ ह्रीं ऐं श्रीं क्लीं पातु ललाटकम्। संबोधन पदं पातु नेत्रे श्री बगलानने॥१॥ श्रुतौ मम रिपुम्पातु नासिकान्नाशय द्वयम्। पातु गण्डौ सदामामैश्व-र्याण्यन्तन्तु मस्तकम्॥२॥ देहि द्वन्द्वं सदाजिह्वां पातु शीघ्रं वचो मम। कण्ठदेशं मनः पातु

वाञ्छितम्वातु मूलकम् ॥ ३॥ कार्यं साधयद्वन्द्वं करौ पातु सदा मम। माया युक्ता तथा स्वाहा हृदयं पातु सर्वदा ॥ ४॥ अष्टचत्वारिंशद्वर्णा चिरव्याता बगलामुखी। रक्षां करोतु सर्वत्र गृहेऽरण्ये सदा मम ॥ ५॥ ब्रह्मास्त्राख्या मनुः पातु सर्वाङ्गं सर्वसन्धिषु। मन्त्रराजः सदा रक्षां करोतु मम सर्वदा ॥ ६॥ ॐ ह्रीं पातु नाभिदेशं कटिं मे बगलाऽवतु। मुखि वर्णद्वयं पातु लिङ्गं मे मुष्क युग्मकम् ॥ ७॥ जानुनी सर्वदुष्टानां पातु मे वर्ण पञ्चकम्। वाचं मुखं तथा पादं षड्वर्णा परमेश्वरी ॥ ८॥ जंघायुग्मे सदा पातु बगलारिपुमोहिनी। स्तम्भयेति पदं पृष्ठं पातु वर्णत्रयं मम ॥ ९॥ जिह्वां वर्णद्वयं पातु गुल्फौ मे कीलयेति च। पदोर्ध्वं सर्वदा पातु बुद्धिं पादतले मम ॥ १०॥ विनाशय पदः पातु पादाङ्गुल्यो नखानि मे। ह्रीं बीजं सर्वदा पातु बुद्धीन्द्रिय वचांसि मे ॥ ११॥ सर्वाङ्गं प्रणवः पातु स्वाहा रोमाणिमेव तु। ब्राह्मी पूर्वदले पातु चाग्नेय्यां विष्णुवल्लभा ॥ १२॥ माहेशी दक्षिणे पातु चामुण्डा राक्षसेऽवतु। कौमारी पश्चिमे पातु वायव्ये चापराजिता ॥ १३॥ वाराही चोत्तरे पातु नारसिंही शिवेऽवतु। ऊर्ध्वं पातु महालक्ष्मीः पाताले शारदाऽवतु ॥ १४॥ इत्यष्टौ शक्तयः पान्तु सायुधाश्च सवाहनाः। राजद्वारे महादुर्गे पातु मां गणनायकः ॥ १५॥ श्मशाने जलमध्ये च भैरवश्च सदाऽवतु। द्विभुजा रक्तवसनाः सर्वाभरणभूषिताः ॥ १६॥ योगिन्यः सर्वदा पातु महारण्ये सदा मम ॥"

फलश्रुति- इति ते कथितं देवि कवचम्परमाद्भुतम् ॥ १७॥ श्रीविश्वविजयं नाम कीर्तिश्रीविजयप्रदम्। अपुत्रो लभते पुत्रं धीरं शूरं शतायुषम् ॥ १८॥ निर्धनो धनमाप्नोति कवचस्यास्य पाठतः। जपित्वा मन्त्रराजं तु ध्यात्वा श्री बगलामुखीम् ॥ १९॥ पठेदिदं हि कवचं

निशायां नियमात्तय:। यद्यत्काममपते कामं साध्यासाध्ये महीतले ॥ २० ॥ तत्तत्काममवाप्नोति सप्त
रात्रेण शाङ्करि। गुरुं ध्यात्वा सुरां पीत्वा रात्रौ शक्ति समन्वित: ॥ २१ ॥ कवचं य: पठेद्देवि तस्यासा-
ध्यं न किंचन। यन्ध्यात्वा प्रजपेन्मंत्र सहस्र कवचं पठेत् ॥ २२ ॥ त्रिरात्रेण वशं याति मृत्योस्त-
न्नात्र संशय:। लिखित्वा प्रतिमां शत्रोस्सतालेन हरिद्रया ॥ २३ ॥ लिखित्वा हृदितन्नाम तन्ध्यात्वा-
प्रजपेन्मनुम्। एकविंशद्दिनंयावत्प्रत्यहं च सहस्रकम् ॥ २४ ॥ जप्त्वा पठेत्तु कवचं चतुर्विंशतिवारकम्
सस्तम्भं जायते शत्रोर्नात्र कार्या विचारणा ॥ २५ ॥ विवादे विजयं तस्य संग्रामे जयमाप्नुयात्। श्म-
शाने च भयन्नास्ति कवचस्य प्रभावत: ॥ २६ ॥ नवनीतं चाभिमन्त्र्य स्त्रीभ्यो दद्यान्महेश्वरी।
वन्ध्यायां जायते पुत्रो विद्याबल समन्वित: ॥ २७ ॥ श्मशानाङ्गारमादाय भौमे रात्रौ शनावथ।
पादोदकेन स्पृष्ट्वा च लिखेल्लोह शलाकया ॥ २८ ॥ भूमौ शत्रो: स्वरूपं च हृदिनाम समालिखेत्।
हस्तन्तद्धृदये दत्वा कवचन्तिथि वारकम् ॥ २९ ॥ ध्यात्वाजपेन्मंत्र राज्यं नवरात्रम्प्रयत्नत:।
म्रियते ज्वर दाहेन दशमेऽह्नि न संशय: ॥ ३० ॥ भूर्जपत्रेष्विदं स्तोत्र मष्टगंधेन संलिखेत्। धार
येद्दक्षिणे बाहौ नारी वामभुजे तथा ॥ ३१ ॥ संग्रामे जयमाप्नोति नारी पुत्रवती भवेत्। ब्रह्मास्त्रा-
दीनि शस्त्राणि नैव कृन्तन्ति तज्जनम् ॥ ३२ ॥ सम्पूज्य कवचं नित्यं पूजाया: फलमाप्नुयात्।
बृहस्पति समोवापि विभवे धनदोपम: ॥ ३३ ॥ कामतुल्यश्च नारीणां शत्रूणां च यमोपम:।
कविता लहरी तस्य भवेद् गंगा प्रवाहवत् ॥ ३४ ॥ गद्यपद्यमयी वाणी भवेद्देवी प्रसादत:। एकाद-
शशतं यावत्पुरश्चरणमुच्यते ॥ ३५ ॥ पुरश्चर्या विहीनं तु न चेदं फलदायकम्। नदेयं परशिष्ये-
भ्यो दुष्टेभ्यश्च विशेषत: ॥ ३६ ॥ देयं शिष्याय भक्ताय पञ्चत्वं चान्यथाप्नुयात्। इदं कवचं

मत्वा भजेद्यो बगलामुखीम् ॥३७॥ शत कोटिं जपित्वापि तस्य सिद्धिर्न जायते ॥
दाराढ्यो मनुजोऽस्य लक्ष जपतः प्राप्नोति सिद्धिं परां, विद्यां श्री विजयं तथा
सुनियतं धीरं च वीरं वरम् । ब्रह्मास्त्राख्य मनुं विलिख्य नितरां भूर्जेऽष्ट गंधेन वै, धृत्वा
राजपुरं व्रजन्ति खलु ये दासोऽस्ति तेषां नृपः ॥३८॥

॥ इति श्रीविश्वसारोद्धार तन्त्रे पार्वतीश्वर संवादे बगला कवचं सम्पूर्णम् ॥

अथ श्री बगला स्तोत्रम् — " ॐ अस्य श्री बगलामुखी स्तोत्रस्य नारद ऋषिः,
बगलामुखी देवता, मम सर्वेषां विरोधिनां वाङ्मुखपदबुद्ध्यादीनां स्तंभनार्थे जपे विनियोगः ।
अथ ध्यानम् - मध्ये सुधाब्धि मणिमण्डप रत्नवेदी सिंहासनो परिगतां परिपीतवर्णाम् ।
पीताम्बराभरण माल्य विभूषिताङ्गीं देवीं स्मरामि धृत मुद्गर वैरि जिह्वाम् ॥१॥ जिह्वाग्र मादाय
करेण देवीं वामेन शत्रून्परि पीडयन्तीम् । गदाभिघातेन च दक्षिणेन पीताम्बराढ्यां द्विभुजां नमामि ॥२॥ चलत्कनक कुण्डलोल्लसित चारु गण्डस्थलां लसत्कनक-चम्पक द्युतिमदिन्दु बिम्बा-
ननाम् । गदाहत विपक्षकां कलित लोल जिह्वां चलां स्मरामि बगलामुखीं विमुखवाङ्मुखस्त-
म्भिनीम् ॥३॥ पीयूषो दधि मध्य चारु विलसद्रक्तोत्पले मण्डपे सत्सिंहासन मौलि पातित रिपुम्प्रे-
तासनाध्यासिनीम् ॥ स्वर्णाभां कर पीडितारि रसनां भ्राम्यद् गदां विभ्रमामित्थं ध्यायति यान्ति
तस्य विलयं सद्योऽथ सर्वापदः ॥४॥

मं॰ म॰ २३५ भा॰ टी॰

देवित्वच्चरणाम्बुजार्चन कृते यः पीतपुष्पाञ्जलीम्, भक्त्या वामकरे निधाय च मनुं मन्त्री मनोज्ञाक्षरम्। पीठध्यान परोऽथ कुम्भकवशाद्बीजं स्मरेत्पार्थिवस्तस्यामित्रमुखस्य वाचि हृदये जाड्यं भवेत्तत्क्षणात् ॥५॥ वादी मूकति रंकति क्षितिपति वैश्वानरः शीतति, क्रोधी शाम्यति दुर्जनः सुजनति क्षिप्रानुगः खंजति। गर्वी खर्वति सर्व विच्च जडति त्वद्यन्त्रणा यन्त्रितः श्री नित्ये बगलामुखि प्रतिदिनं कल्याणि तुभ्यं नमः ॥६॥ मन्त्रस्तावदलं विपक्ष दलने स्तोत्रम्पवित्रं च ते, यन्त्र वादिनियन्त्रणं त्रिजगतां जैत्रं च चित्र रचयेत्। मातः श्री बगलेति नाम ललितं यस्यास्ति जन्तोर्मुखे, त्वन्नामग्रहणेन संसदि मुखस्तंभोभवेद्वादिनाम् ॥७॥ दुष्टस्तम्भन मुग्रविघ्न शमनं दारिद्र्य विद्रावणम्भूभृद्भीषणनं चलन्मृग दृशां चेतः समाकर्षणम्। सौभाग्यैक निकेतन समदृशः कारुण्य पूर्णा मृत मृत्योर्मारणमाविरस्तु पुरतो मातस्त्वदीयं वपुः ॥८॥

मातर्भञ्जय मद्विपक्ष वदनं जिह्वां च संकीलय, ब्राह्मीं मुद्रय मुद्रयाशुधिषणामुग्रांगतिं स्तम्भय। शत्रूंश्चूर्णय चूर्णयाशु गदया गौराङ्गि पीताम्बरे, विघ्नौघं बगले हर प्रणमतां कारुण्य पूर्णेक्षणे ॥९॥ मातर्भैरवि भद्रकालि विजये वाराहि विश्वाश्रये, श्रीनित्ये बगले महेशि कमले कामेशि वामे रमे। मातङ्गि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे। दासोऽहं शरणागतोऽस्मि कृपया विश्वेश्वरि त्राहिमाम् ॥१०॥ संरम्भे चौरसंघे प्रहरण समये बन्धने वारि मध्ये, विद्यावादे विवादे प्रकुपित नृपतौ दिव्यकाले निशायाम्। वश्ये वा स्तम्भने वा रिपुवधसमये निर्जने वा वने वा, गच्छंस्तिष्ठंस्त्रिकालं यदि पठति शिवं प्राप्नुयादाशु-

चीरः ॥११॥ नित्यं स्तोत्रमिदम्पवित्रमिह्या देव्याः पठत्यादराद् धृत्वा यन्त्रमिदं तथैव समेर वाहौ करे बागले। राजानो ऽप्यरयो मदान्ध करिणस्सर्पा मृगेन्द्रादिका स्ते वै यान्ति विमोहि-
-ता रिपुगणा लक्ष्मीः स्थिरास्सिद्धयः ॥१२॥
त्वं विद्या परमा त्रिलोक जननी विघ्नौघ संछेदिनी, योषाकर्षण कारिणी त्रिजगतामानन्द संवर्धिनी। दुष्टोच्चाटन कारिणी जनमनः सम्मोह सन्दायिनी, जिह्वां कीलय भैरवी विजयते ब्रह्मादि मन्त्रो यथा ॥१३॥ विद्यालक्ष्मीः सर्व सौभाग्यमायुः पुत्रैः पौत्रैः सर्वसाम्राज्यसिद्धिः। मानम्भोगो वश्यमारोग्य सौख्यम्प्राप्तं चाद् भूतले ऽस्मिन्नरेण॥ १४॥ यत्कृत जप संख्यानं चिन्तनं परमेश्वरि। दुष्टानां निग्रहार्थाय तद्गृहाण नमोस्तुते ॥१५॥ ब्रह्मास्त्रमिति विख्यातं त्रिलोकेषु च विश्रुतम्। गुरु भक्ताय दातव्यं न देयं यस्य कस्य चित् ॥१६॥ पीताम्बरां द्विभुजां च त्रिनेत्रां गात्रकोज्वलाम्। शिलामुद्गरहस्तां च स्मरेत्तां बगलामुखीम् ॥१७॥

॥ इति श्रीरुद्रयामले बगलामुखी स्तोत्रं सम्पूर्णम् ॥

अथ बगला हृदयम् - "ॐ अस्य श्री बगलामुखी हृदय माला मंत्रस्य नारद ऋषिरनुष्टुप छन्दः, श्री बगलामुखी देवता, ह्रीं बीजम्, क्लीं शक्तिः, ऐं कीलकम्, श्री बगलामुखी प्रसन्नार्थे जपे विनियोगः।

अथ न्यासः - "नारद ऋषये नमः शिरसि। अनुष्टुप्छन्दसे नमो मुखे। श्री बगलामुखी देवतायै नमो हृदि। ॐ ह्रीं बीजाय नमो गुह्ये। क्लीं शक्तये नमः पादयो। ऐं कीलकाय नमः सर्वाङ्गे।

अथ करन्यासः - ॐ ह्रीं अङ्गुष्ठाभ्यां नमः। ॐ क्लीं तर्जनीभ्यां नमः। ॐ ऐं मध्यमाभ्यां नमः। ॐ ह्रीं अनामिकाभ्यां नमः। ॐ क्लीं कनिष्ठिकाभ्यां नमः। ॐ ऐं करतल करपृष्ठाभ्यां नमः।

अथाङ्गन्यासः - ॐ ह्रीं हृदयाय नमः। ॐ क्लीं शिरसे स्वाहा। ॐ ऐं शिखायै वषट्। ॐ ह्रीं कवचाय हुम्। ॐ क्लीं नेत्रत्रयाय वौषट्। ॐ ऐं अस्त्राय फट्। ॐ ह्रीं क्लीं ऐं इति दिग्बन्धः।

"पीताम्बरां पीतमाल्यां पीताभरण भूषिताम्। पीतपद्म पदद्वन्द्वां बगलां चिन्तयेऽनिशम् ॥१॥" — इति ध्यात्वा सम्पूज्य प्रार्थनां कुर्यात् — "पीत खड्ग गदा हस्ते पीतचन्दन चर्चिते। बगले मे वरं देहि शत्रु संघ विदारिणी ॥२॥"

"ॐ ह्रीं क्लीं ऐं बगलामुख्यै गदाधारिण्यै प्रेतासनाध्यासिन्यै स्वाहा।" - इत्य ष्टोत्तर शतं यथाशक्ति वा जपित्वा पूर्ववद् हृदयादि षडङ्गन्यासं कृत्वा स्तोत्रमपठेत्॥ तद्यथा -

अथस्तोत्रम् – "वन्देऽहं बगलान्देवीं पीतभूषणभूषिताम् । तेजोरूपमयीं देवीं पीततेजः स्वरूपिणीम् ॥ १॥ गदाभ्रमणभिन्नाभ्रां भ्रुकुट्या भीषणाननाम् । भीषयन्तीं भीमशत्रून्भजे भक्तस्य भव्यदाम् ॥२॥ पूर्णचन्द्र समानस्यामपीत गन्धानुलेपनाम् । पीताम्बरपरीधानाम्पवित्रामाश्रयाम्यहम् ॥३॥ पालयन्ती मनुष्याणाम्पुसमीक्ष्यावनी तले । पीताचाररतान्भक्तांस्ताम्भवानीं भजाम्यहम् ॥४॥ पीतपद्मपदद्वन्द्वां चम्पकारण्यरोपिणीम् । पीतावतंसां परमां वन्दे पद्मजवन्दिताम् ॥५॥

लसच्चारुसिंजत्सुमंजीर पादां चलत्स्वर्णकर्णावतंसाञ्चितास्याम् । चलत्पीतचन्द्राननां चन्द्रवन्द्यां भजे पद्मजादीड्य सत्पादपद्माम् ॥६॥

सुपीताभया मालया पूतमन्त्रं परं ते जपन्तो जयं संलभन्ते । रणे रागरोषाप्लुतानां रिपूणां विवादे बलादैर कूहात्मातः ॥७॥

श्री मातङ्गी पूजन यन्त्र

भरत्वीतभास्वत्प्रभाहस्करा भाकुंदा गंजिता मित्र गर्वांगरिष्ठाम्। गरीयो गुणागार गात्रां गुणाढ्यां गणेशादिगम्यां श्रयेनिर्गुणाढ्याम् ॥८॥ जनायेजपन्ध्रुग्रवीजं जगत्सु परस्तुत्य-हन्त स्मरन्तः स्वरूपम्। भवेद्वादिनां वाङ्मुखस्तम्भ आद्ये जयो जायते जल्पतामाश्रुतेषाम् ॥९॥ तपं ध्यानतिष्ठा प्रतिष्ठात्म प्रह्लावतामाद पद्मार्चनं प्रेमयुक्ता:। प्रसन्नान्नृपा: प्राकृता: पण्डिता वा पुराणादिगादासतुल्या भवन्ति ॥१०॥

नमामस्ते मात: कनककमनीयांघ्रिजलजं, चलद्विद्युद्वर्णं घनतिमिर विध्वंस करणम्। भवाब्धौ मग्नात्मोचरण करणं सर्व शरणम्प्रपन्नानाम्मात र्जगति बगले दु:खदमनम् ॥११॥ ज्वलज्ज्योत्स्ना रत्नाकरमणिविषक्ताङ्घ्र भवनं, स्मरामस्ते धाम स्मरहर हरीन्द्रेन्दुजमुखै: अहोरात्रं प्रात: प्रणयिनवनीयं सुविशदम्पर म्पीताकारं परिचितमणिद्वीप वसनम् ॥१२॥ वदामस्ते मात: श्रुतिसुखकरन्नाम ललितं लसन्मात्रा वर्णं जगति बगलेति प्रचरितम्। चलन्तस्तिष्ठन्तो वय मुपविशन्तोपिशयने, नभेमोपच्छेयो दिविदुखलभ्यन्दिविपदाम् ॥१३॥ पदार्च्चायाम्प्रीति: प्रति-दितमपूर्वाप्रभवतु यथाते प्रासन्यस्तुतिपलमवेक्ष्यम्प्रणमताम्। अनल्पन्तन्मातर्भवति भूतभक्त्या भवतु नो दिशातस्सदुभक्तिम्मुवि भगवती भूरि भवदाम् ॥१४॥

मम सकल परिपूर्णां वाङ्मुखे स्तम्भयाशु भगवति रिपुजिह्वां कीलय प्रस्यतुल्याम्। व्यवसित खलबुद्धिं नाशयाशु प्रगल्भाम्ममकुरु बहुकार्यं सत्कृपे ऽम्ब प्रसीद ॥१५॥ अजतुम-मरिपूर्णां सद्मनिप्रेतसंस्था: करधृतगदयाताल्यातयित्वाशुरोषात्। सघन वसन धान्यं सद्मतेषां प्रदह्य पुनरपि बगला स्वस्थानमायातु शीघ्रम् ॥१६॥ करधृतरिपुजिह्वापीड-

न व्यग्रहस्ता मुहुरपि गदया तां स्ताडयन्ती सुतन्त्राम्। अगात सुरगणानामप्यालिकामीत वस्त्रां बह मं० जप बगलान्तां पीत देहां नमाम: ॥१७॥ हृदयवचन कायै: कुर्वतामभक्ति पुञ्जम्प्रकटित करुणार्द्रसूनवे जल्पतीति। धनमथ बहुधान्यपुत्र पौत्रादि वृद्धि: सकलमपि किमेभ्यो देयमेवं त्ववश्यम् ॥१८॥ तव चरण सरोजं सर्वदा सेव्यमानन्दुहिणहरिहराद्यैर्देववृन्दै: शरण्यम्। मृदुमति चरणन्तेशर्मदं सूरि सेव्यं वयमहकरवीमो मातरेतद्विधेयम् ॥१९॥

फलश्रुति: - बगला हृदयस्तोत्रमिदम्भक्ति समन्विता:। पठेद्यो बगला तस्य प्रसन्ना पाठतो भवेत् ॥२०॥ पीतध्यान परोभक्तो य: शृणोत्यपि कल्पत:। निष्कल्मषो भवेन्मर्त्यो मृतोमोक्षमवाप्नुयात् ॥२१॥ आश्विनस्य सिते पक्षे महाष्टम्यां दिवानिशम्। यस्त्विदम्पठते प्रेम्णा बगला प्रीति मेति स: ॥२२॥ देव्यालये पठेन्मर्त्यो बगलान्ध्यायतीश्वरीम्। पीतवस्त्रावृतोयस्तु तस्य नश्यन्ति शत्रव: ॥२३॥ पीताचाररतानित्यं पीतभूषा विचिन्तयन्। बगलां य: पठेन्नित्यं हृदयस्तोत्रमुत्तमम् ॥२४॥ न किंचिद् दुर्लभस्तस्य दृश्यते जगतीतले। शत्रवो ग्लानिमायान्ति तस्य दर्शनमात्रत: ॥२५॥

॥ इति श्री सिद्धेश्वर तन्त्रे उत्तरखण्डे बगला हृदयस्तोत्रं सम्पूर्णम् ॥

टिप्पणी - भगवती बगलामुखी अर्थात् पीताम्बरादेवी के उक्त कवच, स्तोत्र तथा हृदय का नित्य पाठ करते रहने से साधक की समस्त मनोभिलाषाओं की पूर्ति होती है तथा कष्ट दूर होते हैं।

अथ कमला स्तोत्राणि: अब भगवती कमला अर्थात लक्ष्मी के स्तोत्रादि का उल्लेख किया जाता है । ये सभी स्तोत्रादि नित्य पाठ करने योग्य हैं तथा इनसे प्रसन्न हो कर भगवती लक्ष्मी साधक को धन-धान्य, ऐश्वर्यादि प्रदान करती हैं तथा उसके सभी दुःख-कष्टों को दूर करती हैं।

अथ कमला कवचम् - 'अथ वक्ष्ये महेशानि कवचं सर्व कामदम् । यस्य विज्ञात मात्रेण भवेत्साक्षात्सदाशिव: ॥१॥ नार्चनं तस्य देवेशि मन्त्रमात्रं जपेन्नर: । स भवेत् पार्वतीपुत्र: सर्वशास्त्र विशारद: ॥२॥ विद्यार्थिनां सदा विद्याधनदात् विशेषत: । धनार्थिभि: सदा सेव्या कमला विष्णुवल्लभा ॥३॥

अस्याश्चतुरक्षरी विष्णुवल्लभाया: कवचस्य भगवान् ऋषिरनुष्टुप्छन्दो वाग्भवी शक्तिर्देवता वाग्भवं बीजं लज्जा रमा कीलकं कामबीजात्मकं कवचं मम सुपाण्डित्य कवित्व सर्वसिद्धि समृद्धये विनियोग: ।

ऐंकारो मस्तके पातु वाग्भवी सर्व सिद्धिदा । ह्रीं पातु चक्षुषोर्मध्ये चक्षुर्युग्मे च शाङ्करी ॥४॥ जिह्वायां मुखवृत्ते च कर्णयोर्दन्तयोर्नसि । ओष्ठाधरे दन्तपंक्तौ तालुमूले हनौ पुन: ॥५॥ पातु मां विष्णु वनिता लक्ष्मी: श्रीविष्णु रूपिणी ॥६॥ कर्णयुग्मे भुजद्वन्द्वे स्तनद्वन्द्वे च पार्वती, हृदये मणिबन्धे च ग्रीवायां पार्श्वयो: पुन: ॥७॥ पृष्ठदेशे तथा गुह्ये वामे च दक्षिणे तथा । उपस्थे च नितम्बे च नाभौ जंघाद्वये पुन: ॥८॥ जानु चक्रे पदद्वन्द्वे घुटिकेंगुलि मूलके । स्वधातु प्राणशक्त्यात्म सीमन्ते मस्तके पुन: ॥९॥ विजया पातु भवने जया पातु सदा मम ।

सर्वाङ्गं पातु कामेशी महादेवी सरस्वती ॥२०॥ तुष्टिः पातु महामाया उत्कृष्टिः सर्वदावतु। ऋद्धिः पातु महादेवी सर्वत्र शम्भुवल्लभा ॥२१॥ वाग्भवी सर्वदा पातु पातु मां हरगेहिनी। रमा पातु सदा देवी पातु माया स्वराट् स्वयं ॥२२॥ सर्वाङ्गं पातु मां लक्ष्मीर्विष्णुमाया सुरेश्वरी। शिवदूती सदा पातु सुन्दरी पातु सर्वदा ॥२३॥ भैरवी पातु सर्वत्र भेरुण्डा सर्वदावतु। त्वरिता पातु मां नित्यमुग्रतारा सदावतु ॥२४॥ पातु मां कालिका नित्यं कालरात्रिः सदावतु। नवदुर्गा सदा पातु कामाक्षी सर्वदावतु ॥२५॥ योगिन्यः सर्वदा पान्तु मुद्राः पान्तु सदा मम। मात्रा पातु सदा देव्यश्चक्रस्था योगिनीगणाः ॥२६॥ सर्वत्र सर्व कार्येषु सर्व कर्मसु सर्वदा। पातु मां देवदेवी च लक्ष्मीः सर्वसमृद्धिदा

फलश्रुति :- इति ते कथितं दिव्यं कवचं सर्वसिद्धये। यत्र तत्र न वक्तव्यं यदीच्छेदात्मनो हितम् ॥२८॥ शठाय भक्तिहीनाय निन्दकाय महेश्वरी। न्यूनाङ्गे चातिरिक्ताङ्गे दर्शयेन्न कदाचन ॥२९॥ न स्तवं दर्शयेद्दिव्यं सन्दर्श शिवहा भवेत्। कुलीनाय महेच्छाय दुर्गाभक्ति पराय च ॥२०॥ वैष्णवाय विशुद्धाय दद्यात्कवचमुत्तमम्। निजशिष्याय शान्ताय धनिने ज्ञानिने तथा ॥२१॥ दद्यात् कवचमित्युक्तं सर्वतंत्र समन्वितम्। शनौ मङ्गलवारे च रक्तचन्दनकेन वा ॥२२॥ यावकेन लिखेन्मन्त्रं सर्वतन्त्र समन्वितम्। विलिख्य कवचं दिव्यं स्वयम्भु कुसुमैः शुभैः ॥२३॥ स्वशुक्रैः परशुक्रैर्वा नानागन्ध समन्वितैः। गोरोचना कुंकुमेन रक्तचन्दन केन वा ॥२४॥ सुतिथौ शुभयोगे वा श्रवणायां रवेर्दिने। आश्विन्यां कृत्तिकायां वा फाल्गुन्यां वा मघासु च ॥२५॥ पूर्व भाद्रपदा योगे स्वात्यां मङ्गलवासरे। विलिखेत्प्रपठेत्स्तोत्रं शुभयोगे सुरालये ॥२६॥ आयुष्म-

श्रीकमला पूजन यन्त्र

प्रीतियोगे च ब्रह्मयोगे विशेषतः। इन्द्रयोगे शुभे
योगे शुक्रयोगे तथैव च ॥२७॥ कौलवे बालवे
चैव वणिजे चैव सत्तमः। शून्यागारे श्मशाने
च विजने च विशेषतः ॥२८॥ कुमारीं पूजयि-
त्वादौ यजेद्देवीं सनातनीम्। मत्स्यैर्मांसै
शाक सूपैः पूजयेत्परदेवताम् ॥२९॥ घृताद्यैः
सोपकरणैः पूपसूपैर्विशेषतः। ब्राह्मणान् भोज-
यित्वा च पूजयेत्परमेश्वरीं ॥३०॥ अखेटक-
मुपाख्यानं तत्र कुर्याद्दिनत्रयम्। तदाचरेन्महा
विद्यां शङ्करेण प्रभाषिताम् ॥३१॥ मारणद्वेषणा
दीनि लभते नात्र संशयः। स भवेत्पार्वती
पुत्रः सर्वशास्त्र पुरस्कृतः ॥३२॥ गुरुर्देवो
हरः साक्षात्पत्नी तस्य हरप्रिया। अभेदेन
भजेद्यस्तु तस्य सिद्धिरदूरतः ॥३३॥ पठति य
इह मर्त्यो नित्यमार्द्रान्तरात्मा जपफलमनुमेयं
लप्स्यते यद्विधेयम्। स भवति पदमुच्चैः सम्पदां
पादनम्रः क्षितिपमुकुटलक्ष्मीर्लक्षणानां चिराय॥

॥ इति श्रीविश्वसार तन्त्रे कमलात्मिका कवचम् ॥

अथ श्रीसूक्तं –" ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजां। चन्द्रां हिरण्मयीं
लक्ष्मीं जातवेदो ममावह ॥ तां म आवह जातवेदो लक्ष्मीमनपगामिनीं। यस्यां हिरण्यं विन्देयं
गामश्वं पुरुषानहं ॥ अश्वपूर्वां रथमध्यां हस्तिनाद प्रमोदिनीं ॥ श्रियं देवीमुपह्वये श्रीर्मा देवी
जुषताम् ॥

कांसोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्। पद्मे स्थितां पद्म
वर्णां तामिहोपह्वये श्रियम् ॥ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मिनीमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि ॥ आदित्यवर्णे तपसोऽधिजाते
वनस्पतिस्तव वृक्षोऽथ बिल्वः। तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः
उपैतु मां देवसखः कीर्तिश्च मणिना सह। प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्ति
मृद्धिं ददातु मे ॥ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्। अभूतिमसमृद्धिं च सर्वां नि
र्णुद मे गृहात् ॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोप-
ह्वये श्रियम् ॥ मनसः काममाकूतिं वाचः सत्यमशीमहि। पशूनां रूपमन्नस्य मयि श्रीः श्रयतां
यशः ॥ कर्दमेन प्रजाभूता मयि सम्भव कर्दम। श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥
आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे। नि च देवीं मातरं श्रियं वासय मे कुले ॥
आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनीम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आव-
ह ॥ आर्द्रां यष्करिणीं यष्टिं सुवर्णां हेममालिनीम्। सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म
आवह ॥ तां म ऽआवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं प्रभूतं गावो दास्यो

ऽ श्रयान्त्विन्देयं पुरुषानहम् ॥" यः शुचिः प्रयतो भूत्वा जुहुयादाज्य मन्वहम् । सूक्तं पञ्चदशर्चं च श्री कामः सततं जपेत् ॥

॥ इति श्री सूक्तम् सम्पूर्णम् ॥

अथ लक्ष्मी सूक्तम् :– "सरसिजनिलये सरोजहस्ते धवलतरांशुक गन्धमाल्य शोभे । भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ १॥

धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः । धनमिन्द्रो बृहस्पतिर्वरुणो धनम-श्विनौ ॥२॥ वैनतेय सोमं पिब सोमं पिबतु वृत्रहा । सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥३॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः । भवंति कृतपुण्यानां भक्तानां सूक्त जापिनाम् ॥४॥ पद्मानने पद्म ऊरु पद्माक्षि पद्म सम्भवे । तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम् ॥५॥ विष्णु पत्नीं क्षमां देवीं माधवीं माधवप्रियाम् । विष्णुप्रियां सखीं देवी नमाम्यच्युतवल्लभाम् ॥६॥

महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ॥

पद्मानने पद्मिनि पद्मपत्रे पद्मप्रिये पद्म दलायताक्षि । विश्वप्रिये विश्व मनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥८॥

आनन्दः कर्दमः श्रीदश्चिक्लीत इति विश्रुताः । ऋषयः श्रियः पुत्राश्च मयि श्रीर्देवि देवता ॥ ॥९॥ ऋण रोगादि दारिद्र्यं पापञ्च अपमृत्यवः । भयशोकमनस्तापा नश्य-

नु मम सर्वदा ॥२०॥
श्रीर्वर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते। धनं धान्यं पशुं बहुपुत्रलाभं
शतसंवत्सरं दीर्घमायुः ॥

॥इति श्रीलक्ष्मी सूक्तम् सम्पूर्णम्॥

अथ कमला स्तोत्रम् :- "ओङ्काररूपिणी देवि विशुद्धसत्त्वरूपिणी। देवानां जननी त्वं हि प्रसन्ना भव सुन्दरि ॥१॥ तन्मात्रञ्चैव भूतानि तव वक्षःस्थलं स्मृतम्। त्वमेव वेदगम्या तु प्रसन्ना भव सुन्दरि ॥२॥ देवदानवगन्धर्वयक्षराक्षसकिन्नरैः। स्तूयसे त्वं सदा लक्ष्मि प्रसन्ना भव सुन्दरि ॥३॥ लोकातीता द्वैतातीता समस्तभूतवेष्टिता। विद्वज्जनकीर्तिता च प्रसन्ना भव सुन्दरि ॥४॥ परिपूर्णा सदा लक्ष्मि त्रात्री तु शरणार्थिषु। विश्वाद्या विश्वकर्त्री च प्रसन्ना भव सुन्दरि ॥५॥ ब्रह्मरूपा च सावित्री त्वद्दीप्त्या भासते जगत्। विश्वरूपा वरेण्या च प्रसन्ना भव सुन्दरि ॥६॥ क्षित्यप्तेजोमरुद्व्योमपञ्चभूतस्वरूपिणी। बन्धादेः कारणं त्वं हि प्रसन्ना भव सुन्दरि ॥७॥ महेशे त्वं हैमवती कमला केशवेऽपि च। ब्रह्मणः प्रेयसी त्वं हि प्रसन्ना भव सुन्दरि ॥८॥ चण्डी दुर्गा कालिका च कौशिकी सिद्धरूपिणी। योगिनी योगगम्या च प्रसन्ना भव सुन्दरि ॥९॥ बाल्ये च बालिका त्वं हि यौवने युवतीति च। स्थविरे वृद्धरूपा च प्रसन्ना भव सुन्दरि ॥१०॥ गुणमयी गुणातीता आद्या विद्या सनातनी। महत्तत्त्वादिसंयुक्ता प्रसन्ना भव सुन्दरि ॥११॥ तपस्विनी तपःसिद्धिः स्वर्गसिद्धिस्तदर्थिषु।

चिन्मयी प्रकृतिस्त्वं तु प्रसन्ना भव सुन्दरि ॥
१२॥ त्वमादिर्जगतां देवि त्वमेव स्थिति कारिणीम्।
त्वमन्ते निधनस्थानं स्वेच्छाचारा त्वमेव हि ॥
१३॥ चराचराणां भूतानां बहिरन्तस्त्वमेव हि।
व्याप्यव्यापक रूपेण त्वं भासि भक्तवत्सले ॥१४॥
त्वन्मायया हृतज्ञाना नष्टात्मानो विचेतसः। गतागतं
प्रपद्यन्ते पापपुण्यवशात्सदा ॥१५॥ तावत्सत्यं
जगद्भाति शुक्तिकारजतं यथा। यावन्न ज्ञायते
ज्ञानं चेतसा नान्वगामिनी ॥१६॥ त्वज्ज्ञाना-
त्तु सदा युक्ताः पुत्रदारगृहादिषु। रमन्ते विषया-
न्सर्व्वानन्ते दुःखप्रदान् ध्रुवम् ॥१७॥ त्वदा-
ज्ञया तु देवेशि गगने सूर्यमण्डलम्। चन्द्रश्च
भ्रमते नित्यं प्रसन्ना भव सुन्दरि ॥१८॥ ब्र-
-ह्मेशविष्णु जननी ब्रह्माख्या ब्रह्मसंश्रया।
व्यक्ताव्यक्ता च देवेशि प्रसन्ना भव सुन्दरि
॥१९॥ अचला सर्वगा त्वं हि मायातीता महे-
श्वरि। शिवात्मा शाश्वता नित्या प्रसन्ना भव सुन्दरि

श्री अन्नपूर्णेश्वरी भजन यन्त्र

॥२०॥ सर्वकार्य नियन्त्री च सर्वभूतेश्वरेश्वरी। अनन्ता निष्कला त्वंहि प्रसन्ना भव सुन्दरि ॥२१॥
सर्वेश्वरी सर्ववन्द्या अचिन्त्या परमात्मिका। भुक्ति मुक्ति प्रदा त्वंहि प्रसन्ना भव सुन्दरि ॥२२॥
ब्रह्माणी ब्रह्मलोके त्वं वैकुण्ठे सर्वमङ्गला इन्द्राणी अमरावत्यामम्बिका वरुणालये ॥२३॥ यमालये
कालरूपा कुबेरभवने शुभा। महानन्दाग्नि कोणे च प्रसन्ना भव सुन्दरि ॥२४॥ नैर्ऋत्यां रक्त-
दन्ता त्वं वायव्यां मृगवाहिनी। पाताले वैष्णवी रूपा प्रसन्ना भव सुन्दरि ॥२५॥ सुरसा त्वं मणि-
द्वीपे ऐशान्यां शूलधारिणी। भद्रकाली च लङ्कायां प्रसन्ना भव सुन्दरि ॥२६॥ रामेश्वरी सेतु-
बन्धे सिंहले देवमोहिनी। विमला त्वं च श्री क्षेत्रे प्रसन्ना भव सुन्दरि ॥२७॥ कालिका त्वं
कालिघट्टे कामाख्या नीलपर्वते। विरजा ओड्रदेशे त्वं प्रसन्ना भव सुन्दरि ॥२८॥ वाराणस्या-
मन्नपूर्णा अयोध्यायां महेश्वरी। गयासुरी गयाधाम्नि प्रसन्ना भव सुन्दरि ॥२९॥ भद्रका-
ली कुरुक्षेत्रे त्वञ्च कात्यायनी व्रजे। महामाया द्वारकायां प्रसन्ना भव सुन्दरि ॥३०॥ क्षुधा त्वं
सर्वजीवानां वेला च सागरस्य हि। महेश्वरी मथुरायां प्रसन्ना भव सुन्दरि ॥३१॥ रामस्य
जानकी त्वं च कंसासुर विनाशिनी। रावणनाशिनी चैव प्रसन्ना भव सुन्दरि ॥३२॥

फलश्रुतिः- लक्ष्मी स्तोत्रमिदं पुण्यं यः पठेद् भक्ति संयुतः। सर्वज्वर भयं
नश्येत्सर्वव्याधि निवारणम् ॥३३॥ इदं स्तोत्रं महापुण्यमापदुद्धारकारणम्। त्रिसंध्यमेकसंध्यं
वा यः पठेत्सततं नरः ॥३४॥ मुच्यते सर्व पापेभ्यो तथा तु सर्वसङ्कटात्। मुच्यते नात्र
सन्देहो भुवि स्वर्गे रसातले ॥३५॥ समस्तं च तथा चैकं यः पठेद् भक्तितत्परः। स सर्व
दुष्करं तीर्त्वा लभते परमां गतिम् ॥३६॥ सुखदं मोक्षदं स्तोत्रं यः पठेद् भक्ति संयुतः।

स तु कोटि तीर्थ फलं प्राप्नोति नात्र संशयः ॥ ३७॥ एका देवी तु कमला यस्मिंस्तुष्टा भवेत्सदा। तस्याऽसाध्यं तु देवेशि नास्ति किञ्चिज्जगत्त्रये ॥ ३८॥ पठनादपि स्तोत्रस्य किं न सिद्ध्यति भूतले। तस्मात्स्तोत्रवरं प्रोक्तं सत्यं सत्यं हि पार्वति ॥ ३९॥

॥ इति श्रीकमला स्तोत्रम् सम्पूर्णम् ॥

अथ श्रीलक्ष्मी स्तोत्रम् :- "क्षमस्व भगवत्यम्ब क्षमाशीले परात्परे। शुद्धसत्त्व स्वरूपे च कोपादि परिवर्जिते ॥ १॥ उपमे सर्वसाध्वीनां देवीनां देवपूजिते। त्वया विना जगत्सर्वं मृततुल्यं च निष्फलम् ॥ २॥ सर्वसम्पत्स्वरूपा त्वं सर्वेषां सर्वरूपिणी। रासेश्वर्यधिदेवी त्वं त्वत्कलाः सर्वयोषितः ॥ ३॥ कैलासे पार्वती त्वं च क्षीरोदे सिन्धुकन्यका। स्वर्गे च स्वर्गलक्ष्मीस्त्वं मर्त्यलक्ष्मीश्च भूतले ॥ ४॥ वैकुण्ठे च महालक्ष्मीर्देवदेवी सरस्वती। गङ्गा च तुलसी त्वं च सावित्री ब्रह्म लोकतः ॥ ५॥ कृष्णप्राणाधिदेवी त्वं गोलोके राधिकास्वयं। रासे रासेश्वरी त्वं च वृन्दावनवने वने ॥ ६॥ कृष्णप्रिया त्वं भाण्डीरे चन्द्रा चन्दनकानने। विरजा चम्पक वने शतशृङ्गे च सुन्दरी ॥ ७॥ पद्मावती पद्मवने मालती मालती वने। कुन्ददन्ती कुन्दवने सुशीला केतकी वने ॥ ८॥ कदम्बमाला त्वं देवी कदम्बकाननेऽपि च। राजलक्ष्मी राजगेहे गृहलक्ष्मीर्गृहे गृहे ॥ ९॥"

इत्युक्त्वा देवताः सर्वे मुनयो मानवस्तथा। रुरुदुर्नम्रवदनाः शुष्ककण्ठोष्ठ तालुकाः ॥ १०॥ इति लक्ष्मी स्तवं पुण्यं सर्वदेवैः कृतं शुभं। यः पठेत्प्रातरुत्थाय स वै

सर्वं लभेद् ध्रुवं ॥ ११ ॥ अभार्यो लभते भार्यां विनीतां च सुतां सतीं । सुशीलां सुन्दरीं रम्या
मतिसुप्रियवादिनीं ॥ १२ ॥ पुत्रपौत्रवतीं शुद्धां कुलजां कोमलां वरां । अपुत्रो लभते पुत्रं वैष्णवं
चिरजीवनम् ॥ १३ ॥ परमैश्वर्ययुक्तं च विद्यावन्तं यशस्विनम् । भ्रष्टराज्यो लभेद्राज्यं भ्रष्ट-
श्रीर्लभते श्रियं ॥ १४ ॥ हतबन्धुर्लभेद् बन्धुं धनभ्रष्टो धनं लभेत् । कीर्तिहीनो लभेत्कीर्तिं प्र-
तिष्ठां च लभेद् ध्रुवं ॥ १५ ॥ सर्वमङ्गलदं स्तोत्रं शोक सन्ताप नाशनम् । हर्षानन्दकरं शश्वद्धर्म
मोक्ष सुहृत्प्रदम् ॥ १६ ॥

॥इति श्रीलक्ष्मी स्तोत्रम् सम्पूर्णम्॥

अथ छिन्नमस्ता स्तोत्राणि: अब भगवती छिन्नमस्ता से सम्बन्धित
कवच, स्तोत्र आदि का उल्लेख किया जाता है।

अथ त्रैलोक्य विजय छिन्नमस्ता कवचम् :- श्री देव्युवाच ॥ कथिताश्छि
न्नमस्ताया या या विद्या सुगोपिता:। त्वया नाथेन जीवेश श्रुताश्चाधिगता मया ॥ १ ॥
इदानीं श्रोतुमिच्छामि कवचं पूर्व सूचितम् । त्रैलोक्य विजयं नाम कवचं कथ्यतां प्रभो ॥ २ ॥
भैरव उवाच ॥ शृणु वक्ष्यामि देवेशि सर्वदेव नमस्कृते । त्रैलोक्यविजयं
नाम कवचं विश्वमोहनम् ॥ ३ ॥ सर्वविद्यामयं साक्षात् सुरासुर जयप्रदम् । धारणात्पठना
दीशस्त्रैलोक्य विजयी विभु: ॥ ४ ॥ ब्रह्मा नारायणो रुद्रो धारणात्पठनाद्यत:। कर्ता पाता

च संहर्त्री भुवनानां सुरेश्वरि ॥ ५॥ न देयं परशिष्येभ्य अभक्तेभ्यो विशेषतः । देयं शिष्याय भक्ताय प्राणेभ्यो ऽप्यधिकाय च ॥ ६॥

देव्याश्च छिन्नमस्तायाः कवचस्य च भैरवः । ऋषिर्विराट् च छन्दश्च देवता छिन्नमस्तका ॥ ७॥ त्रैलोक्य विजये मुक्तौ विनियोगः प्रकीर्तितः ॥

अथ कवचम् - "ॐ हूं कारो मे शिरः पातु छिन्नमस्ता बलप्रदा ॥ ८॥ ह्रीं ह्रीं ऐं त्र्यक्षरी पातु भालं वक्त्रं दिगम्बरी । श्रीं ह्रीं हूं ऐं दृशौ पातु मुण्डकर्तृधरापि सा ॥ ९॥ सा विद्या प्रणवाद्यन्ता श्रुतियुग्मं सदावतु । वज्रवैरोचनीये हूं फट् स्वाहा च ध्रुवादिकम् ॥ १०॥ घ्राणं पातु छिन्नमस्ता मुण्डकर्तृविधारिणी । श्रीमाया कूर्च वाग्बीजैः वज्रवैरोचनीये हूँ ॥ ११॥ हूँ फट् स्वाहा महाविद्या षोडशी ब्रह्मरूपिणी । स्वपार्श्वे वर्णिका चासृग्धारां पाययती मुदा ॥ १२॥ वदनं सर्वदा पातु छिन्नमस्ता स्वशक्तिका । मुण्डकर्तृधरा रक्ता साधकाभीष्टदायिनी ॥ १३॥ वर्णिनी डाकिनी युक्ता सापि मामभितोऽवतु । रामाद्या पातु जिह्वां च लज्जाद्या पातु कण्ठकं ॥ १४॥ कूर्चाद्या हृदयं पातु वागाद्या स्तनयुग्मकम् । रमया पुटिता विद्या पार्श्वौ पातु सुरेश्वरी ॥ १५॥ मायया पुटिता विद्या नाभिदेशं दिगम्बरी । कूर्चेन पुटिता देवी पृष्ठदेशं सदावतु ॥ १६॥ वाग्बीज पुटिता तेषां मध्यं पातु सशक्तिका । ईश्वरी कूर्चवाग्बीजे वज्रवैरोचनीये हूं ॥ १७॥ हूँ फट् स्वाहा महाविद्या सूर्यकोटि समप्रभा । छिन्नमस्ता सदा पायादुरुयुग्मं सशक्तिका ॥ १८॥ ह्रीं हूं वर्णिनी जानू श्रीं हूं ह्रीं हूं च डाकिनीपदम् सर्वविद्या स्थिता नित्या सर्वाङ्गं मे सदाऽवतु ॥ १९॥ प्राच्यां पाया देकलिङ्गा योगिनी

पावके ऽवतु । डाकिनी दक्षिणे पातु श्रीमहाभैरवी
च माम् ॥ २० ॥ नैर्ऋत्यां सततं पातु भैरवी
पश्चिमे ऽवतु । इन्द्राणी पातु वायव्ये ऽसिताङ्गी
पातु चोत्तरे ॥२१॥ संहारिणी सदा पातु शिव-
कोणे सकर्तृका । इत्यष्ट शक्तयः पान्तु दिग्वि-
दिक्षु सकर्तृकाः ॥२२॥ क्रीं क्रीं क्रीं सा पातु
पूर्वे हूं हूं मां पातु पावके । ह्रीं ह्रीं मां दक्षिणे
पातु दक्षिणे कालिका ऽवतु ॥ २३ ॥ क्रीं क्रीं क्रीं
चैव नैर्ऋत्यां ह्रीं ह्रीं मां पश्चिमे ऽवतु । ह्रीं
ह्रीं पातु मरुत्कोणे स्वाहा पातु सदोत्तरे ॥
२४॥ महाकाली खड्गहस्ता शिवकोणे सदाऽ-
वतु । तारा मायावधूः कूर्च फट्कारा मां महा-
मनुः ॥२५॥ खड्गकर्तृधरा तारा चोर्द्धदेशं
सदावतु । ह्रीं स्त्रीं हूं फट् च पाताले मां पातु
चैकजटा सती ॥ २६ ॥ तारातु सहिता खेऽ
व्यान्महानील सरस्वती । इति ते कथितं देव्याः
कवचं मन्त्र विग्रहम् ॥२७॥

श्री छिन्नमस्ता रजत पत्र

यद्धृत्वा पठनाद् भीमः क्रोधाख्यो भैरवः प्रभुः। सुरासुर मुनीन्द्राणां कर्ता हर्ता भवेत्स्वयम् ।।२८।। यस्याङ्गपा मधुमती याति सा साधकालयम्। भूतिन्याद्याश्च योगिन्यो यक्षिण्याद्याश्च खेचराः ।।२९।। आज्ञां गृह्णन्ति तास्तस्य कवचस्य प्रसादतः एतदेव परं ब्रह्म कवचं मन्मुखोदितम् ।।३०।।

फलश्रुतिः - देवीमभ्यर्च्य गन्धाद्यैर्मूलेनैव पठेत्सकृत्। संवत्सरकृतायाश्च पूजायाः फलमाप्नुयात् ।।३१।। भूर्जे विलिखितं चैव गुटिकां काञ्चनीस्थितां। धारयेद् दक्षिणे बाहौ कण्ठे वा यदि वान्यतः ।।३२।। सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यं वशमानयेत्। तस्य गेहे वसेल्लक्ष्मी वाणी च वदनाम्बुजे ।।३३।। ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रे यान्ति सौम्यतां। इदं कवचमज्ञात्वा यो भजेत् छिन्नमस्तकाम्। सोपि शस्त्र प्रहारेण मृत्युमाप्नोति सत्वरम् ।।३४

।।इति श्री भैरवतन्त्रे त्रैलोक्य विजयं नाम छिन्नमस्ता कवचं सम्पूर्णम् ।।

अथ छिन्नमस्ता स्तोत्रम् :- ।। ईश्वर उवाच ।। स्तवराजमहं वन्दे वैरोचन्याः शुभप्रदम् ।। नाभौ शुभ्रारविन्दं तदुपरि विलसन्मण्डलं चण्डरश्मेः। संसारस्यैकसारां त्रिभुवन जननीं धर्म कामार्थदात्रीम् ।। तस्मिन्मध्ये त्रिमार्गे त्रितय तनुधरां छिन्नमस्तां प्रशस्तां। तां वन्दे छिन्नमस्तां शमनभयहरां योगिनीं योगमुद्राम् ।। १।।

नाभौ शुद्ध सरोज वक्त्रविलसद् बंधूक पुष्पारुणं। भास्वद् भास्कर मण्डलं तदुदरे तद् योनिचक्रं महत् ।। तन्मध्ये विपरीतमैथुनरत प्रद्युम्नसत्कामिनी- पृष्ठस्थां तरुणार्क कोटि विलसत्तेजः

स्वरूपां भजे ॥२॥ वामे छिन्नशिरोधरां तदितरे पाणौ महत्कर्तृकां । प्रत्यालीढपदां दिगन्तवसना मुन्मुक्तकेशा
व्रजाम् । छिन्नात्मीयशिरस्समुच्छलदसृग्धारां पिबन्तीं परां । बालादित्यसम प्रकाश विलसन्नेत्रत्रयोद्
भासिनीम् ॥३॥

वामादन्यत्र नालं बहुगहनगलद्रक्तधाराभिरुच्चैः । गायंतीमस्थिभूषां करकमल
लसत्कर्तृकामुग्ररूपाम् ॥ रक्तामारक्तकेशीमपगतवसनां वर्णिनीमात्मशक्ति । प्रत्यालीढोरुपादामरुणि-
तनयनां योगिनीं योगनिद्राम् ॥४॥

दिग्वस्त्रां मुक्तकेशीं प्रलयघनघटा घोररूपां प्रचण्डां । दंष्ट्रां दुष्प्रेक्ष्य वक्त्रोदर
विवरलसल्लोलजिह्वाग्रभासाम् ॥ विद्युल्लोलाक्षियुग्मां हृदयतटलसद्भोगिनीं भीममूर्तिम् । सद्यश्छि-
न्नात्मकण्ठप्रगलितरुधिरैर्डाकिनीं वर्द्धयन्तीम् ॥५॥

ब्रह्मेशानाच्युताद्यैः शिरसि विनिहता मन्दपादारविन्दै – राप्तैर्योगीन्द्रमुख्यैः
प्रतिपदमनिशं चिन्तितां चिन्त्यरूपाम् ॥ संसारे सारभूतां त्रिभुवनजननीं छिन्नमस्तां प्रशस्ता- मिष्टां
"तामिष्टदात्रीं कलिकलुषहरां चेतसा चिन्तयामि ॥६॥

उत्पत्तिस्थिति संहृतीर्घटयितुं धत्ते त्रिरूपां तनुं । त्रैगुण्याज्जगतो यदीय विकृति
र्ब्रह्माच्युतः शूलभृत् ॥ तामाद्यां प्रकृति स्मरामि मनसा सर्वार्थसंसिद्धये । यस्याः स्मेरपदारविन्दयुगले
लाभं भजन्ते नराः ॥७॥

अभिलषित परस्त्री योग पूजा परोऽहं । बहुविध जनभावारम्भ सम्भावितोऽहम् ।
पशुजन विरतोऽहं भैरवी संस्थितोऽहं । गुरुचरणपरोऽहं भैरवोऽहं शिवोऽहं ॥८॥"

फलश्रुति:- इदं स्तोत्रं महापुण्यं ब्रह्मणा भाषितं पुरा। सर्वसिद्धिप्रदं साक्षान्महापातक नाशनम् ॥९॥
यः पठेत्प्रात रुत्थाय देव्याः सन्निहितोऽपि वा। तस्य सिद्धिर्भवेद्देवि वाञ्छितार्थ प्रदायिनी ॥१०॥
धन धान्यं सुतं जायां हयं हस्तिन मेव च। वसुन्धरां महाविद्यामष्टसिद्धिं लभेद् ध्रुवम् ॥११॥

वैयाघ्राजिन रञ्जित स्वजघने ऽरण्ये प्रलम्बोदरे। खर्वे ऽनिर्वचनीय पर्व सुभगे मुण्डावली मण्डिते। कर्त्रीं कुन्दरुचिं विचित्रवनितां ज्ञाने दधाने पदे। मातर्भक्त जनानुकम्पिनि महामाये ऽस्तु तुभ्यं नमः॥ १२॥

॥ इति श्री ब्रह्मकृत छिन्नमस्तास्तोत्रम् ॥

श्रीछिन्नमस्ता के उक्त कवच, स्तोत्र तथा आगे वर्णित अष्टोत्तरशतनाम का नित्य पाठ करते रहने से साधक की समस्त कामनाऐं पूर्ण होती हैं।

दशमहाविद्यान्तर्गत छिन्नमस्ता पूजन यन्त्र

अथ श्री छिन्नमस्ता अष्टोत्तरशतनाम स्तोत्रम् :- ॥श्रीपार्वत्युवाच॥ नाम्नां सहस्रं
परमं छिन्नमस्ता प्रियं शुभम्। कथितं भवता शम्भो सद्यः शत्रुनिकृन्तनम् ॥१॥ पुनः पृच्छाम्यहं देव
कृपां कुरु ममोपरि। सहस्रनाम पाठे च अशक्तो यः पुमान् भवेत् ॥२॥ तेन किं पठ्यते नाथ तन्मे
ब्रूहि कृपामय। श्रीसदाशिव उवाच॥ अष्टोत्तरशतं नाम्नां पठ्यते तेन सर्वदा ॥३॥ सहस्रनाम पाठ-
स्य फलं प्राप्नोति निश्चितम्।

ॐ अस्य श्रीछिन्नमस्ताष्टोत्तरशतनाम स्तोत्रस्य सदाशिव ऋषिरनुष्टुप् छन्दः
श्रीछिन्नमस्ता देवता मम सकल सिद्धि प्राप्तये जपे विनियोगः।

" ॐ छिन्नमस्ता महाविद्या महाभीमा महोदरी। चण्डेश्वरी चण्डमाता चण्डमुण्ड
प्रभञ्जिनी ॥४॥ महाचण्डा चण्डरूपा चण्डिका चण्डखण्डिनी। क्रोधिनी क्रोधजननी क्रोधरूपा कुहू कला॥
५॥ कोपातुरा कोपयुता कोपसंहारकारिणी। वज्रवैरोचनी वज्रा वज्रकल्पा च डाकिनी ॥६॥ डाकिनी
कर्मनिरता डाकिनी कर्मपूजिता। डाकिनी सङ्गनिरता डाकिनी प्रेमपूरिता ॥७॥ खट्वाङ्गधारिणी
खर्वा खड्गखर्परधारिणी। प्रेतासना प्रेतयुता प्रेतसङ्गविहारिणी ॥८॥ छिन्नमुण्डधरा छिन्नचण्डविद्या
च चित्रिणी। घोररूपा घोरदृष्टिर्घोररावा घनोदरी ॥९॥ योगिनी योगनिरता जपयज्ञपराय-
णा। योनिचक्रमयी योनिर्योनिचक्रप्रवर्तिनी ॥१०॥ योनिमुद्रा योनिगम्या योनियन्त्रनिवासिनी
यन्त्ररूपा यन्त्रमयी यन्त्रेशी यन्त्रपूजिता ॥११॥ कीर्त्या कपर्दिनी काली कङ्काली कलकारिणी।
आरक्ता रक्तनयना रक्तपान परायणा ॥१२॥ भवानी भूतिदा भूतिर्भूतिदात्री च भैरवी। भैरवा-
चारनिरता भूतभैरवसेविता ॥१३॥ भीमा भीमेश्वरी देवी भीमनाद परायणा। भवाराध्या

भवनुता भवसागर तारिणी ॥ १४॥ भद्रकाली भद्रतनुर्भद्ररूपा च भद्रिका। भद्ररूपा महाभद्रा सुभद्रा भद्रपालिनी ॥ १५॥ सुभव्या भव्यवदना सुमुखी सिद्धसेविता। सिद्धिदा सिद्धिनिवहा सिद्धासिद्धनिषे-
-विता ॥ १६॥ शुभदा सुभगा सिद्धा शुद्धसत्वा शुभावहा। श्रेष्ठा दृष्टिमयी देवी दृष्टिसंहारकारिणी ॥ १७॥ शर्वाणी सर्वगा सर्वा सर्वमङ्गलकारिणी। शिवा शान्ता शान्तिरूपा मृडानी मदनातुरा ॥ १८॥
इति ते कथितं देवि स्तोत्रं परम दुर्लभम्। गुह्याद् गुह्यतरं गोप्यं गोपनीयं प्रयत्नत: ॥ १९॥ किमत्र बहुनोक्तेन त्वदग्रे प्राणवल्लभे। मारणं मोहनं देवि ह्युच्चाटनमत: परम् ॥ २०॥ स्तम्भनादिक कर्म्माणि ऋद्धय: सिद्धयोऽपि च। त्रिकाल पठनादस्य सर्वे सिध्यन्त्यसंशय: ॥ २१॥
महोत्तमं स्तोत्रमिदं वरानने मयेरितं नित्यमनन्य बुद्धय:। पठन्ति ये भक्तियुता नरोत्तमा भवेन्न तेषां रिपुभि: पराजय: ॥ २॥

॥ इति श्री छिन्नमस्ता अष्टोत्तरशत नाम स्तोत्रम् ॥

अथ बाला स्तोत्राणि: अब श्री बाला त्रिपुर सुन्दरी देवी के स्तोत्र कवचादि का उल्लेख किया जाता है।

श्री बाला त्रिपुर सुन्दरी भी दशमहाविद्याओं के अन्तर्गत हैं। इनकी पूजा, उपा-
-सना, ध्यान, स्तोत्र-पाठ आदि से साधक के समस्त रोग, शोक, कष्ट, भय, ताप आदि दूर होते हैं तथा समस्त मनोकामनाएं सफल होती हैं।

अथ श्री त्रैलोक्य विजय बाला कवचम् :- श्री भैरव उवाच ॥ अधुना ते प्रवक्ष्या-
मि कवचं मन्त्रविग्रहं । त्रैलोक्यविजयं नाम रहस्यं देवदुर्लभम् ॥१॥ श्री देव्युवाच ॥ या देवी त्र्य-
-क्षरी बाला चित्कला श्री सरस्वती । महाविद्येश्वरी नित्या महात्रिपुरसुन्दरी ॥२॥ तस्याः कवचमी-
-शान मन्त्रगर्भं परात्मकं । त्रैलोक्यविजयं नाम श्रोतुमिच्छामि तत्त्वतः ॥३॥ श्री भैरव उवाच ॥
देवदेवि महादेवि बालाकवचमुत्तमं । मन्त्रगर्भं परं तत्त्वं लक्ष्मीसंवर्धनं महत् ॥४॥ सर्वस्वं मे
रहस्यं मे गुह्यं त्रिदिशगोपितं । प्रवक्ष्यामि तव स्नेहान्नाख्येयं यस्य कस्यचित् ॥५॥ यं धृत्वा
कवचं देव्या मातृकाक्षरमण्डितम् । नारायणोऽपि दैत्येन्द्रान् जघान रणमण्डले ॥६॥ त्र्यम्बकं
कामदेवोऽपि बलं शक्रो जघान हि । कुमारस्तारकं दैत्यमन्धकं चन्द्रशेखरः ॥७॥ अवधीद्रावणं
रामो वातापीं कुम्भसम्भवः । कवचस्यास्य देवेशि धारणात्पठनादपि ॥८॥ स्रष्टा प्रजापतिर्ब्रह्मा
विष्णुस्त्रैलोक्य पालकः । शिवोऽणिमादि सिद्धीशो मघवा देवनायकः ॥९॥ सूर्यस्तेजोनिधिर्देवि
चन्द्रस्ताराधिपः स्थितः । वह्निर्मखोर्मिनिलयो वरुणोऽपि दिशांपतिः ॥१०॥ समीरो बलवांल्लोके
यमो धर्मनिधिः स्मृतः । कुबेरो निधिनाथोऽस्ति नैरृतिः सर्वराक्षसां ॥११॥ ईश्वरः शङ्करो रुद्रो
देवि रत्नाकरोऽम्बुधिः । अस्य स्मरणमात्रेण कौलिकस्य कुलेश्वरि ॥१२॥ आयुः कीर्तिर्धिया
लक्ष्मीर्वृद्धिर्भवति संततं । कवचं सुभगं देवि बालायाः कौलिकेश्वरि ॥१३॥
ऋषिः स्याद्दक्षिणा मूर्तिः पंक्तिश्छन्द उदाहृतः । बाला सरस्वती देवि देवता
त्र्यक्षरी स्मृता ॥१४॥ बीजं तु वाग्भवं प्रोक्तं शक्तिः शक्तिरुदाहृता । कीलकं कामराजं तु
षडाशा बंधनं तथा ॥१५॥ भोगापवर्गसिद्ध्यर्थं विनियोगः प्रकीर्तितः ।

ऐं बीजं मे शिरः पातु क्लीं बीजं भृकुटी मम ॥१६॥ सौः भालं पातु मे बाला ऐं क्लीं सौः नयने मम। अं आं इं ईं श्रुतौ पातु बाला पञ्चाक्ष-री मम ॥१७॥ उं ऊं ऋं ॠं सदा पातु मम नासा-पुट द्वयं। लृं ॡं एं ऐं पातु गण्डौ ऐं क्लीं सौः त्रिपुरांबिका ॥१८॥ ओं औं अं अः मुखं पातु सौः क्लीं ऐं त्रिपुरेश्वरी। कं खं गं घं ङं मे पातु सौः क्लीं ऐं भगमालिनी ॥१९॥ चं छं जं झं ञं मे पातु बाहौ सौः सर्वसिद्धिदा। टं ठं डं ढं णं मे पातु वक्षौ क्लीं वीरनायिका ॥२०॥ तं थं दं धं नं मे पातु ऐं कुक्षौ कुलनायिका। पं फं बं भं मं मे पातु पार्श्वौ परम सुन्दरी ॥२१॥ यं रं लं वं पातु पृष्ठं सौः क्लीं ऐं विश्वमातृका। शं षं सं हं पातु नाभिं सौः सौः सौः त्रिगुणात्मिका ॥ २२॥ ळं क्षं कटिं सदा पातु क्लीं क्लीं क्लीं मातृकेश्वरी। ऐं ऐं ऐं पातु लिङ्गं मे भगलिङ्गा मृतेश्वरी ॥२३॥ ऐं क्लीं गुल्फं सदा पातु भगलिङ्ग

श्रीबाला पूजन यन्त्र

मं० मं० ३२३

स्वरूपिणी । सौ: क्लीं उरू सदा पातु वेदमाताष्ट सिद्धिदा ॥२४॥ सौ: ऐं जानु सदा पातु महामुद्रा-
भिमुद्रिता । सौ: ऐं क्लीं पातु मे जंघौ बाला त्रिभुवनेश्वरी ॥२५॥ ऐं ऐं सौ: सौ: पातु गुल्फौ
त्रैलोक्य विजयप्रदा । ऐं ऐं क्लीं क्लीं पातु पादौ बाला त्र्यक्षररूपिणी ॥२६॥ शिरस: पादपर्यन्तं
सर्वावयव संपुटम् । पायात्पादादि शीर्षान्तं ऐं क्लीं सौं सकलं वपु: ॥२७॥ ब्राह्मी मां पूर्वत: पातु
वह्नौ नारायणी तथा । माहेश्वरी दक्षिणे ऽव्यान्नैरृत्ये चण्डिकाऽवतु ॥२८॥ पश्चिमे पातु कौमारी
वायव्ये चापराजिता । वाराही तूत्तरे पायादीशान्यां नारसिंहिका ॥२९॥ प्रभाते भैरवी पातु मध्याह्ने
योगिनी क्रमात् । सायं मां वटुक: पायादर्द्धरात्रे शिवोऽवतु ॥३०॥ निशान्ते सर्वग: पातु सर्वदश्चक्र
नायक: । रणे राजकुले द्यूते विवादे शत्रुसंकटे ॥३१॥ सर्वत्र सर्वत: पातु ऐं क्लीं सौ: बीज
भूषिता ।

इतीदं कवचं दिव्यं बालाया: सारमुत्तमम् ॥३२॥ मन्त्रविद्यामयं तत्त्वं मातृकाक्षर
भूषितम् । ब्रह्मविद्यामयं ब्रह्मसाधनं मन्त्रसाधनम् ॥३३॥ य: पठेत्सततं भक्त्या धारयेद्वा महेश्वरि ।
तस्य सर्वार्थसिद्धि: स्यात् साधकस्य न संशय: ॥३४॥ रवौ भूर्जे लिखित्वादौ स्वयंभू कुसुमै: परम् ।
वन्ध्यापि काकवन्ध्यापि मृतवत्सापि पार्वति ॥३५॥ लभेत्पुत्रो महावीरो मार्कण्डेय समायुष: । चित्तं
दरिद्रो लभते मतिमान यश: स्त्रियम् ॥३६॥ य एतद्धारयेद्वर्म संग्रामे स रिपून् जयेत् । जित्वा
वैरिकुलं घोरं कल्याणं गृहमाविशेत् ॥३७॥ बहुनोक्तेन किं देवि धारयेन्मूर्ध्नि संततम् । इहलोके
धनारोग्यं परमायुर्यश: श्रियम् ॥३८॥ प्राप्य भक्त्या नरो भोगानन्ते याति परं पदं । इदं रहस्यं परमं
सर्वतत्त्वेषु ह्युत्तमम् ॥३९॥ गुह्याद्गुह्यमिमं नित्यं गोपनीयं स्वयोनिवत् ॥४०॥ इति कवचम् ॥

भा० टी०

अथ श्री बाला हृदय स्तोत्रम् :- " ॐ अस्य श्री बाला देव्या हृदयमहामन्त्रस्य सदाशिव ऋषिः अनुष्टुप् छन्दः श्रीत्रिपुरसुन्दरी बाला देवता वाग्भवं बीजं तार्तीयं शक्तिः कामराजं कीलकं श्री बालादेवी प्रीत्यर्थे पाठे विनियोगः ।

अथ ध्यानम् - वन्दे देवीं स्थितां बालां भास्वन्मण्डलमध्यगां । चन्द्रचन्द्रा-ननां तप्तां चामीकरसमप्रभाम् ॥ १ ॥ नृत्यत् खंजन नेत्रस्य लोकानत्यन्तवल्लभाम् । मध्यभागे लसत्काञ्ची मणिमुक्ताविनिर्मिताम् ॥ २ ॥ पदविन्यस्त हंसालीं शुकनासाविराजिताम् । करिशुण्डोरुयुगलां मत्तकोकिल निःस्वनाम् ॥ ३ ॥ पुस्तकं जपमालाञ्च वराभयकराणिनीम् । कुमारी वेश शोभाढ्यां कुमारी वृन्दमण्डिताम् ॥ ४ ॥ विद्रुमाधर शोभाढ्यां विद्रुमालिन खालिकाम् । क्वणत्कांचीं कलानाथ समान रुचिराननाम् ॥ ५ ॥ मृणाल बाहुलतिकां नानारत्नविराजिताम् । करपद्मसमानाभां पादपद्मविराजिताम् ॥ ६ ॥ चारुचम्पेलवसनां देवदेवनमस्कृताम् । चन्द्रेन्दु वलिपाङ्गीं रोमराजी विचित्रताम् ॥ ७ ॥ तिलपुष्प समानाभां नासारत्नसमन्विताम् । गजगण्डनितम्बाभां रम्भा जंघा विराजिताम् ॥ ८ ॥ हरविष्णु महेन्द्राद्यैः पूज्यते पादपङ्कजाम् । कल्याणीं कमलां कालीं कुञ्चिकां कमलेश्वरीम् ॥ ९ ॥ पार्वतीं परमां शक्तिं पवित्रां पावनीं शिवाम् । भवानीं भवपाशघ्नीं भीतिहां भुवनेश्वरीम् ॥ १० ॥ भवानीं भवशक्तिञ्च भेरुण्डां मुण्डमालिनीम् । जलंधरगिर्युत्संगां पूर्णगिर्यनुरागिणीम् ॥ ११ ॥ कामरूपां च कामाख्यां देवी कोट कृतालयाम् । ॐकार पीठनिलयां महामायां महेश्वरीम् ॥ १२ ॥ विश्वेश्वरीं च मधुरां नानारूप कृतापुरीम् । ऐं क्लीं सौः त्र्यक्षरां बालां तडित्लोमा कुमारिकां ॥ १३ ॥ ह्रौः ऐं हंसः नमो देवि त्रिपुरां जीव भैरवीम् । नारदो चास्य देवर्षि महाशान्ति फल प्रदाम् ॥ १४ ॥

मं०

मं० ३२५

भा० टी०

ॐ नमो श्री महालक्ष्म्यै लक्ष्मीं त्रिपुरभैरवीं । ॐ ह्रीं जूं सः प्राणग्रन्थि द्विधा-
जकि वचलपम् ॥१५॥ इयं सञ्जीविनी देवि मृतान् जीवत्व दायिनीं । क्रें फ्रें न क ल व र ष्ट्रं
-ष्ट्रौं श्रौं अमृतमावदेत् ॥१६॥ स्रावय स्रावय तथा श्रीं श्रीं मृत्युञ्जयाभिधा तथा । ॐ नमो प्रथ-
मामाष्य कालीबीजं द्विधा पठेत् ॥१७॥ कूर्चद्वयं तथा माया आगामिपदतो वदेत् । मृत्युं
छिंदि तथा भिंदि महामृत्युञ्जयो भवेत् ॥१८॥ तव शब्दं समाभाष्य खड्गेन च विदारय ।
द्विधा भाष्य महेशानि तदन्ते वह्नि सुन्दरी ॥१९॥ इयं देवि महाविद्या आगामि कालवंचि-
नी । प्रातर्दीपदलाकारं वाग्भवं रसनातले ॥२०॥

फलश्रुतिः- विचिन्त्य प्रजपेत्तच्च महाकवि भवेद् ध्रुवम् । मध्याह्ने काम-
राजाख्यं जपाकुसुम सन्निभम् ॥२१॥ विचिन्त्य हृदि मध्ये तु तच्च मन्त्रं जपेत्प्रिये । धर्मा-
-र्थ काम मोक्षाणां भाजनो जायते ध्रुवम् ॥२२॥ तार्तीयं चन्द्र सकाशं सायंकाले विचिन्त्य
च । प्रजपेत्तच्च देवेशि जायते मदनोपमः ॥२३॥ वाग्भवं कामराजं तु तार्तीयं वह्नि वल्लभा-
-म् । अयुतं प्रजपेन्नित्यं आगतं काल वंच्यते ॥२४॥ त्रिकोणं चक्रमालिख्य मायायुक्तं महेश्व-
-रि । यस्योपरि लिखेत्पश्चं मातृकामन्त्र गर्भितम् ॥२५॥ तस्योपरि समस्तीर्य चासनं रक्तवर्णक-
म् । तस्योपरि विशेद्देवि साधको प्राङ्मुखो निशि ॥२६॥ क्रमेण प्रजपेद् वर्णा वागादि नियतः
शुचिः । मण्डले त्रितये देवि प्राप्यते सिद्धिमुत्तमाम् ॥२७॥ नवयोन्यात्मकं चक्रं प्रजपेत्
शास्त्रवर्त्मना । प्रजपेत् त्र्यक्षरीं बालां सर्वसिद्धिप्रदो भवेत् ॥२८॥ यं यं चिन्तयते कामं तं
तं प्राप्नोति सर्वशः । इदं तु हृदयं देवि तवाग्रे कथितं मया ॥२९॥

श्री कामेश्वरी पूजन यन्त्र

मम भाग्यं च सर्वस्वं ब्रह्मादीनां च दुर्लभम्।
गोपनीयं त्वया भद्रे स्वयोनिरिव पार्वति ॥ ३०॥
शतावर्तेन देवेशि मानुषी वशमाप्नुयात्। सहस्रावर्तना देवि देवानां कार्यपेक्षणात् ॥ ३१॥
लक्षमावर्तनाद्देवि सुनासीर स्वमासनात्। क्षणात् स्रवति तत्र वै किं पुनः क्षुद्रजन्तवः ॥ ३२॥ बालादेव्या सुहृदयमज्ञात्वा यो जपेदधमः। निष्फला तस्य पूजा च बालादेवी च क्रुद्ध्यति ॥ ३३॥
तस्मात्सर्वप्रयत्नेन ज्ञात्वा देवि जपेन्मनुम्।
सर्वसिद्धिमवाप्नोति सर्वदा सुखमाप्नुतेत् ॥ ३४॥

॥ इति श्री जालसंवर महातन्त्रे त्रिपुरा बालादेव्या हृदयं सम्पूर्णम् ॥

टिप्पणी - भगवती त्रिपुरा बाला सुन्दरी का यह हृदय स्तोत्र नित्य पाठ करने योग्य तथा समस्त कामनाओं को पूर्ण करने वाला है।

अथ श्री बाला स्तवराजः- ॥ श्री पार्वत्युवाच ॥ गुणाधीश महादेव रहस्यं वद
स्तवरम् । बालादेव्याः परं श्रेष्ठं स्तवराजं कथं प्रभो ॥ ईश्वर उवाच ॥ शृणु प्राणेश्वरि वक्ष्ये
स्तवराजं महाफलम् । यन्न कस्यचिदाख्यातं गोप्यं कुरु सदाऽनघे ॥२॥ तव भक्त्या महेशानि
अकथ्यं कथ्यतेऽधुना । गोपनं कुरु रुद्राणि गोपयेन्मातृजारवत् ॥३॥

ॐ अस्य श्री बालास्तवराजस्तोत्रस्य श्रीमृत्युञ्जय ऋषिः । ककुप्छन्दः । श्री बाला
देवता । क्लीं बीजं । सौः शक्तिः । ऐं कीलकम् । भोगमोक्षार्थे जपे विनियोगः ।

त्रिबीज भाजा युक्तेन कराङ्गे न्यासमाचरेत् । ध्यानं ततो शृणुष्वाशु सर्वैश्वर्य
प्रदायकम् ॥४॥ अक्षपुस्त धरां रक्तां वराभयकराम्बुजाम् । चन्द्रमुण्डां त्रिनेत्रां च ध्यायेद्
बालां फलप्रदाम् ॥५॥

ऐं त्रैलोक्य विजयायै हुँ फट् । क्लीं त्रिगुणरहितायै हुँ फट् । सौः सर्वैश्वर्य
दायिन्यै हुँ फट् ॥६॥

नातः परतरा सिद्धिर्नातः परतरा गतिः । नातः परतरो मंत्रस्सत्यं सत्यं वदाम्य-
-हम् ॥७॥ रक्तां रक्तच्छदां तीक्ष्णां रक्तपां रक्तवाससीम् । स्वरूपां रत्नभूषां च लालजिह्वां
परां भजे ॥८॥ त्रैलोक्य जननीं सिद्धां त्रिकोणस्थां त्रिलोचनाम् । त्रिवर्ग फलदां शान्तां
वन्दे बीज त्रयात्मिकाम् ॥९॥ श्री बालां वारुणी प्रीतां बालार्क कोटि द्योतिनीम् । वरदां बुद्धि-
दां श्रेष्ठां वामाचारप्रियां भजे ॥१०॥ चतुर्भुजां चारुनेत्रां चन्द्रमौलि कपालिनीम् । चतुः-
षष्टि योगिनीशां वीरवन्द्यां भजाम्यहम् ॥११॥ कौलिकां कुलतत्त्वस्थां कौलाचारांक वाहनाम्

कौसुम्भवर्णां कौमारां कवर्मधारिणीं भजे ॥१२॥ द्वादशस्वररूपायै नमस्तेऽस्तु नमोनमः। नमो नमस्ते बालायै कारुण्यायै नमोनमः ॥१३॥ विद्याविद्यादविद्यायै नमस्तेऽस्तु नमो नमः। विद्याराज्ञै महादेव्यै शिवायै सततं नमः ॥१४॥

ऐं बालायै विद्महे क्लीं त्रिभुवनेश्वर्यै धीमहि। सौः तन्नो देवी प्रचोदयात्

ऐं बालायै स्वाहा।

द्वादशान्तालयां श्रेष्ठां षोडशाधारगां शिवाम्। पञ्चेन्द्रियस्वरूपाख्यां भूयो भूयो नमाम्यहम् ॥१५॥ ब्रह्मविद्यां ब्रह्मरूपां ब्रह्मज्ञानप्रदायिनीम्। वसुप्रदां वेदमातां वन्दे बालां शुभाननाम् ॥१६॥ अघोरां भीषणामाद्यामनन्तोपरि संस्थिताम्। देवदेवेश्वरीं भद्रां श्रीबालां प्रणमाम्यहम् ॥१७॥ भवप्रियां भवाधारां भगरूपां भगप्रियाम्। भयानकां भूतमातां भूदेव पूजितां भजे ॥१८॥ अकारादिक्षकारान्तां क्लीबाक्षरात्मिकां पराम्। वन्दे वन्दे महामायां भवभय भयापहाम् ॥१९॥ नाडीरूप्यै नमस्तेऽस्तु धातुरूप्यै नमोनमः। जीवरूप्यै नमस्यामि ब्रह्मरूप्यै नमोनमः ॥२०॥ नमस्ते मन्त्ररूपायै पीठगायै नमोनमः। सिंहासनेश्वरि तुभ्यं सिद्धिरूप्यै नमो नमः ॥२१॥ नमस्ते मातृरूपिण्यै नमस्ते भैरवप्रिये। नमस्ते योगपीठायै बालायै सततं नमः ॥२२॥ योगेश्वर्यै नमस्तेऽस्तु योगदायै नमोनमः। योगनिद्रास्वरूपिण्यै बालादेव्यै नमोनमः ॥२३॥ सुषुम्णायै नमस्तेऽस्तु सुषुप्तायै नमो नमः। सुयुम्नायै नमस्तेऽस्तु बालादेव्यै नमो नमः ॥२४॥ योनिप्रियायै योन्यै वै योनिरूप्यै नमो नमः। योनिसर्पि विलेपिन्यै योनिस्था-यै नमो नमः ॥२५॥

फलश्रुतिः- इतीदं स्तवराजाख्यं सर्वस्तोत्रोत्तमोत्तमम्। ये पठन्ति महेशानि पुनर्जन्म न विद्यते ॥२६॥ महाकष्टे महारोगे त्रिधा वा पञ्चधा पठेत्। महाकष्टं महारोगं नश्यते नात्र संशयः ॥२७॥ सर्वपापहरं पुण्यं सर्वस्फोट विनाशकम्। सर्वसिद्धि प्रदं श्रेष्ठं भोगैश्वर्य प्रदायकम् ॥२८॥ यज्ञानां षोडशानां च कोटि कोटिगुणोत्तरम्। फलं प्राप्नोति पाठेन चैकवारेण सुन्दरि ॥२९॥ षोडशानां च दानानां कोट्यर्बुदफलं स्मृतम्। पाठमात्रेण लभते नात्र कार्या विचारणा ॥३०॥ पूजान्ते पठते स्तोत्रं मैथुने च विशेषतः। पठेच्च चक्रपूजायां फलं वक्तुं न शक्यते ॥३१॥ विशेषतश्चार्धरात्रे ये पठन्ति महेश्वरि। सर्वारिष्टानि नश्यन्ति लभते वाञ्छितं फलम् ॥३२॥ धातृमूले बिल्वमूले वटधत्तूरमूलके। मुण्डोपरि शवपृष्ठे श्मशाने च चतुष्पथे ॥३३॥ शिवागारे शून्यगेहे चैकलिङ्गे शिवाग्रके। दुर्ग पर्वत चोद्याने वारुणीघट चार्चने ॥३४॥ पठेत्स्तोत्रं सदा भक्त्या त्रैलोक्य विजयी भवेत्। रजस्वला भगं स्पृष्ट्वा पठेदेकाग्रमानसः ॥३५॥ सत्यं सत्यं वरारोहे लभते परमं पदम्। तस्मात्सर्वप्रयत्नेन पठनीयं सदा बुधैः ॥३६॥

॥ इति श्री ब्रह्मयामल तन्त्रे श्री बालादेव्याः स्तवराजः सम्पूर्णम् ॥

टिप्पणी - श्री बाला त्रिपुर सुन्दरी देवी का यह स्तवराज साधक की समस्त कामनाओं की पूर्ति करने वाला है। यह समस्त पापों को नष्ट करता है तथा तीनों प्रकार के रोगों को दूर करता है। आधीरात के समय इसका पाठ करने से समस्त अरिष्ट नष्ट हो जाते हैं।

अथ श्री भुवनेश्वरी स्तोत्राणि : अब श्री भुवनेश्वरी देवी के कवच, हृदय तथा स्तोत्रादि का उल्लेख किया जाता है, जिनके नित्य पाठ से साधक की समस्त मनोभिलाषायें पूर्ण होती हैं।

अथ श्री भुवनेश्वरी त्रैलोक्य मङ्गल कवचम् :- देव्युवाच॥ भुवनेश्यारश्च देवेश या या विद्या: प्रकाशिता:। श्रुताश्चाधिगता: सर्वा: श्रोतुमिच्छामि साम्प्रतम् ॥१॥ त्रैलोक्यमङ्गलं नाम कवचं यत्पुरोदितम् ॥

ईश्वर उवाच॥ शृणु पार्वति वक्ष्यामि सावधानाऽवधारय॥२॥ त्रैलोक्य मङ्गलं नाम कवचं मन्त्र विग्रहम्। सिद्धविद्यामयं देवि सर्वैश्वर्य प्रदायकम् ॥३॥ पाठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्य भाग्भवेत् ॥४॥

त्रैलोक्य मङ्गलस्यास्य कवचस्य ऋषिश्शिव:। छन्दो विराट् जगद्धात्री देवता भुवनेश्वरी ॥५॥ धर्मार्थकाममोक्षेषु विनियोग: प्रकीर्तित:।

अथ कवचम्- ह्रीं बीजं मे शिर: पातु भुवनेशी ललाटकम् ॥६॥ ऐं पातु दक्ष नेत्रं मे ह्रीं पातु वामलोचनम्। श्रीं पातु दक्षकर्णं मे त्रिवर्णात्मा महेश्वरी ॥७॥ वामकर्णं सदा पातु ऐं घ्राणं पातु मे सदा। ह्रीं पातु वदनं देवी ऐं पातु रसनां मम ॥८॥ वाक्पुटा च त्रिवर्णात्मा कण्ठं पातु पराम्बिका। श्रीं स्कन्धौ पातु नियतं ह्रीं भुजौ पातु सर्वदा ॥९॥ क्लीं करौ त्रिपुटेशानी त्रिपुटैश्वर्यदायिनी। ॐ पातु हृदयं ह्रीं मे मध्यदेशं सदाऽवतु ॥१०॥ क्रौं पातु नाभिदेशं सा त्र्यक्षरी भुवनेश्वरी। सर्व बीज प्रजा पृष्ठं पातुं मे सर्वशङ्करी ॥११॥ ह्रीं पातु गुददेशं मे नमो भगवती

कटिम् । माहेश्वरी सदा पातु सक्थिनी जानुयुग्मकम् ॥१२॥ अन्नपूर्णा सदा पातु स्वाहा पातु पद
द्वयम् । सप्तदशाक्षरी पायादन्नपूर्णात्मिका परा ॥१३॥ तारं माया रमा कामः षोऽशार्णा ततः परम् ।
शिरस्था सर्वदा पातु विंशत्यर्णात्मिका परा ॥१४॥ तारं दुर्गे युगं रक्षिणी स्वाहेति च दशाक्षरी ।
जयदुर्गा घनश्यामा पातु मां पूर्वतो मुदा ॥१५॥ मायाबीजादिका चैवा दशार्णा च परा तथा । उत्तप्त
काञ्चनाभासा जयदुर्गाऽनलेऽवतु ॥१६॥ तारं ह्रीं दुं दुर्गायै नमोऽष्टार्णात्मिका परा । शङ्ख चक्रधनुर्बा-
-ण धरा मां दक्षिणेऽवतु ॥१७॥ महिषमर्दिनी स्वाहा वसुवर्णात्मिका परा । नैर्ऋत्यां सर्वदा पातु महि-
षासुरनाशिनी ॥१८॥ माया पद्मावती स्वाहा सप्तार्णा परिकीर्तिता । पद्मावती पद्मसंस्था पश्चिमे
मां सदावतु ॥१९॥ पाशांकुशपुटा माये हि परमेश्वरि स्वाहा । त्रयोदशार्णा ताराद्या अश्वारूढाऽनले
ऽवतु ॥२०॥ सरस्वती पञ्चशरे नित्यक्लिन्ने मदद्रवे । स्वाहा रव्यक्षरी विद्या मामुत्तरे सदाऽवतु
॥२१॥ तारं माया तु कवचं खे रक्षेत् सततं वधूः । हूं क्षें ह्रीं फट् महाविद्या द्वादशार्णाखिल प्रदा ॥
२२॥ त्वरिताष्टाहिभिः पायात् शिवकोणे सदा च माम् । ऐं क्लीं सौः ततो बाला मामूर्ध्वदेशतोऽवतु ॥
२३॥ बिन्द्वन्ता भैरवी बाला भूमौ च मां सदाऽवतु । इति ते कथितं पुण्यं त्रैलोक्य मङ्गलं परम् ॥२४॥
सारं सारतरं पुण्यं महाविद्यौघविग्रहम् । अस्यापि पठनात् सद्यः कुबेरोऽपि
धनेश्वरः ॥२५॥ इन्द्राद्याः सकला देवाः पठनाद्धारणाद्यतः । सर्वसिद्धीश्वराः सन्तः सर्वैश्वर्यमवाप्नुयुः
॥२६॥ पुष्पाञ्जल्यष्टकं दत्वा मूलेनैव पठेत्सकृत् संवत्सर कृतायास्तु पूजाया फलमाप्नुयात् ॥२७॥
प्रीतिमन्योन्यतः कृत्वा कमला निश्चला गृहे । वाणी च निवसेद्वक्त्रे सत्यं सत्यं न संशयः ॥२८॥
यो धारयति पुण्यात्मा त्रैलोक्यमङ्गलाभिधम् । कवचं परमं पुण्यं सोऽपि पुण्यवतां वरः ॥२९॥

श्री भुवनेश्वरी पूजन यन्त्र

सर्वैश्वर्य युतो भूत्वा त्रैलोक्य विजयी भवेत्। पुरुषो दक्षिणे बाहौ नारी वाम भुजे तथा ॥ ३०॥ बहु पुत्रवती भूत्वा वन्ध्यापि लभते सुतम्। ब्रह्मास्त्रादीनि शस्त्राणि नैव कृन्तन्ति तं जनम् ॥३१॥ एतत्कवचमज्ञात्वा यो जपेद् भुवनेश्वरीम्। दारिद्र्यं परमं प्राप्य सोऽचिरान्मृत्युमाप्नुयात् ॥ ३२॥

॥ इति श्री रुद्रयामले त्रैलोक्य मङ्गलं नाम श्रीभुवनेश्वरी कवचं सम्पूर्णम् ॥

टिप्पणी: भगवती भुवनेश्वरी का यह त्रैलोक्य मङ्गल नामक कवच साधक की समस्त कामनाएं पूर्ण करता है। इसका नित्य पाठ करने वाला समस्त ऐश्वर्यों से युक्त तथा त्रैलोक्य विजयी होता है। पुरुष को यह कवच दांई भुजा में तथा स्त्री को बाँई भुजा में धारण करने से सर्वत्र रक्षा होती है तथा सन्तान-सुख प्राप्त होता है।

मं०
मं०
३३
३३

भा०
टी०

अथ श्रीभुवनेश्वरी हृदय स्तवः -" देव्युवाच ॥ भगवन् ब्रूहि तत्स्तोत्रं सर्वकाम प्रसाधनम् । यस्य श्रवण मात्रेण नान्यच्छ्रोतव्यमिष्यते ॥ १॥ यदि मेऽनुग्रहः कार्यः प्रीतिश्चापि ममोपरि । तदिदं कथय भगवन् विमलं यन्महीतले ॥२॥

ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि सर्वकाम प्रसाधनम् । हृदयं भुवनेश्वर्याः स्तोत्रमस्ति यशोदयम् ॥

ॐ अस्य श्री भुवनेश्वरी हृदय स्तोत्रस्य शक्तिर्ऋषिः, गायत्री छन्दः, भुवनेश्वरी देवता. ह्रं बीजं, ईं शक्तिः, रं कीलकं सकलमनोवाञ्छित सिद्ध्यर्थे पाठे विनियोगः॥

ह्रीं श्रीं ऐं एवं हृदयादि, षडङ्गानि तथा एवं करन्यासः।

अथ ध्यानम् - ध्यायेद् ब्रह्मादिकानां कृतजनि जननीं योगिनीं योगयोनिं। देवानां जीवनायोज्ज्वलित जय परं ज्योतिरुग्राङ्गधात्रीम् ॥ शंखं चक्रं च बाणं धनुरपि दधतीं दोश्चतुष्काम्बुजातैर्मायामाद्यां विशिष्टां भवभव भुवनां भूभवा भारभूमिम् ॥

मानसोपचारैः सम्पूज्य पठेत् -

यदाज्ञया यो जगदाद्यशेषं सृजत्यजः श्रीपतिरौरसं वा। बिभर्ति संहर्ति भवस्तदन्ते भजामहे श्री भुवनेश्वरीं ताम् ॥ १॥ जगज्जनानन्दकरीं जयाख्यां यशस्विनीं यन्त्र सुयन्त्र योनिम् । जितामिताभित्र कृत प्रपञ्चां भजामहे श्री भुवनेश्वरीं ताम् ॥ २॥ हरौ प्रसुप्ते भुवनत्रयान्ते अवातरन्नाभिजपद्मजन्मा । विधिस्ततोऽध्ये विदधार यत्पदं भजामहे श्री भुवनेश्वरीं ताम् ॥ ३॥ न विद्यते क्वापि तु जन्म यस्या न वा स्थितिः सान्ततिकी हि यस्याः

न वा निरोधे ऽखिल कर्म यस्याः भजाम्यहे श्री भुवनेश्वरीं ताम् ॥ ४॥

कटाक्षमोक्षा चरणोग्रवित्ता निवेशितार्णाः करुणार्द्रचित्ता । सुभक्तये एति समीप्सितं या भजाम्यहे श्री भुवनेश्वरीं ताम् ॥ ५॥ यतो जगज्जन्म बभूव योनेस्तदेव मध्ये प्रतिपाति यां वा । तदत्ति यान्ते ऽखिलमुग्रकाली भजाम्यहे श्री भुवनेश्वरीं ताम् ॥ ६॥ सुषुप्तिकाले जनमध्यपन्त्या मया जनः स्वप्नमवैति किंचित् । प्रबुध्यते जागृति जीव एव भजाम्यहे श्री भुवनेश्वरीं ताम् ॥७॥ दयास्फुरत्कोरकटाक्षलाभान्नैकत्र यस्या प्रलभन्ति सिद्धाः । कवित्वमीशित्वमपि स्वतन्त्रा भजाम्यहे श्री भुवनेश्वरीं ताम् ॥ ८॥

लसन्मुखाम्भोरुहमुत्स्फुरन्तं हृदि प्रणिधाय दिशि स्फुरन्तः । यस्याः कृपार्द्रं प्रविकाशयन्ति भजाम्यहे श्री भुवनेश्वरीं ताम् ॥ ९॥ पदानुरागानुगतालिचित्ताश्चिरन्तन प्रेम परिप्लुतांगाः । मुनिर्मया : सन्ति प्रमुच्य यस्याः भजाम्यहे श्री भुवनेश्वरीं ताम् ॥ १०॥ हरिविरिञ्चिहरईश्वतारः पुरोऽवतिष्ठन्ति पर ब्रताङ्गाः । यस्या समिच्छन्ति सदानुकूलं भजाम्यहे श्री भुवनेश्वरीं ताम् ॥ ११॥ मनुं यदीयं हरमग्नि संस्थं ततश्च वामश्रुति चन्द्रसक्तम् । जपन्ति ये स्युः सुरवन्दितास्ते भजाम्यहे श्री भुवनेश्वरीं ताम् ॥ १२॥

प्रसीदतु प्रेमरसार्द्रचित्ता सदा हि सा श्री भुवनेश्वरी मे । कृपाकटाक्षेण कुबेरकल्पा भवन्ति यस्याः पदभक्तिभाजः ॥१३॥ मुदा सुपाठ्यं भुवनेश्वरीयं सदासतां स्तोत्रमिदं सुसेव्यं । सुखप्रदं स्यात् कलिकल्मषघ्नं सुश्रृण्वतां सम्पठतां प्रशस्यम् ॥ १४॥

एतत्तु हृदयस्तोत्रं पठेद्यस्तु समाहितः । भवेत्तस्येष्टदा देवी प्रसन्ना भुवनेश्वरी ॥

१५॥ ददाति धनमायुष्यं पुण्यं पुण्यमतिं तथा। नैष्ठिकीं देवभक्तिं च गुरुभक्तिं विशेषत: ॥१६॥
पूर्णिमायां चतुर्दश्यां कुजवारे विशेषत:। पठनीयमिदं स्तोत्रं देवसद्मनि यत्नत: ॥१७॥ यत्र कुत्रापि
पाठेन स्तोत्रस्यास्य फलं भवेत्। सर्व स्थानेषु देवेश्या: धृतदेह: सदा पठेत् ॥१८॥
पूर्ववत् न्यास ध्यानादि कुर्वन् निवेद्य प्रणमेत् ॥
॥ इति श्री भुवनेश्वरी हृदयस्तव: सम्पूर्णम् ॥

अथ श्री भुवनेश्वरी पञ्जर स्तोत्रम् :- "इदं श्री भुवनेश्वर्या: पञ्जरं भुवि दुर्लभम्।
येन संरक्षितो मर्त्यो बाणै: शस्त्रैर्न बाध्यते ॥१॥ ज्वर मारी पशु व्याघ्र कृत्या चौराद्युपद्रवै:। नद्यम्बु
धरणी विद्युत्कृशानु भुजगारिभि: ॥२॥
सौभाग्यारोग्य सम्पत्ति कीर्ति कान्ति यशोर्पदम्। ओं क्रों श्रीं ह्रीं ऐं सौ: पूर्वेऽ
धिष्ठाय मां पाहि चक्रिणि भुवनेश्वरी ॥३॥
योगविद्ये महामाये योगिनीगण सेविते। कृष्णवर्णे महद्भूते बृहत्कर्णे भयङ्करि
॥४॥ देवि देवि महादेवि मम शत्रून् विनाशय। उत्तिष्ठ पुरुषे किं स्वपिषि भयं मे समुपस्थितं॥
यदि शक्यमशक्यं तन्मे भगवति शमय स्वाहा। त्रैलोक्यमोहिन्यै विद्महे
विश्वजनन्यै धीमहि तन्न: शक्ति प्रचोदयात् ॥६॥
ममाग्नेय्यां स्थिता पाहि गदिनी भुवनेश्वरी। योगविद्ये महामाये योगिनीगण
सेविते ॥७॥ कृष्णवर्णे महद्भूते लम्बकर्णे भयङ्करि। देवि देवि महादेवि मम शत्रून् विनाशय॥८॥

उत्तिष्ठ पुरुषे किं स्वपिषि भयं मे समुपस्थितं।
यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ॥९॥

त्रैलोक्य मोहिन्यै विद्महे विश्व जनन्यै धीमहि
तन्नः शक्ति प्रचोदयात्। याम्ये ऽधिष्ठाय मां पाहि
शङ्खिनी भुवनेश्वरी ॥१०॥

नैर्ऋत्ये मां स्थिता पाहि खड्गिनी भुवनेश्वरी।
योगविद्ये महामाये शंखिनी भुवनेश्वरी ॥११॥
पश्चिमे मां स्थिता पाहि पाशिनी भुवनेश्वरी।
योगविद्ये महामाये शंखिनी भुवनेश्वरी ॥१२॥
वायव्ये मां स्थिता पाहि शक्तिनी भुवनेश्वरी।
योगविद्ये महामाये शंखिनी भुवनेश्वरी ॥१३॥
सौम्ये ऽधिष्ठाय मां पाहि चापिनी भुवनेश्वरी।
योगविद्ये महामाये शंखिनी भुवनेश्वरी ॥१४॥
ईशे ऽधिष्ठाय मां पाहि शूलिनी भुवनेश्वरी।
योगविद्ये महामाये शंखिनी भुवनेश्वरी ॥१५॥
ऊर्ध्वे ऽधिष्ठाय मां पाहि पद्मिनी भुवनेश्वरी।
योगविद्ये महामाये शंखिनी भुवनेश्वरी ॥१६॥

श्री मधुमती पूजन यन्त्र

अधस्तान्मां स्थिता पाहि वाणिनी भुवनेश्वरी। योगविद्ये महामाये शांखिनी भुवनेश्वरी ॥१८॥ ...
अग्रतो मां स्थिता पाहि पाशिनी भुवनेश्वरी। योगविद्ये महामाये शांखिनी भुवनेश्वरी ॥१९॥
पृष्ठतो मां स्थिता पाहि वरदे भुवनेश्वरी। योगविद्ये महामाये शांखिनी भुवनेश्वरी ॥२०॥
पश्चिमे मां सदा पाहि सांकुशे भुवनेश्वरी। योगविद्ये महामाये शांखिनी भुवनेश्वरी ॥२१॥
सर्वतो मां सदा पाहि सायुधे भुवनेश्वरी। योगविद्ये महामाये शांखिनी भुवनेश्वरी ॥२२॥ (?)
प्रोक्ता दिङ्मनवो देवि चतुर्दश शुभप्रदाः। एतत् पञ्जरमाख्यातं सर्वरक्षाकरं नृणाम् ॥२२॥
गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति। न भक्ताय प्रदातव्यं नाशिष्याय कदाचन ॥२३॥
सिद्धिकामो महादेवि गोपयेन्मातृजारवत्। जपकाले होमकाले पूजाकाले विशेषतः ॥२४॥
दीपस्यारम्भकाले वै यः कुर्यात्पञ्जरं सुधीः। सर्वान् कामानवाप्नोति प्रत्यूहैर्नाभिभूयते ॥२५॥
रणे राजकुले द्यूते सर्वत्र विजयी भवेत्। कृत्या रोग पिशाचाद्यैर्न कदाचित् प्रबाध्यते ॥२६॥
प्रातः काले च मध्याह्ने सन्ध्यायामर्द्धरात्रिके। यः कुर्यात् पञ्जरं मर्त्यो देवीं ध्यात्वा समाहितः॥
कालमृत्युमपि प्राप्तं जयेदत्र न संशयः। ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रं न जगन्ति च ॥
पुत्रवान् धनवांल्लोके यशस्वी जायते नरः ॥२७-२८-२९॥

॥ इति श्री रुद्रयामले भुवनेश्वरी पञ्जर स्तोत्रम् समाप्तम् ॥

इस पंजर स्तोत्र का नित्य प्रातः, मध्याह्न, सायं अथवा अर्द्धरात्रि में पाठ करने से समस्त कामनाएं पूर्ण होती हैं।

अथ श्रीतारास्वरूपाख्य स्तवराज :- "श्रीकण्ठामर केशवर्ण घटितं चन्द्रार्द्धविन्दूज्ज्वलं, बीजं यत्परमं गुणत्रयमयं कामप्रदं मुक्तिदम् ॥ मातः शङ्कर वल्लभे प्रतिदिनं ध्यायन्ति ये ये सदा ; ते ते यान्ति चिदात्मकं हरिहर ब्रह्मादि साम्यं मुदा ॥ १॥ व्योमार्णं वामनेत्रान्वितमनल युतं बिन्दु चन्द्रार्धयुक्तं बीजं ते गुह्यमेतत्त्रिभुवन जननि त्रिक्षणे ये जपन्ति ॥ तेषां वक्त्रारविन्दे विहरति मधुरा गद्य पद्यावली गीर्मतिश्चन्द्रार्धचूडे सकलभयहरे सिद्धिभाजां नराणाम् ॥२॥ शुक्रार्णं शत-नास्यं कलित शशिकला बिन्दुभूषं सवह्नि भ्राजद् वामाक्षि युक्तं जननि तव वधूबीजमेतज्जपंति ते ते लोले क्षणानां विगलित रसना पीत वक्षोज वासः केशानां चित्तमाशु स्मरहर महिले मोहयंति प्रकामं ॥३॥ ईशानं वाम कर्णोल्लसित शशिकला विन्दु युक्तं प्रगुह्यं बीजं मातस्त्वदीयं यदि जप-ति जनो वारमेकं जडात्मा । चञ्चत्पञ्चाशदुग्र ग्रथित नर शिरो मालिका क्रान्त कण्ठे, मातः शैलेन्द्र पुत्रि त्रिभुवनमपि संक्षोभयत्येव शीघ्रम् ॥४॥

पश्चादस्त्रं तदनु पुरहर महिले बीजमत्यन्त गुह्यं, भालोद्यत् पञ्चमुद्रे प्रकट विकट दंष्ट्रोग्र वक्त्रारविन्दे ॥ नित्यं ये भावयन्ति प्रतिदिनममले घोररूपाट्टहासे ते नूनं भ्रामय-न्ति त्रिजगदघहरे चक्रवद् विश्वमेतत् ॥५॥ माया स्त्री कूर्च बीजैर्नवतपन हरित् सार्द्र चन्द्रांशु वर्णे, मातर्न्नीलाख्यमेतत्तव मनुमनिशं ये प्रकामं जपन्ति ॥ वित्तैर्वित्तेशतुल्याः सुरगुरु सदृशा स्तर्क काव्यागमादौ । ते ते नीलांबुदाली रुचिरुचिर तनो कामरूपा भवन्ति ॥६॥

भवान्येभिर्बीजैर्हिमगिरि सुते चास्त्र सहितैर्निगूढं ये मातस्तव मनु जपन्त्येकजटि-ले । त्रियामानाथार्ध प्रविलसित भाले त्रिनयने ; गृहे तेषां नित्यं निवसति मुदा सिन्धुतनया ॥७॥

अमीभिर्वीजैस्ते प्रणवसहितैः शैलतनये। निजस्थाने स्वस्थं परिजपति पञ्चाक्षर मिति ।। स सिद्धः स
त्यागी स तु पुरहरोऽसौ मुरहरः। स धाताऽसौ मुक्तो भवति हि चिदानन्दरसिके ।।८।।
शवासीनां कण्ठे कलितनृकरीटीं करलसत् । कपालासि श्यामोत्पलरुचिरकर्त्रीं त्रिनय-
नाम् ।। नवाम्भोदश्यामां विकटरदभीमां पृथुकुचां। स देव त्वां ध्यायन् जननि स जडो वाक्पति
सम: ।।९।। तटे नद्याः सिन्धोर्गिरिशिरसि मालूरगहने। श्मशाने गोष्ठे वा गिरिश भवने शून्यसदने।।
हविष्याशी लक्षं प्रजपति वशीभावनपरः। स सर्वज्ञो वाग्मी भवति सुजनो पीनजघने ।। १०।।
मुदा मातः शुद्धोदकरुचिर गन्धाक्तसलिलैः। स्वयम्भू पुष्पस्रक् कुलतनुभगक्षालित
जलैः ।। शिवे त्वां संध्यायन् हरमहिषि सन्तर्पयति यः। सदैव स्त्रीवृन्दं वशयति स विद्या-
धरपतिः ।। ११।। जवापुष्पैर्विल्वैर्मरुवकुलमुख्यैश्च कुसुमैः। सुगन्धैः कर्पूरैरगरुसहितैर्धूपनिकरैः
प्रदीपैरुज्ज्वालैर्घृतरचितनैवेद्यनिकरैः स्तवार्चां यः कुर्यात् स भवति हि पूज्यः क्षितिपतेः ।।१२।।
स दूर्वाभिः पद्मैस्त्रिमधुललितैः श्रीफलदलैर्घृतैर्गव्यैरक्तैः सुकुल भगलिङ्गामृ
त रसैः ।। त्रिकोणे कुण्डे यो हुतवहमुखे होमविधिना। जुहोति त्वां मातः स भवति कवीन्द्रः
क्षितिपतिः ।। १३ ।। निशीथे कल्याणि प्रमुदितमना यः पितृवने। बलिं ते मेषाद्यैः स नरमहिषै-
र्वा परिचरेत् ।। स राजानं क्षिप्रं वशयति मृगाक्षी समुदयं। त्रिलोकी वा भूमौ स भवति नरः
सत्कविवरः ।।१४।।
महापूजां मातस्तव वितनुते यस्तु मधुना तथा मांसैर्मत्स्यैर्विविधनवमुद्रादिभि
रपि ।। वरस्त्रीभिः सार्धं त्रिभुवनविनोदेन मुदितो। निशीथे संसारात्स भवति विमुक्तः पशु-

भपात ॥२५॥ त्रिकोणे पीठे त्वां वरनिभुवना सक्त
हृदयो । महाकालेनोच्चपुलकनिचयां स्मेर वदनाम्
स्वयं नक्तं कान्तारतिरस समासक्त हृदयो। मनु-
ष्यो यो ध्यायेद् भवति शिवतुल्यः स धरणौ॥
॥२६॥

समुत्तुंगापीन स्तनजघन राजत्कुलवधू
व्यवाय व्यासक्तो जपति तव भक्तो यदि मनुम्
गलद् वासः केशो जननि मनुजो मेदिनितले।
स सिद्धीशः शक्त्या जयति सुचिरं सर्व सुजनम्
॥२७॥ भवानि श्रीमातर्निजगलित वीर्यार्चितकु-
रमव प्रेम्णा लब्ध्वा वचन भुवनेशी युत मनुम्॥
समुच्चार्य्य क्षोणीतनय दिवसे प्रेत सदने। स दी-
-र्घायुर्वाग्मी भवति शत होमात् क्षिति तले॥२८॥

अजस्रं यो मन्त्रं जपति भूमीधरसुते।
विचिन्त्याग्रे मातः कुसुमललितं मारभवनम्॥
धरण्यां कन्दर्प प्रतिमतनुभृतः स सकलान्। निजे
ष्टानाप्नोति प्रविशति मुदा तारिणिपदम् ॥२९॥

दशमहाविद्यान्तर्गत श्रीतारा पूजन यन्त्र

तमोग्रस्ते चन्द्रे यदि जपति लोकस्तव मनुं । नवम्यां वा मातर्धरणिधर कन्ये वितनुते ।। तथा सूर्ये पृथ्वीवलयतिलकः काव्यतरनी पयोधिः सिद्धीनां भवति भवनं सर्वविदितः ।। २० ।।

सदापादाम्भोजे भ्रमत हृदयं भृङ्ग इव मे । सदा पाणिद्वन्द्वं परिचरत कर्णस्तव कथाम् ।। शृणोतु त्वत्कीर्तिं हरमहिषि गीर्गायत सदा । सदा दृष्टिर्भूयाद् भवदनुचरा लोकनपरा ।। २१ कदा काले शैलेश्वरतनु भवे पादयुगलं । मुदा द्रक्ष्ये ब्रह्म प्रमुख विबुधानां परिणुतम् ।। कृपापारावारे भवजनन भीतैक शरणे । शरण्ये कारुण्यं मयि वितर दीने भगवति ।। २२ ।।

सदैव स्तोत्रं यः पठति मुदितः साधकवरो । न दारिद्र्यं तस्य प्रभवति कदाचित क्षिति तले ।। त्रिवर्गो हस्ते स्याज्जगदखिल मेतच्च वशगं । चिरं जीवन्नन्ते जननि लभते मोक्षपदवीम् ।। २३ ।। इदं स्तोत्रं मातः प्रपठति दिवारात्रिमनिशं । स सर्वज्ञो योगीश्वरनिकर चूडामणिसमः ।। जडोऽपि त्वद्रूपं जपति यदि संचिन्त्य मनसा । त्वदग्रे भूयोच्चैः क्षितिपति समानः क्षिति तले ।। २४ ।।

महापुण्यं धन्यं सकल पुरुषार्थैकनिलयं । यशस्यं चायुष्यं सतत भवतापापहमिदम् । रहस्यं प्राकाम्यं नहि खलु कदाचित पशुजने । पठेत पूजाकाले जननि लभते मोक्ष पदवीम् ।। २५ ।।

।। इतिश्री फेत्कारिणी तन्त्रे श्रीशिव पार्वती सम्वादे श्री तारा स्वरूपाख्य स्तोत्रं सम्पूर्णम् ।।

इस स्तोत्र के नित्य पाठ से भगवती तारा प्रसन्न होकर साधक को अभीप्सित फल देती है।

अथ श्रीकालिका स्तोत्राणि :- अब भगवती काली के स्तोत्र, कवच, हृदय आदि का उल्लेख किया जाता है। इनके नित्य-पाठ से साधक की समस्त कामनाऐं पूर्ण होती हैं।

अथ श्रीत्रैलोक्य विजय काली कवचम् :- श्रीसदाशिव उवाच ॥ त्रैलोक्य विजयस्यास्य कवचस्य ऋषिः शिवः। छन्दोऽनुष्टुप्देवता च आद्याकाली प्रकीर्तिता ॥ माया बीजं बीजमिति रमा शक्तिरुदाहृता। क्रीं कीलकं काम्यसिद्धौ विनियोगः प्रकीर्तितः ॥

अथ न्यासः शिरसि ओं सदाशिवाय ऋषये नमः। मुखे ओं अनुष्टुप् छन्दसे नमः। हृदि। ओं आद्या कालिकायै देवतायै नमः गुह्ये। ओं ह्रीं बीजाय नमः पादयोः। ॐ श्रीं शक्तये नमः सर्वाङ्गे। ॐ क्रीं कीलकाये नमः सकल कामना सिद्ध्यर्थे जपे विनियोगः॥

अथ कवचम्- ह्रीमाद्या मे शिरः पातु श्रीं काली वदनं मम। हृदयं क्रीं पराशक्तिः पायात्कण्ठं परात्परा ॥१॥ नेत्रे पातु जगद्धात्री कर्णौ रक्षतु शङ्करी। घ्राणं पातु महामाया रसनां सर्वमङ्गला ॥२॥ दन्तान् रक्षतु कौमारी कपोलौ कमला तथा। ओष्ठाधरौ क्षमा रक्षेच्चिबुकं चारुहासिनी ॥३॥ ग्रीवां पायात्कुलेशानी ककुत्पातु कृपामयी। द्वौ बाहू बाहुदा रक्षेत्करौ कैवल्यदायिनी ॥४॥ स्कन्धौ कपर्दिनी पातु पृष्ठं त्रैलोक्यतारिणी। पार्श्वे पायादपर्णा मे कटिं मे कमठासना ॥५॥ नाभौ पातु विशालाक्षी प्रजास्थानं प्रभावती। उरू रक्षतु कल्याणी पादौ मे पार्वती सदा ॥६॥ जयदुर्गाऽवतु प्राणान्सर्वाङ्गं सर्वसिद्धिदा। रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन च ॥ तत्सर्वं मे सदा रक्षेदाद्याकाली सनातनी ॥७-८॥

फलश्रुति :- इति ते कथितं दिव्यं त्रैलोक्य विजयाभिधम्। कवचं कालिका देव्या आद्यायाः परमाद्भुतम् ॥१९॥ पूजाकाले पठेद्यस्तु आद्याधिकृत मानसः। सर्वान्कामानवाप्नोति तस्याद्याशु प्रसीदति ॥२०॥ मन्त्रसिद्धिर्भवेदाशु किङ्कराः क्षुद्र सिद्धयः। अपुत्रो लभते पुत्रं धनार्थी प्राप्नुयाद्धनम् ॥२१॥ विद्यार्थी लभते विद्यां कामी कामानवाप्नुयात्। सहस्रावृत्ति पाठेन वर्मणे ऽस्य पुरस्क्रिया ॥२२॥ पुरश्चरण सम्पन्नं यथोक्तफलदं भवेत्। चन्दनागरु कस्तूरी कुङ्कुमै रक्तचन्दनैः ॥२३॥ भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि। शिखायां दक्षिणे बाहौ कण्ठे वा साधकः कटौ ॥२४॥ तस्याद्या कालिका वश्या वाञ्छितार्थं प्रयच्छति। न कुत्रापि भयं तस्य सर्वत्र विजयी कविः ॥२५॥ अरोगी चिरजीवी स्याद् बलवान्धारण क्षमः। सर्व विद्यासु निपुणः सर्वशास्त्रार्थ तत्त्ववित् ॥२६॥ वशे तस्य महीपाला भोगमोक्षौ कर स्थितौ। कलिकल्मष युक्तानां निःश्रेय स्करं परम् ॥२७॥

॥ इति श्री महानिर्वाण तन्त्रे त्रैलोक्य विजयं नाम कालिका कवचं सम्पूर्णम् ॥

अथ श्रीकालिका हृदय स्तोत्रम् :- तत्रादौ विनियोगः ॥ ॐ अस्य श्री दक्षिणकालिकाया हृदय स्तोत्र महा मन्त्रस्य महाकाल भैरव ऋषिः उष्णिक् छन्दः ह्रीं बीजं हूं शक्तिः क्रीं कीलकं महायोद्धा स्वरूपिणी महाकाल महिषी श्री दक्षिण कालिकाम्बा देवता प्रसादात् धर्मार्थकाममोक्षार्थे जपे विनियोगः।

श्री काली पूजन यन्त्र

अथ षडङ्ग न्यास :— "ॐ क्रां ॐ क्रीं ॐ क्रूं ॐ क्रैं ॐ क्रौं ॐ क्रः" - इत्यनेन करषडङ्गः

अथ ध्यानम् :— "शवारूढां महाभीमां घोरदंष्ट्रां ... प्रलय घनघटां घोररूपां प्रचण्डां। दिग्वस्त्रां पिङ्गकेशीं डमरुमथसृणीं खड्गपाशान पाणि ॥ नागं घंटा कपालं करसरसिरुहां कालिकां कृष्णवर्णां। ध्यायामि ध्येयमाता सकल सुखकरी कालिकां तां नमामि ॥

अथ हृदयम् :- " ॐ क्रीं क्रीं क्रूं ह्रूं ह्रूं ह्रूं ह्रीं ह्रीं ॐ ॐ ॐ ॐ हंसः सोऽहं ॐ हंसः ॐ ह्रीं श्रीं ऐं क्रीं हूं ह्रीं स्वाहा स्वरूपिणी । अं आं रूपयोगेण योगसूत्रग्रंथिं भेदय भेदय ईं ईं रुद्र ग्रंथिं भेदय भेदय ॐ ॐ विष्णु ग्रंथिं भेदय भेदय ॐ अं क्रीं आं क्रीं इं क्रों ईं क्रों उं हूं ऊं हूं ऋं ह्रीं ॠं ह्रीं लृं दं लॄं क्लिं ऐं णे ऐं कालि ओं के औं क्रीं ॐ अं क्रीं क्रीं अः ह्रूं ह्रूं ह्रीं ह्रीं स्वाहा

महाभैरवी हूं हूं महाकालरूपिणी ह्रीं ह्रीं प्रसीद प्रसीद रूपिणी ह्रीं ह्रीं ठः ठः क्रीं अनिरुद्धा सरस्वती
हूं हूं ब्रह्म विष्णु ग्रहबन्धनी रुद्रग्रहबन्धनी गोत्रदेवता ग्रहबन्धनी आधि व्याधि ग्रहबन्धनी सन्निपात
ग्रहबन्धनी सर्वदुष्ट ग्रहबन्धनी सर्वदानव ग्रहबन्धनी सर्वदेव ग्रहबन्धनी सर्वगोत्र देवता ग्रहबन्धनी
सर्व ग्रहान् त्रोटि त्रोटि चिक्पट चिक्पट क्रीं कालिके ह्रीं कपालिनि हूं कुल्ले ह्रीं कुरुकुल्ले हूं विरो-
-धिनि ह्रीं विप्रचित्ते स्फ्रें ह्रौं उग्रे उग्रप्रभे ह्रीं उ दीप्ते ह्रीं घने हूं त्विषे ह्रीं नीले स्त्रूं स्त्रूं नील-
-पताके ॐ ह्रीं घने घनाशने ह्रीं बलाके ह्रीं ह्रीं ह्रीं मिते असिते असित कुसुमोपमे हूं हूं हूंकारि
हां हां हांकारि कां कां काकिनि रां रां राकिनि लां लां लाकिनि हां हां हाकिनि क्षिस क्षिस मम
मम उत्त उत्त तत्त्वविग्रहे अरूपे अमाये विमले अजिते अपराजिते क्रीं स्त्रीम् स्त्रीम् हूं हूं
ऐं ऐं दुष्ट विद्राविणी आं ब्राह्मी ईं माहेश्वरी ऊं कौमारी ॠं वैष्णवी लृं वाराही ऐं इन्द्रा-
-णी ऐं ह्रीं क्लीं चामुण्डायै औं महालक्ष्म्यै अः हूं हूं पंचप्रेतोपरिसंस्थितायै श्मशालंकारायै चिता-
-न्तस्थायै भैं भैं भद्रकालिके दुष्टान् दारय दारय दारिद्र्यं हन हन पापं मथ मथ आरोग्यं कुरु
कुरु विरूपाक्षी विरूपाक्ष वरदायिनि अष्टभैरवीरूपे ह्रीं नवनाथात्मिके ॐ ह्रीं ह्रीं सत्ये
रां रां राकिनि लां लां लाकिनि हां हां हाकिनि कां कां काकिनि क्षिस क्षिस वद वद उत्त उत्त
तत्त्व विग्रहे अरूपे स्वरूपे आद्यमाये महाकालमहिषि ह्रीं ह्रीं ह्रीं ॐ ॐ ॐ ॐ क्रीं क्रीं क्रीं
हूं हूं ह्रीं ह्रीं महामाये दक्षिणकालिके ह्रीं ह्रीं हूं हूं क्रीं क्रीं क्रीं मां रक्ष रक्ष मम पुत्रान्
रक्ष रक्ष मम स्त्रीं रक्ष रक्ष ममोपरि दुष्टबुद्धि दुष्ट प्रयोगान् कुर्वन्ति कारयन्ति करिष्य-
-न्ति तान् हन हन मम मन्त्रसिद्धिं कुरु कुरु दुष्टान् दारय दारय दारिद्र्यं हन हन पापं मथ

मम आरोग्यं कुरु कुरु आत्मतत्त्वं देहि देहि हंसः सोऽहं ॐ क्रीं क्रीं ॐ ॐ ॐ ॐ ॐ सप्तकोटि स्वरूपे आद्ये आद्यविद्ये अनिरुद्धा सरस्वति स्वात्मचैतन्यं देहि देहि मम हृदये तिष्ठ तिष्ठ मम मनोरथं कुरु कुरु स्वाहा।" — **इति हृदयम्।**

फलश्रुतिः- इदन्तु हृदयं दिव्यं महापापौघ नाशनम्। सर्वदुःखादि शमनं सर्व व्याधि विनाशनं ॥१॥ सर्वशत्रु क्षयकरं सर्वसङ्कट नाशनं। ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमम्॥२॥ सर्वशत्रुहरं त्वेव हृदयस्य प्रसादतः। भौमवारे च संक्रान्तौ अष्टम्यां जन्मवासरे॥३॥ चतुर्दश्यां च षष्ठ्यां च शनिवारे च साधकः। हृदयानेन संकीर्त्य किं न साधयते नरः॥४॥ अप्रकाश्यमिदं देवि हृदयं देव दुर्लभम्। सत्यं सत्यं पुनः सत्यं यदिच्छेच्छुभमात्मनः॥५॥ प्रकाशयति देवेशि हृदयं मन्त्र विग्रहम्। प्रकाशात् सिद्धहानिः स्यात् शिवस्य निलयं व्रजेत्॥६॥ दारिद्र्यं तु चतुर्दश्यां योषितः संगमैः सह। वारत्रयं पठेद्देवि प्रभाते साधकोत्तमः॥७॥ षण्मासेन महादेवि कुबेर सदृशो भवेत्। विद्यार्थी प्रजपेन्मन्त्रं पौर्णिमायां सुधाकरे॥८॥ सुधीसंवर्तिनों ध्यायेद्देवि माबर्णैः सह। शतमष्टोत्तरं मन्त्रं कविर्भवति वत्सरात्॥९॥ अर्कवारेऽर्कबिम्बस्थां ध्यायेद्देवी समाहितः। सहस्रं प्रजपेन्मन्त्रं देवता दर्शनं कलौ॥१०॥ भवत्येव महेशानि कालीमन्त्र प्रभावतः। मकारपञ्चकं देवि तोषयित्वा यथाविधि॥११॥ सहस्रं प्रजपेन्मन्त्रं इदन्तु हृदयं पठेत्। सकृदुच्चारमात्रेण पलायन्ते महापदः॥१२॥ उपपातक दौर्भाग्य शमनं भुक्ति मुक्तिदम्। क्षयरोगाग्नि कुष्ठघ्नं मृत्यु संहारकारकम्॥१३॥ सप्तकोटिमहामन्त्र पारायण फलप्रदम्। कोट्यश्वमेध फलदं जरामृत्यु निवारकम्॥१४॥ किंपुनर्बहुनोक्तेन सत्यं

सत्यं महेश्वरी । मद्यमांसासवैर्देवि मत्स्यमाक्षिक पायसैः ॥ २५॥ शिवाबलिं प्रकर्तव्यमिदन्तु हृदयं पठेत् । इहलोके भवेद्राजा मृतो मोक्षमवाप्नुयात् ॥ २६॥ शताव धनो भवति मासमात्रेण साधकः। संवत्सर प्रयोगेन साक्षात् शिवमयो भवेत् ॥ २७॥ महादारिद्र्य निर्मुक्तं शापानुग्रहणे क्षमः । काशी यात्रा सहस्राणि गंगास्नान शतानि च ॥ २८॥ महाहत्यादिभिर्पापैः महापातक कोटयः । सद्यः प्रलयतां याति मेरुमन्दिर सन्निभम् ॥ २९॥ भक्तियुक्तेन मनसा साधयेत् साधकोत्तमः । साधकाय प्रदातव्यं भक्तियुक्ताय चेतसे ॥ २०॥ अन्यथादापयेद्यस्तु स नरो शिवहा भवेत् । अभक्ते वञ्चके धूर्ते मूढे पण्डितमानिने ॥ २१॥ न देयं यस्य कस्यापि शिवस्य वचनं यथा । इदं सदाशिवेनोक्तं साक्षात्कारं महेश्वरि ॥ २२॥"

॥ इति श्री देवीयामले श्री कालिका हृदय स्तोत्रम् समाप्तम् ॥

अथ श्री जगन्मङ्गल काली कवचम् :- ॥ भैरव्युवाच ॥ कालीपूजा श्रुता नाथ भावाश्च विविधाः प्रभो । इदानीं श्रोतुमिच्छामि कवचं पूर्व सूचितम् ॥ १॥ त्वमेव शरणं नाथ त्राहि मां दुःख सङ्कटात् । सर्वदुःख प्रशमनं सर्व पाप प्रणाशनम् ॥ २॥ सर्व सिद्धि प्रदं पुण्यं कवचं परमाद्भुतम् अतो वै श्रोतुमिच्छामि वद मे करुणानिधे ॥ ३॥

श्रीभैरव उवाच ॥ रहस्यं शृणु वक्ष्यामि भैरवि प्राणवल्लभे । श्रीजगन्मङ्गलं नाम कवचं मन्त्र विग्रहम् ॥ ४॥ पठयित्वा धारयित्वा त्रैलोक्यं मोहयेत् क्षणात् । नारायणोऽपि यद्

धृत्वा नारी भृत्वा महेश्वरम् ॥५॥ योगिनं क्षोभमनयत् यद् धृत्वा च रघूद्वह:। वरदीप्तां जघानैव
रावणादि निशाचरान् ॥६॥ यस्य प्रसादादीशो ऽपि त्रैलोक्य विजयी प्रभु:। धनाधिप: कुबेरोऽपि
सुरेशोऽभूच्छचीपति: ॥७॥ एवं च सकला देवा: सर्व सिद्धीश्वरा: प्रिये ॥

ॐ श्री जगन्मङ्गलस्याय कवचस्य ऋषि: शिव:। छन्दो ऽनुष्टुप् देवता च
कालिका दक्षिणेरिता ॥८॥ जगतां मोहने दुष्ट विजये भुक्तिमुक्तिषु। योषिदाकर्षणे चैव वि-
नियोग: प्रकीर्तित: ॥९॥

अथ कवचम्- "शिरो मे कालिका पातु क्रींकारैकाक्षरी परा। क्रीं क्रीं क्रीं
मे ललाटं च कालिका खड्ग धारिणी ॥१०॥ हूं हूं पातु नेत्रयुग्मं ह्रीं ह्रीं पातु श्रुति द्वयम्। दक्षि-
-णे कालिके पातु घ्राणयुग्मं महेश्वरि ॥११॥ क्रीं क्रीं क्रीं रसनां पातु हूं हूं पातु कपोलकम्। वद-
नं सकलं पातु ह्रीं ह्रीं स्वाहा स्वरूपिणी ॥१२॥ द्वाविंशत्यक्षरी स्कन्धौ महाविद्याखिलप्रदा।
खड्गमुण्ड धरा काली सर्वाङ्गमभितो ऽवतु ॥१३॥ क्रीं हूं ह्रीं त्र्यक्षरी पातु चामुण्डा हृदयं मम।
ऐं हूं ओं ऐं स्तनद्वन्द्वं ह्रीं फट् स्वाहा ककुत्स्थलम् ॥१४॥ अष्टाक्षरी महाविद्या भुजौ पातु
सकर्तृका। क्रीं क्रीं हूं हूं ह्रीं ह्रीं पातु करौ षडक्षरी मम ॥१५॥ क्रीं नाभिं मध्यदेशं च दक्षिणे
कालिकेऽवतु। क्रीं स्वाहा पातु पृष्ठं च कालिका सा दशाक्षरी ॥१६॥ क्रीं मे गुह्यं सदा पातु
कालिकायै नमस्ततः। सप्ताक्षरी महाविद्या सर्वतन्त्रेषु गोपिता ॥१७॥ ह्रीं ह्रीं दक्षिणे कालिके
हूं हूं पातु कटिद्वयम्। काली दशाक्षरी विद्या स्वाहान्ता चोरुयुग्मकम् ॥१८॥ ॐ ह्रीं क्रीं मे
स्वाहा पातु जानुनी कालिका सदा। काली हृन्नामविद्येयं चतुर्वर्ग फलप्रदा ॥१९॥

क्रीं हूं ह्रीं पातु सा गुल्फं दक्षिणे कालिकेऽवतु। क्रीं हूं ह्रीं स्वाहा पदं पातु चतुर्दशाक्षरी मम ॥२०॥ खड्गमुण्डधरा काली वरदाभयधारिणी। विद्याभिः सकलाभिः सा सर्वाङ्गमभितोऽवतु ॥२१॥ काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी। विप्रचित्ता तथोग्रोग्रप्रभा दीप्ता घनत्विषः ॥२२॥ नीला घना वलाका च मात्रा मुद्रा मिता च माम्। एताः सर्वाः खड्गधरा मुण्डमाला विभूषणाः ॥२३॥ रक्षन्तु मां दिग्विदिक्षु ब्राह्मी नारायणी तथा। माहेश्वरी च चामुण्डा कौमारी चापराजिता ॥२४॥ वाराही नारसिंही च सर्वाश्चामित भूषणाः। रक्षन्तु स्वायुधैर्दिक्षु मातरः मां यथा तथा ॥२५॥

फलश्रुतिः - इति ते कथितं दिव्यं कवचं परमाद्भुतम्। श्रीजगन्मङ्गलं नाम महामन्त्रौघ विग्रहम् ॥२६॥ त्रैलोक्याकर्षणं ब्रह्म कवचं मन्मुखोदितम्। गुरु पूजां विधायाथ विधिवत्प्रपठेत्ततः ॥२७॥ कवचं त्रिः सकृद्वापि यावज्ज्ञानं च वा पुनः। एतच्छतार्धमावृत्य त्रैलोक्य विजयी भवेत् ॥२८॥ त्रैलोक्यं क्षोभयत्येव कवचस्य प्रसादतः। महाकविर्भवेन्मासात् सर्वसिद्धीश्वरो भवेत् ॥२९॥ पुष्पाञ्जलीन् कालिका यै मूलेनैव पठेत्सकृत्। शतवर्ष सहस्राणां पूजायाः फलमाप्नुयात् ॥३०॥ भूर्जे विलिखितं चैतत् स्वर्णस्थं धारयेद्यदि। शिखायां दक्षिणे बाहौ कण्ठे वा धारणाद् बुधः ॥३१॥ त्रैलोक्यं मोहयेत् क्रोधात् त्रैलोक्यं चूर्णयेत्क्षणात्। पुत्रवान् धनवान् श्रीमान् नानाविद्यानिधिर्भवेत् ॥३२॥ ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रस्पर्शवात्ततः। नाशमायान्ति सर्वत्र कवचस्यास्य कीर्तनात् ॥३३॥ मृतवत्सा च या नारी वन्ध्या वा मृतपुत्रिणी। कण्ठे वा वामबाहौ वा कवचस्यास्य धारणात् ॥३४॥ बहुपत्या जीववत्सा

जीववत्सा भवत्येव न संशयः। न देयं परशिष्येभ्यो ह्यभक्तेभ्यो विशेषतः॥३५॥ शिष्येभ्यो भक्तियुक्तेभ्यो ह्यन्यथा मृत्युमाप्नुयात्। स्पर्धामुद्धूय कमला वाग्देवी मन्दिरे मुखे॥३६॥ पौत्रान्तं स्थैर्यमास्थाय निवसत्येव निश्चितम्। इदं कवचमज्ञात्वा यो जपेद्दक्षकालिकाम्॥३७॥ शतलक्षं प्रजप्त्वापि तस्य विद्या न सिद्ध्यति। सहस्रघातमाप्नोति सोऽचिरान्मृत्युमाप्नुयात्॥३८॥ जपेदादौ जपेदन्ते सप्तवाराण्यनुक्रमात्। नोद्धृत्य यत्र कुत्रापि गोपनीयं प्रयत्नतः॥३९॥ लिखित्वा स्वर्णपात्रे वै पूजाकाले तु साधकः। मूर्ध्नि धार्य प्रयत्नेन विद्यारत्नं प्रपूजयेत्॥४०॥

॥इति श्री जगन्मङ्गलकाली कवचं सम्पूर्णम्॥

टिप्पणी - इस कवच का नित्य पाठ करने वाले की समस्त कामनायें पूर्ण होती हैं तथा सभी कष्ट दूर होते हैं

श्री श्यामा पूजन यन्त्र

अथ श्रीकाली कीलकम् :— "ॐ अस्य श्री कालिका कीलकस्य सदाशिव ऋषि रनुष्टुप् छन्दः श्री दक्षिण कालिका देवता सर्वसिद्धि साधने कीलकन्यासे जपे विनियोगः।

अथातः सम्प्रवक्ष्यामि कीलकं सर्वकामदम्। कालिकायाः परं तत्त्वं सत्यं सत्यं त्रिभिर्मम: ॥१॥ दुर्वासाश्च वशिष्ठश्च दत्तात्रेयो बृहस्पतिः। सुरेशो धनदश्चैव अङ्गिराश्च भृगूद्वहः ॥२॥ च्यवनः कार्तवीर्यश्च कश्यपोऽथ प्रजापतिः। कीलकस्य प्रसादेन सर्वैश्वर्यमवाप्नुयुः॥

अथ कीलकम् — "ॐकारं तु शिखा प्रान्ते लम्बिका स्थान उत्तमे। सहस्रारे पङ्कजे तु क्रीं क्रीं क्रीं वाग्विलासिनी ॥१॥ कूर्च बीज युगं भाले नाभौ लज्जा युगं प्रिये। दक्षिणे-कालिके पातु स्वनासा पुट युग्मके ॥२॥ हुंकार द्वन्द्वं गण्डे द्वे द्वे माये श्रवणद्वये। आद्यातृतीयं विन्यस्य उत्तराधर सम्पुटे ॥३॥ स्वाहा दशन मध्ये तु सर्ववर्णन्न्यसेत् क्रमात्। मुण्डमाला असिकरा काली सर्वार्थ सिद्धिदा ॥४॥ चतुरक्षरी महाविद्या क्रीं क्रीं हृदय पङ्कजे। ॐ हूँ ह्रीं क्रीं ततो हूं फट् स्वाहा च कण्ठ कूपके ॥५॥ अष्टाक्षरी कालिका या नाभौ विन्यस्य पार्वती। क्रीं दक्षिणे कालिके क्रीं स्वाहान्तो च दशाक्षरी ॥६॥ मम बाहु युगे तिष्ठ मम कुण्डलिकुण्डले। हूं ह्रीं मे वह्निजाया च हूं विद्या तिष्ठ पृष्ठके ॥७॥ क्रीं हूं ह्रीं वक्षदेशे च दक्षिणे-कालिके सदा। क्रीं हूं ह्रीं वह्निजायान्ते चतुर्दशाक्षरेश्वरी ॥८॥ क्रीं तिष्ठ गुह्यदेशे मे एकाक्षरी च कालिका। ह्रीं हूं फट् च महाकाली मूलाधार निवासिनी ॥९॥ सर्वरोमाणि मे काली करांगुल्यङ्क पालिनी। कुल्ला कटिं कुरुकुल्ला तिष्ठंतु सकली मम ॥१०॥ विरोधिनी जानु युग्मे विप्रचित्ता पदद्वये। तिष्ठमे च तथा चोग्रा पाद मूले न्यसेत्क्रमात् ॥११॥

ऊर्ध्वातिष्ठतु पादाग्रे दीप्ता पादाङ्गु लीनपि । नीली न्यसेद् विन्दु देशे घना नादे च तिष्ठमे ॥१२॥ बलाकां विन्दु मार्गे च न्यसेत्सर्वाङ्ग सुन्दरी । मम पातालके मात्रा तिष्ठ स्वकुल नायिके ॥१३॥ मुद्रा तिष्ठ त्वमर्त्ये मां मितास्वङ्गकुलेषु च । एता नृमुण्डमालास्रग्धारिण्यः खड्गपाणयः ॥१४॥ तिष्ठन्तु मम गात्राणि सन्धिकूपानि सर्वशः । ब्राह्मी ब्रह्मरन्ध्रं तु तिष्ठस्व घटिका परा ॥१५॥ नारायणी नेत्र युगे मुखे माहेश्वरी तथा । चामुण्डा श्रवण द्वन्द्वे कौमारी चिबुके शुभे ॥१६॥ तथा मुदर मध्ये तु तिष्ठ मे चापराजिता । वाराही चास्थि सन्धौ च नारसिंही नृसिंहके ॥१७॥ आयुधानि गृहीतानि तिष्ठ ख्वेतानि मे सदा ॥

फलस्तुतिः- इति ते कीलकं दिव्यं नित्यं यः कीलयेत्स्वकम् ॥ कवचादौ महेशानि तस्य सिद्धिर्न संशयः ॥१॥ श्मशाने प्रेतयोर्वापि प्रेतदर्शनतत्परः । यः पठेत्पाठयेद्वापि सर्वसिद्धीश्वरो भवेत् ॥२॥ स वाग्मी धनवान्दक्षः सर्वाध्यक्षः कुलेश्वरः । पुत्र बान्धव सम्पन्नः समीर सदृशो बले ॥३॥ न रोगवान् सदा धीरस्तापत्रय निषूदनः । मुच्यते कालिका पापात् तृणराशिमिवानलः ॥४॥ न शत्रुभ्यो भयं तस्य दुर्गमेभ्यो न बाध्यते । यस्य देशे कीलकं तु धारणं सर्वदाम्बिके ॥५॥ तस्य सर्वार्थ सिद्धिः स्यात्सत्यं सत्यं वरानने । मन्त्राच्छत गुणं देवि कवचं यन्मयोदितम् ॥६॥ तस्माच्छतगुणं चैव कीलकं सर्व कामदम् । तथा चाप्यसिता मन्त्रं नील सारस्वते मनौ ॥७॥ नसिद्ध्यति वरारोहे कीलकार्गलके विना । विहीने कीलकार्गलके काली कवचं च यः पठेत् । तस्य सर्वाणि मन्त्राणि स्तोत्राण्य सिद्धये प्रिये ॥८॥

॥ इति श्री कालिका कीलकम् समाप्तम् ॥

मं०
म०
१९
५३

भा०
टी०

अथ श्रीकाली कर्पूरस्तवराजः - तत्रादौ विनियोगः ॥ "ॐ अस्य श्रीकर्पूरस्तव राजस्य महाकाल ऋषिः, गायत्री छन्दः, श्रीदक्षिणा कालिका देवता, हलो बीजानि, स्वराः शक्तयः, अव्यक्तं कीलकं, श्री दक्षिण कालिका देवता प्रसाद सिद्ध्यर्थं अमुक कामना सिद्ध्ये ना जपे विनियोगः। (यहाँ 'अमुक' के स्थान पर साधक की जो भी कामना हो, उसके नाम का उच्चारण करना चाहिए)

अथ ऋष्यादि न्यासः - श्री महाकाल ऋषये नमः शिरसि। गायत्री छन्दसे नमः मुखे। श्रीदक्षिण कालिका देवतायै नमः हृदि। हल्भ्यो बीजेभ्यो नमः पादयोः। अव्यक्ताय कीलकाय नमः सर्वाङ्गे।

अथ करन्यास :- क्रां अंगुष्ठाभ्यां नमः। क्रीं तर्जनीभ्यां स्वाहा। क्रूं मध्यमाभ्यां वषट्, क्रैं अनामिकाभ्यां हुं, क्रौं कनिष्ठिकाभ्यां वौषट्, क्रः करतल कर पृष्ठाभ्यां फट्।

अथाङ्गन्यासः - क्रां हृदयाय नमः। क्रीं शिरसे स्वाहा। क्रूं शिखायै वषट्। क्रैं कवचाय हुं। क्रौं नेत्र त्रयाय वौषट्। क्रः अस्त्राय फट्।

अथ स्तोत्रम् :- "कर्पूरं मध्यमान्त्यस्वर परहितं सेन्दु वामाक्षि युक्तं। बीजं ते मातरेतत् त्रिपुरहर वधू त्रिः कृतं ये जपन्ति॥ तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसन्त्येव वाचः। स्वच्छन्दं ध्वान्त धाराधर रुचि रुचिरे सर्वसिद्धिं गतानाम् ॥१॥ ईशानः सेन्दुवाम श्रवण परिगतो बीजमन्यन् महेशि। द्वन्द्वं ते मन्दचेता यदि जपति जनो वारमेकं

कदाचित् ॥ जित्वा वाचामधीशं धनदमपि चिरं मोहयन्नम्बुजाक्षी वृन्दं चन्द्रार्द्ध चूडे प्रभवति स महाघोरबाणावतंसे ॥२॥ ईशो वैश्वानरस्थः शशधरविलसद् वामनेत्रेण युक्तो। बीजं ते द्वन्द्वमन्यद् विगलितचिकुरे कालिके ये जपन्ति ॥ द्वेष्टारं घ्नन्ति ते च त्रिभुवनमभितो वश्यभावं नयन्ति। सृक्कद्वन्द्वास्रधाराद्वयधर वदने दक्षिणे कालिके ति ॥ ३॥ ऊर्ध्वं वामे कृपाणं करकमलतले छिन्नमुण्डं तथोऽधः। सव्येऽभीतिं वरं च त्रिजगदघहरे दक्षिणे कालिके च ॥ जप्त्वैतन् नाम ये वा तव विमलतनुं भावयन्त्येतदम्ब। तेषामष्टौ करस्थाः प्रकटितरदने सिद्धयस्त्र्यम्बकस्य ॥ ४ ॥

वर्गाद्यं वह्नि संस्थं विधुरंतिललितं तत्त्रयं कूर्चयुग्मं। लज्जाद्वन्द्वं च पश्चात् स्मितमुखि तदधो ष्ठद्वयं योजयित्वा ॥ मातर्ये त्वां जपन्ति स्मरहरमहिले भावयन्तः स्वरूपं। ते लक्ष्मीलास्यलीला कमलदलदृशः कामरूपा भवन्ति ॥ ५॥ प्रत्येकं वा द्वयं वा त्रयमपि च परं बीजमत्यन्तगुह्यं। स्वन्नाम्ना योजयित्वा सकलमपि सदा भावयन्तो जपन्ति ॥ तेषां नेत्रारविन्दे विहरति कमला वक्त्रशुभ्रांशुविम्बे। वाग्देवी देवि मुण्डस्रगतिशयलसत्कण्ठि पीनस्तनाढ्ये ॥ ६॥

गतासूनां बाहुप्रकरकृतकाञ्चीपरिलसन् नितम्बां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनाम् ॥ श्मशानस्थे तल्पे शवहृदि महाकालसुरतप्रसक्तां त्वां ध्यायन् जननि जडचेता अपि कविः ॥ ७॥ शिवाभिर्घोराभिः शवनिवहमुण्डास्थिनिकरैः। परं संकीर्णायां प्रकटित चितायां हरवधूम् ॥ प्रविष्टां सन्तुष्टामुपरि सुरतेनाति युवतीं। सदा त्वां ध्यायन्ति

क्वचिदपि न तेषां परिभवः॥ ८॥ वदामस्ते किं वा जननि वयमुच्चैर्जडधियो। न धाता नापीशो हरिरपि न ते वेत्ति परमम्॥ तथापि त्वद्भक्तिर्मुखरयति चास्माकममिते। तदेतत् क्षन्तव्यं न खलु पशुरोषः समुचितः॥ ९॥ समन्तादापीनस्तनजघनधृग्यौवनवती रतासक्तो नक्तं यदि जपति भक्तस्तव मनुम्॥ विवासास्त्वां ध्यायन् गलितचिकुरस्तस्य वशगाः। समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः॥ १०॥

समाः स्वस्थीभूतां जपति विपरीतां यदि सदा। विचिन्त्य त्वां ध्यायन्नतिशयमहाकालसुरताम्॥ तदा तस्य क्षोणीतलविहरमाणस्य विदुषः। कराम्भोजे वश्या हरवधु महासिद्धिनिवहाः॥ ११॥ प्रसूते संसारं जननि जगतीं पालयति च। समस्तं क्षित्यादि प्रलयसमये संहरति च॥ अतस्त्वं धाताऽसि त्रिभुवनपतिः श्रीपतिरपि। महेशोऽपि प्रायः सकलमपि किं स्तौमि भवतीम्॥ १२॥ अनेके सेवन्ते भवदधिकगीर्वाणनिवहान्। विमूढास्ते मातः किमपि नहि जानन्ति परमम्॥ समाराध्यामाद्यां हरिहरविरिञ्च्यादिविबुधैः। प्रपन्नोऽस्मिन् स्वैरं रतिरसमहानन्दनिरताम्॥ १३॥ धरित्री कीलालं शुचिरपि समीरोऽपि गगनं। त्वमेका कल्याणी गिरिशरमणी कालि सकलम्॥ स्तुतिः का ते मातर्निजकरुणया ('मातस्तव करुणया' — इति पाठभेदः) मामगतिकं। प्रसन्ना त्वं भूया भव मनु न भूयान्मम जनुः॥ १४॥

श्मशानस्थः स्वस्थो गलितचिकुरो दिक्पटधरः। सहस्रं त्वर्काणां निजगलितवीर्येण कुसुमम्॥ जपंस्त्वत् प्रत्येकं मनुमपि तव ध्याननिरतो। महाकालि स्वैरं

स भवति धरित्रीपरिवृढः ॥१५॥ गृहे संमार्जन्या परिगलितवीर्यं हि चिकुरं । समूलं मध्याह्ने वितरति चितायां कुजदिने ॥ समुच्चार्य प्रेम्णा मनुमपि सकृत् कालि सततं । गजारूढो याति क्षितिपरिवृढः सत्कविवरः ॥१६॥

स्वपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो । पुरो ध्यायन् ध्यायन् यदि जपति भक्तस्तव मनुम् ॥ स गन्धर्वश्रेणीपतिरपि कवित्वामृतनदी नदीनः पर्यन्ते परमपदलीनः प्रभवति ॥१७॥ त्रिपञ्चारे पीठे शवशिवहृदि स्मेरवदनां । महाकालेनोच्चैर्मदनरसलावण्यनिरताम् समासक्तो नक्तं स्वयमपि रतानन्दनिरतो । जनो यो ध्यायेत्त्वामयि जननि स स्यात् स्मरहरः ॥१८॥ सलोमास्थि स्वैरं पललमपि मार्जारमसिते । परं चौष्ट्रं मैषं नरमहिषयोश्छागमपि वा। बलिं ते पूजायामपि वितरतां मर्त्यवसतां । सतां सिद्धिः सर्वा प्रतिपदमपूर्वा प्रभवति ॥१९॥ वशी लक्षं मन्त्रं प्रजपति हविष्याशनरतो । दिवा मातर्युष्मच्चरणकमले ध्याननिरतः ॥ परं नक्तं नग्नो निधुवनविनोदेन च मनुं । जपेल्लक्षं स स्यात् स्मरहरसमानः क्षितितले ॥20॥

इदं स्तोत्रं मातस्तव मनुसमुद्धारणजनुः । स्वरूपाख्यं पादाम्बुजयुगलपूजाविधियुत-म् ॥ निशार्धे वा पूजासमयमधि वा यस्तु पठति । प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः ॥२१॥ कुरङ्गाक्षीवृन्दं तमनुसरति प्रेमतरलं । वशस्तस्य क्षोणीपतिरपि कुबेरप्रतिनिधिः ॥ रिपुः कारा-गारं कलयति च तं केलिकलया । चिरं जीवन्मुक्तः प्रभवति स भक्तः प्रतिजनुः ॥२२॥

॥ इति श्री महाकाल विरचितं दक्षिणकालिकायाः स्वरूपाख्यं स्तोत्रं समाप्तम् ॥

अथ श्रीसरस्वती स्तोत्रम् :- अब भगवती श्री सरस्वती के स्तोत्र का उल्लेख किया जाता है, जिसके नित्य पाठ से विद्या-बुद्धि एवं वांछित फल की प्राप्ति होती है।

"श्री भैरव उवाच ।। शृणु देवि प्रवक्ष्यामि स्तोत्रं परम दुर्लभम् । वागीश्वरी मन्त्रगर्भं तु भुक्ति मुक्ति फल प्रदम् ।।

ॐ अस्य श्री सरस्वती स्तोत्र मन्त्रस्य श्रीकण्व ऋषि: विराट् छन्द: श्रीसरस्वती देवता ह्रीं बीजं ॐ शक्ति: ऐं कीलकं त्रिवर्ग फल साधने पाठे विनियोग: ।

ॐ ह्रीं ह्रीं हृद्यैक बीजे शशिरुचिकमले कल्पवृक्षस्य शोभे । भव्ये भव्यानुकूले कुमतिवन दवे विश्ववन्द्याङ्घ्रि पद्मे ।। पद्मे पद्मोपविष्टे प्रणतजनमनो मोद सम्पादयित्रि । प्रोत्फुल्लज्ञान कूटे हरिनिजदयिते देवि संसार सारे ।। १ ।।

श्री सरस्वती पूजन यन्त्र

ऐं ऐं ऐं दृष्टमन्त्रे कमलभवमुखाम्भोजभूते स्वरूपे। रूपारूप प्रकाशे सकलगुणमये निर्गुणे निर्विकारे
न स्थूले नापि सूक्ष्मे ऽप्यविदितविभवे नापि विज्ञानतत्त्वे । विश्वे विश्वान्तराले सुरवर नमिते नि-
ष्कले नित्य शुद्धे ॥२॥ ह्रीं ह्रीं ह्रीं जाप्यतुष्टे हिमरुचि मुकुटे वल्लकी व्यग्र हस्ते । मातर्मातर्नमस्ते
दह दह जडतां देहि बुद्धिं प्रशस्ताम् ॥ विद्ये वेदान्त गीते श्रुतिपरिपठिते मोक्षदे मुक्ति मार्गे।
मार्गातीतस्वभावे भव मम वरदा शारदे शुभ्रहारे ॥३॥ धीं धीं धीं धारणाख्ये धृतिमतिनति-
भिर्नामभिः कीर्त्तनीये । नित्येऽनित्ये निमित्ते मुनिगण नमिते नूतने वै पुराणे ॥ पुण्ये पुण्यप्र-
वाहे हरिहरनमिते नित्य शुद्धे सुवर्णे । मातर्मात्रार्द्धतत्त्वे मति मति मति दे माधव प्रीति मोदे ॥४॥

ह्रूं ह्रूं ह्रूं ह्रूं स्वरूपे दह दह दुरितं पुस्तकं व्यग्र हस्ते । सन्तुष्टा कार चित्ते
स्मितमुखि सुभगे जृम्भिणि स्तम्भविद्ये॥ मोहे मुग्ध प्रवाहे कुरु मम विमति ध्वान्त विध्वंस
मीडे । गीर्गौर्वाग्भारति त्वं कविवररसना सिद्धिदा सिद्धविद्या ॥५॥ स्तौमि त्वां त्वां च वन्दे भज
मम रसनां मा कदाचित् त्यजेथाः। मामे बुद्धिर्विरुद्धा भवतु न च मनो देवि मे यातु पापम् ॥ मा मे दुःखं कदाचित्
क्वचिदपि विषयेऽप्यस्तु मे नाकुलत्वं। शास्त्रे वादे कवित्वे प्रसरतु मम धी मास्तु कुण्ठा कदापि ॥६॥

इत्येतैः श्लोक मुख्यैः प्रतिदिनमुषसि स्तौति यो भक्ति नम्रो । वाणीं वाचस्पते
रप्यभिमतविभवो वाक् पटुर्मृष्ट कण्ठः॥ सः स्यादिष्टार्थ लाभैः सुतमिव सततं पाति तं सा च देवी।
सौभाग्यं तस्य लोके प्रवसति कविता विघ्नमस्तं प्रयाति ॥७॥ ब्रह्मचारी व्रती मौनी त्रयोदश्यां
निरामिषः । सारस्वतो नरः पाठादस्य स्यादिष्ट लाभवान् ॥८॥ पक्षद्वये ऽपि यो भक्त्या त्रयो-
दश्येक विंशतिम् । अविच्छेदं पठेद्धीमान् ध्यात्वा देवीं सरस्वतीम् ॥९॥ शुक्लाम्बरधरां देवीं

शुक्लाभरण भूषिताम् । वाञ्छितं फलमाप्नोति स लोके
नात्र संशयः ॥ १० ॥ इति ब्रह्मा स्वयं प्राह: सरस्व-
त्याः स्तवं शुभम् । प्रयत्नेन पठेन्नित्यं सोऽमृतत्वं
च गच्छति ॥ ११ ॥

॥ इति श्रीरुद्रयामल तन्त्रे दशविद्या रहस्ये सरस्वती
स्तोत्रम् समाप्तम् ॥

अथ श्रीसरस्वत्यष्टकम् :- वीणाधरे विपुल
मङ्गलदान शीले भक्तार्ति नाशिनि विरञ्चि हरीश
वन्द्ये ॥ कीर्तिप्रदेऽखिल मनोरथदे महार्हे विद्या
प्रदायिनि सरस्वति नौमि नित्यम् ॥ १ ॥ श्वेता-
ब्जपूर्ण विमलासन संस्थिते हे श्वेताम्बरावृत
मनोहर मञ्जुगात्रे । उद्यन्मनोज्ञ सित पङ्कज मञ्जु
लास्ये विद्याप्रदायिनि सरस्वति नौमि नित्यम् ॥
२ ॥ मातस्त्वदीय पदपङ्कज भक्तियुक्ता ये त्वां
भजन्ति निखिलानपरान्विहाय । ये निर्जरत्वमिह

यान्ति कलेवरेण भूवह्नि वायु गगनाम्बु विनिर्मितेन ॥ ३॥ मोहान्धकार भरिते हृदये मदीये मातः सदै-
कुरु वासमुदार भावे। स्वीयाखिलावयव निर्मल सुप्रभाभिः शीघ्रं विनाशय मनोगतमन्धकारम् ॥ ४॥
ब्रह्मा जगत् सृजति पालयतीन्दिरेशः शम्भुर्विनाशयति देवि तव प्रभावैः। न स्यात्कृपा यदि तव
प्रकट प्रभावे न स्युः कथञ्चिदपि ते निज कार्य दक्षाः ॥ ५॥
लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा धृतिः। एताभिः पाहि तनुभिरष्टाभिर्मां
सरस्वति ॥ ६॥ सरस्वत्यै नमो नित्यं भद्रकाल्यै नमो नमः। वेदवेदान्त वेदाङ्ग विद्यास्थानेभ्य एव
च ॥ ७॥ सरस्वति महाभागे विद्ये कमल लोचने। विद्या रूपे विशालाक्षि विद्यां देहि नमोऽस्तु
ते ॥ ८॥ यदक्षरं पदं भ्रष्टं मात्राहीनं च यद् भवेत्। तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥ ९॥
॥ इति श्री सरस्वत्यष्टकम् सम्पूर्णम् ॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

॥ समाप्तोऽयं ग्रंथः ॥